अनसूया—इदानीमतिथिविशेषलाभेन। हला शकुन्तले गच्छोटजम्। फलमिश्रमर्घमुपहर। इदं पादोदकं भविष्यति। (दाणिं अदिहिविसेसलाहेन। हला सउन्दले, गच्छ उड। फलमिस्सं अग्धं उवहर। इदं पादोदअं भविस्सदि।)

अनसूया—सम्प्रति (आप जैसे विशिष्ट) अतिथि के आगमन से (तप बढ़ रहा है)। हे सखी शकुन्तला, कुटी (उटज) में जाओ (और) फलयुक्त अर्घ (पूजन का द्रव्य) ले आओ। यह (घड़े का जल) पैर धोने के लिये (पादोदक) होगा।

टिप्पणी—मुनीनां पर्णशालोटजोऽस्त्रियाम्।

राजा—भवतीनां सूनृतयैव गिरा कृतमातिथ्यम्।

शब्दार्थ—सूनृतया = सत्य और प्रिय। गिरा = वाणी से। आतिथ्यम् = अतिथिसत्कार।

राजा—आप लोगों की प्रिय वाणी से ही (मेरा) अतिथिसत्कार सम्पन्न हो गया।

प्रियंवदा—तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहुर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः। (तेण हि इमस्सिं पच्छाअसीअलाए सत्तवण्णवेदिआए मुहुत्तअं उववसिअ परिस्समविणोदं करेदु अज्जो)।

प्रियंवदा—तब तो (आप) घनी छाया से शीतल, सप्तपर्ण वृक्ष के (नीचे बनी हुई) वेदी (चबूतरे) पर थोड़ी देर बैठकर (अपनी) थकान को दूर कर लें।

राजा—नूनं युमप्यनेन कर्मणा परिश्रान्ताः ।

व्याकरण—परिश्रान्ताः = परि + श्रम + क्त प्र० । = **थकी हुई ।**

राजा—निश्चत ही आप लोग भी इस (वृक्ष-सेचन के) कार्य से थक गयी होंगी।

अनसूया—हला शकुन्तले, उचितं नः पर्युपासपनमतिथीनाम् । अत्रोपविशामः । (हला सउन्दले, उइदं णो पज्जूवासणं अदिहीणं। एत्थ उववसिहम।) (इति सर्वा उपविशन्ति)।

व्याकरण—पर्युपासनम् - परि + उपासनम्, यण् सन्धि।

अनसूया—सखी शकुन्तला, हम लोगों को अतिथि के पास बैठना उचित है। यहाँ (हम लोग) बैठें। (सभी बैठ जाती हैं)।

शकुन्तला—(आत्मगतम्) **किं नु खल्विमं प्रेक्ष्य तपोवनविरोधिनी विकारस्य गमनीयाऽस्मि संवृत्ता ।** (किं णु क्खु इमं पेक्खिअ तपोवणविरोहिणी विआरस्स गमणीअह्मि संवुत्ता ।)

व्याकरण—गमनीया - गम् + अनीयर + टाप् = पात्र।

शकुन्तला—(अपने मन में) क्यों इस (व्यक्ति) को देखकर तपोवन के विरोधी विकार (काम-भावना) का पात्र (लक्ष्य) हो गयी हूँ।

राजा—(सर्वा विलोक्य) **अहो समवयोरूपरमणीयं भवतीनां सौहार्दम्।**

राजा—(सबको देखकर) अहा, आप लोगों की मित्रता समान आयु और रूप के कारण रमणीय है।

प्रियंवदा—(जनान्तिकम्) **अनसूये, को नु खल्वेष चतुरगम्भीराकृतिर्मधुरं प्रियमालपन् प्रभाववानिव लक्ष्यते ।** (अणसूए, को णु क्खु एसो चउरगम्भीराकिदी महुरं पिअंआलवन्तो पहाववप्तो विअ लक्खीअदि ।)

प्रियंवदा—(हाथ की ओट कर) अनसूया, यह सुन्दर और गम्भीर आकृति वाला कौन है, जो मधुर और प्रिय (वाणी) बोलता हुआ प्रभावशाली-सा प्रतीत हो रहा है।

अनसूया—सखि, ममाप्यस्ति कौतूहलम् । पृच्छामि तावदेनम् । (प्रकाशम्) **आर्यस्य मधुरालापजनितो विस्रम्भो मां मन्त्रयते—कतम आर्येण राजर्षिवंशोऽलङ्क्रियते ? कतमो वा विरहपर्युत्सुकजनःकृतो देशः ? किंनिमित्तं सुकुमारतरोऽपि तपोवनगमनपरिश्रमस्यात्मा पदमुपनीतः ।** (सहि, मम वि अस्थि कोदूहलं। पुच्छिस्सं दाव णं। अज्जस्स महुरालावजणिदो वीसम्भो मं मन्तावेदि-कदमो अज्जेण राएसिवंशो अलंकरीअदि ? कदमो वा विरह-पज्जुस्सुअजणो किदो देसो ? किणिमितं वा सुउमारदरो वि तवोवणगमणपरिस्समस्स अत्ता पदं उवणीदो ।)

अनसूया—सखी, मुझे भी यह कौतूहल (जानने की इच्छा) है। अच्छा, इनसे पूछती हूँ। (प्रकट रूप से) आपके मधुर भाषण से उत्पन्न विश्वास मुझे (आप से कुछ पूछने के लिये) प्रेरित कर रहा है। आपके द्वारा कौन-सा राजर्षिवंश अलङ्कृत किया जा रहा है (अर्थात् आप किस राजवंश में उत्पन्न हुये हैं) ? किस देश के लोग आप के वियोग से व्याकुल बनाये गये हैं (अर्थात् आप कहाँ से आये हैं) ? किस कारण से (आप ने) अपने अत्यन्त सुकुमार शरीर को इस तपोवन में आने के परिश्रम का पात्र बनाया है (अर्थात् किस कारण आप इस तपोवन में आए हैं) ?

शकुन्तला—(आत्मगतम्) **हृदय मोत्तोम्य। एषा त्वया चिन्तितान्यनसूया मन्त्रयते।** (हिअअ, मा उत्तम्म। एसा तुए चिन्तिदाइं अणसूआ मन्तेदि।)

शकुन्तला—(अपने मन में) हृदय, अधीर मत होवो। तुम्हारे द्वारा सोचे गये (विषयों) को यह अनसूया पूछ रही है।

राजा—(आत्मगतम्) **कथमिदानीमात्मानं निवेदयामि, कथं वात्मापहारं करोमि। भवतु। एवं तावदेनां वक्ष्ये।** (प्रकाशम्) **भवति, यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः, सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः।**

राजा—(अपने मन में) इस समय मैं अपने को किस प्रकार प्रकट करूँ अथवा अपने को किस प्रकार से छिपाऊँ। अच्छा, इससे इस प्रकार कहता हूँ। (प्रकट रूप में) आदरणीये, जो पुरुवंशोत्पन्न राजा दुष्यन्त के द्वारा धर्माधिकारी नियुक्त किया गया है, वह मैं निर्विघ्न (धार्मिक) क्रियाओं को जानने के लिये इस तपोवन में आया हूँ (अर्थात् राजा दुष्यन्त ने मुझे यह जानने के लिये तपोवन में भेजा है कि यहाँ तपस्वियों की धार्मिक क्रियाएँ निर्विघ्न रूप से चल रही हैं)।

अनसूया—**सनाथा इदानीं धर्मचारिणः।** (सणाहा दाणिं धम्मआरिणो।) (शकुन्तला शृङ्गारलज्जां रूपयति)।

अनसूया—धर्म का आचरण करने वाले (तपस्वी लोग) अब सनाथ हो गये। (शकुन्तला शृंगार की लज्जा का अभिनय करती है)।

सख्यौ—(उभयोराकारं विदित्वा, जनान्तिकम्) **हला शकुन्तले; यद्यत्राद्य तातः सन्निहितो भवेत् ...।** (हला सउन्दले, जई एत्थ अज्ज तादो संणिहिदो भवे...।)

दोनों सखियाँ—(दोनों राजा और शकुन्तला के आकार को जानकर हाथ से ओट करके) सखी शकुन्तला, यदि यहाँ आज पिता जी उपस्थित होते.......।

शकुन्तला—**ततः किं भवेत् ?** (तदो किं भवे ?)

शकुन्तला—तो क्या होता ?

सख्यौ—**इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति।** (इमं जीविदसब्बस्सेण वि अदिहिविसेसं किदत्थं करिस्सदि।)

दोनों सखियाँ—अपने जीवन के सर्वस्व (अर्थात् प्राणप्रिय वस्तु) (तुम शकुन्तला) से भी इस विशिष्ट अतिथि को कृतार्थ करते।

शकुन्तला—**युवामपेतम्। किमपि हृदये कृत्वा मन्त्रयेथे। न युवयोर्वचनं श्रोष्यामि।** (तुम्हे अवेध किं वि हिअए करिअ मन्तेध। ण वो ववणं सुणिस्सं।)

शकुन्तला—तुम दोनों हट जाओ। (तुम दोनों) कुछ मन में रखकर (ऐसा) कर रही हो। तुम दोनों की बातें नहीं सुनूँगी।

राजा—**वयमपि तावद् भवत्योः सखीगतं किमपि पृच्छामः।**

राजा—हम भी आप दोनों की सखी के विषय में कुछ पूछना चाहते हैं।

सख्यौ—**आर्य, अनुग्रह इवेयमभ्यर्थना।** (अज्ज, अणुग्गहो विअ इअं अब्भत्थणा।)

दोनों सखियाँ—आर्य, (आप की) प्रार्थना (हम लोगों पर) अनुग्रह के समान है।

राजा—भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः। इयं च वः सखी तदात्मजेति कथमेतत् ?

राजा—कश्यप कुल में उत्पन्न पूज्य (कण्व) शाश्वत ब्रह्मचर्य में अवस्थित हैं (अर्थात् नैष्ठिक ब्रह्मचारी हैं)—यह प्रसिद्ध है। और आप की यह सखी (शकुन्तला) उनकी पुत्री है, यह कैसे ?

अनसूया—श्रृणोत्वार्यः। अस्ति कोऽपि कौशिक इति गोत्रनामधेयो महाप्रभावी राजर्षिः। (सुणादु अज्जो। अत्थि को वि कोसिओ त्ति गोत्तणामहेओ महाप्पहावो राएसी।)

अनसूया—आर्य, सुनें। 'कौशिक' इस गोत्र-नाम वाले कोई अत्यन्त प्रभावशाली राजर्षि हैं।

राजा—अस्ति, श्रूयते।

राजा—हैं, (ऐसा) सुना जाता है।

अनसूया—तमावयोः प्रियसख्याः प्रभवमवगच्छ। उज्झितायाः शरीरसंवर्धनादिभिस्तात-काश्यपोऽस्याः पिता। (तं णो पिअसहीए पहवं अवगच्छ। उज्झिआए सरीरसंवड्ढणादिहिं तादकत्सवो से पिदा।)

अनसूया—उन (कौशिक) को हमारी प्रियसखी (शकुन्तला) का जन्मदाता (पिता) समझें। (माता-पिता से) परित्यक्त इसके शरीर के पालन-पोषण आदि के कारण तात कण्व इसके पिता हैं।

राजा—उज्झितशब्देन जनितं मे कौतूहलम्। आमूलाच्छ्रोतुमिच्छामि।

राजा—'परित्यक्त' शब्द से मुझे जिज्ञासा (जानने की इच्छा) उत्पन्न हो गयी है। (मै इस बात को) प्रारम्भ से सुनना चाहता हूँ।

अनसूया—श्रृणोत्वार्यः। गौतमीतीरे पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर्मेनका नामाप्सराः प्रेषिता नियमनिध्नकारिणी। (सुणादु अज्जा। गोदमीतीरे पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्अ किंवि जादशंकेहिं देवेहिं मेणआ णाम अच्छरा पेसिदा णिअमविग्घकारिणा।)

व्याकरण एवं शब्दार्थ—जातशङ्कैः = जाता शङ्का येषां ते तैः = सशंकित।

अनसूया—आर्य, सुनें। पहले (पूर्वकाल में) गौतमी नदी के तट पर उग्र तपस्या में रत उस राजर्षि से सशंकित (अर्थात् भयभीत) देवताओं ने (उनकी) तपस्या (नियम) में विघ्न करने वाली मेनका नामक अप्सरा को भेजा।

राजा—अस्त्येतदन्यसमाधिभीरुत्वं देवानाम्।

राजा—दूसरों की समाधि से भयभीत होना – यह देवताओं में (पाया जाता) है।

अनसूया—ततो वसन्तावतारसमये तस्या उन्मादयितृ रूपं प्रेक्ष्य --। (तदो वसन्तोदारसमये से उम्मादइत्तअं रूवं पेक्खिअ.....।) इत्यर्धोक्ते लज्जया विरमति।

अनसूया—तत्पश्चात् वसन्तऋतु के आगमन के समय उस (मेनका) के उन्मादक रूप को देखकर ... ...। (आधा कहने पर लज्जा से रुक जाती है)।

राजा—परस्ताज्ज्ञायत एव । सर्वथाप्सरः सम्भवैषा ।

व्याकरण एवं शब्दार्थ—अप्सराः सम्भवः यस्य सा = अप्सरा से उत्पन्न । 'स्त्रियां' बहुस्वप्सरसः स्वर्वेश्या उर्वशी मुख्याः - अमरः ।

राजा—आगे (का वृत्तान्त) ज्ञात ही हो जाता है कि यह (शकुन्तला) सर्वथा अप्सरा से उत्पन्न है (अर्थात् अप्सरा की पुत्री है) ।

अनसूया—अथ किम् !! (अह इं !)

अनसूया— और क्या !

राजा—उपपद्यते ।

राजा—ठीक है, क्योंकि -

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ।। २५ ।।

अन्वय—मानुषीषु अस्य रूपस्य सम्भवः कथं वा स्यात् । प्रभातरलं ज्योतिः वसुधातलात् न उदेति ।

शब्दार्थ—मानुषीषु = मानव-स्त्रियों में । अस्य रूपस्य = इस रूप (सौन्दर्य) की । सम्भवः = उत्पत्ति । कथं वा स्यात् = कैसे हो सकती है ? प्रभातरलं = कान्ति (प्रभा) से चमकती हुई । ज्योतिः = तेज (बिजली) । वसुधातलात् = भूतल से । न = नहीं । उदेति = उत्पन्न होती है ।

अनुवाद—मानव-स्त्रियों (मनुष्य-लोक की स्त्रियों) में इस सौन्दर्य (रूप) की उत्पत्ति कैसे हो सकती है (अर्थात् नहीं हो सकती) । कान्ति से चमकती हुई बिजली (ज्योति) भूमि (भूतल) से उत्पन्न नहीं होती है ।

संस्कृत व्याख्या—मानुषीषु - मनुष्यलोकस्य नारीषु, **अस्य** - दृश्यमानस्य (शकुन्तलासम्बन्धिनः), **रूपस्य** - सौन्दर्यस्य, **सम्भवः** - उत्पत्तिः, **कथं वा स्यात्** - कथं नु सम्भवति, न सम्भवति इत्यर्थः, **प्रभातरलम्** - कान्तिभास्वरम् , **ज्योतिः** - तेजः, विद्युदित्यर्थः, **वसुधातलात्** - भूतलात् , **न उदेति** - नोदयं लभते (नोत्पद्यते) ।

संस्कृत-सरलार्थः—शकुन्तलोत्पत्तिकथां श्रुत्वा दुष्यन्तः 'सर्वथैवाप्सरः सम्भवैषाः' इति निर्णीय कथयतिनवीषु स्त्रीसु शकुन्तलासदृशस्य दिव्यस्य सौन्दर्यस्य समुत्पत्तिः सर्वथाऽसम्भवा, यथा हि दीप्त्या समुज्ज्वलं ज्योतिः (चन्द्रादिः) भूतलान्न प्रकटीभवति । यथा चन्द्रादिर्भूतलान्नेत्पद्यते तथैवास्याः शकुन्तलायाः समुत्पत्तिमानुषीसु न सम्भावते इति भावः ।

व्याकरण—मानुषीषु - मनोः अपत्यं पुमान् मानुषः, स्त्री मानुषी, मनु + अञ् + ङीप् । प्रभातरलं - प्रभया तरलम् (तत्पु०) । वसुधातलात् - वसुधायाः तलात् (तत्पु०) ।

अलङ्कार—(१) यहाँ शकुन्तला के रूप विशेष का सामान्य के द्वारा वर्णन होने से **अप्रस्तुतप्रशंसा** अलङ्कार है । (२) यहाँ 'उत्पत्ति' क्रिया का 'सम्भवः' '**उदेति**' पदों से पृथक्-पृथक् पदों से वर्णन होने से **प्रतिवस्तूपमा** अलङ्कार है । लक्षण है -

प्रतिवस्तूपमा सा स्याद्वाम्ययोर्गक्यसाम्ययोः ।
एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक् । सा०द०

कुछ लोग यहाँ **दृष्टान्त** अलङ्कार मानते है। लक्षण –

दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम् । सा०द०

छन्द—यहाँ **अनुष्टुप्** छन्द है। लक्षण द्र० श्लो० ५।

(शकुन्तलाऽधोमुखी तिष्ठति ।)

(शकुन्तला नीचे मुख करके बैठी रहती है।)

राजा—(आत्मगतम्) **लब्धावकाशो मे मनोरथः । किन्तु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधभावकातरं मे मनः ।**

राजा—(अपने मन में) मेरे मनोरथ को (पूर्ण होने का) अवसर प्राप्त हो गया। किन्तु सखी के द्वारा हँसी (परिहास) में कहीं गयी पति (वर) की प्रार्थना को सुनकर मेरा मन दुविधा में होने के कारण व्याकुल (कातर) हो रहा है।

प्रियंवदा—(सस्मितं शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा) **पुनरपि वक्तुकाम इवार्यः ।** (पुणो वि वक्तुकामो विअ अज्जो।) (शकुन्तला सखीमङ्गुल्या तर्जयति।)

प्रियंवदा—(मुस्कराहट के साथ शकुन्तला को देखकर नायक की ओर मुँह कर) सम्भवतः आर्य फिर कुछ कहना चाहते हैं (शकुन्तला सखी को अङ्गुली से झिड़कती है)।

राजा—सम्यगुपलक्षितं भवत्या । अस्ति नः सच्चरित्रश्रवणलोभादन्यदपि प्रष्टव्यम् ।

राजा—आपने ठीक समझा। सच्चरित सुनने के लोभ से हमें और भी पूछना है।

प्रियंवदा—अलं विचार्य । अनियन्त्रणानुयोगस्तपस्विजनो नाम । (अलं वि आरिअ। अणिअन्तणाणुओओ तवस्सिअणो णाम।)

प्रियंवदा—(आप) कुछ (भी) विचार करें। तपस्वी लोग अप्रतिबन्ध प्रश्न वाले होते हैं (अर्थात् तपस्वी लोगों से कोई भी प्रश्न निःसङ्कोच पूछा जा सकता है)।

राजा—इति सखीं ते ज्ञातुमिच्छामि ।

राजा—तुम्हारी सखी के विषय में यह जानना चाहता हूँ।

वैखानसं किमनया व्रतमाप्रदानाद्
व्यापाररोधि मदनस्य निषेवितव्यम् ।
अत्यन्तमेव सदृशेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्गनाभिः ।। २६ ।।

अन्वय—किम् अनया मदनस्य व्यापाररोधि वैखानसं व्रतम् आ प्रदानात् निषेवितव्यम् ? आहो सदृशेक्षणवल्लभाभिः हरिणाङ्गनाभिः समम् अत्यन्तम् एव निवत्स्यति।

शब्दार्थ—किम् = क्या। **अनया** = इसके द्वारा। मदनस्य = कामदेव का । **व्यापाररोधि** = क्रियाकलापों (व्यापारों) को रोकने वाला। **वैखानसं व्रतम्** = तपस्वियों का व्रत (ब्रह्मचर्य व्रत)। **आ प्रदानात्** = (किसी अनुरूप वर को) देने तक (विवाह होने तक)। **निषेवितव्यम्** = सेवित (पालन) किया जायेगा। **आहो** = अथवा। **सदृशेक्षणवल्लभाभिः** = समान नेत्र होने के कारण प्रिय। **हरिणाङ्गनाभिः** = हरिणों की स्त्रियों (अङ्गनाओं) के (हरिणियों के)। **समम्** = साथ।

अत्यन्तम् एव = सदा ही (जीवन-पर्यन्त)। **निवत्स्यति** = निवास करेगी।

अनुवाद—क्या इस (शकुन्तला) के द्वारा कामदेव (प्रेम) के क्रियाकलापों को रोकने वाला तपस्वियों का व्रत (ब्रह्मचर्य व्रत) विवाह होने तक (ही) सेवित (पालन) किया जायेगा ? अथवा यह (ब्रह्मचारिणी के रूप में) समान नेत्र होने के कारण प्रिय हरिणियों के साथ ही जीवन-पर्यन्त निवास करेगी ?

संस्कृत व्याख्या—**किम्** – प्रश्ने, **अनया** – शकुन्तलया, **मदनस्य** – कामदेवस्य, **व्यापाररोधि** – प्रसाररोधकम् , **वैखानसम्** – तापसम् , **व्रतम्** – ब्रह्मचर्यव्रतम् , **आप्रदानात्** – वराय प्रदानपर्यन्तम् , **निषेवितव्यम्** – पालयितव्यम् , **आहो** – अथवा, **सदृशेक्षणवल्लभाभिः** – तुल्यनेत्रप्रियाभिः, **हरिणाङ्गनाभिः** – मृगीभिः, **समम्** – साकम् , **अत्यन्तम् एव** – आजीवनम् एव, **निवत्स्यति** – निवासं करिष्यति।

संस्कृत-सरलार्थः—प्रियंवदाया 'अनियन्त्रणानुयोगस्तपस्विजनो नामेति कथनं समाकर्ण्य राजा प्रियंवदां पृच्छति 'किमनया शकुन्तलया कामव्यापारावरोधकं तापसव्रतं (ब्रह्मचर्यं) विवाहकालपर्यन्तमेव समाचरणीयमस्ति, अथवा मदमत्तनयानाभिरामाभिर्हरिणीभिः सहैवाजीवनं वनेऽस्मिन् निवत्स्यतीति ब्रह्मचर्यव्रतं शकुन्तलाया विवाहात्पूर्वकाल यावत्स्थास्यत्यथवा ऽऽजीवनमिति प्रश्नाशयः।

व्याकरण—व्यापाररोधि – व्यापार + रुध् + णिनि। वैखानसं – वैखानसस्य इदम् , वैखानस + अण्। आप्रदानात् – 'पञ्चम्यपाङ्परिभिः' से प्रदान में पञ्चमी। निषेवितव्यम् – नि + सेव् + तव्यत्। सदृशेक्षणवल्लभाभिः – सदृशानि च तानि ईक्षणानि च सदृशेक्षणानि (कर्म०) तैः वल्लभाभिः (तत्पु०)। हरिणाङ्गनाभिः – हरिणानाम् अङ्गनाभिः (तत्पु०), यहाँ समम् के योग में तृतीया विभक्ति हुई है। निवत्स्यति – नि + वस् + लृट् , प्र०पु०, एक०।

अलङ्कार—यहाँ विशेषणों के साभिप्राय होने से **परिकर** अलङ्कार है— उक्तै विशेषणैः साभिप्रायैः परिकरो मतः। सा०द०

छन्द—वसन्ततिलका है — द्र० श्लोक – ८।

टिप्पणी—इस श्लोक के दो अर्थ हो सकते हैं—(१) क्या यह शकुन्तला किसी राजा के साथ विवाह होने तक ब्रह्मचर्य के व्रत का पालन करेगी तथा तपोवन में रहेगी अथवा किसी तपस्वी के साथ विवाह होने के कारण आजीवन इसी तपोवन में हरिणियों के साथ निवास करेगी। (२) यह विवाह होने तक ही ब्रह्मचर्यव्रत का पालन करेगी अथवा आजीवन ब्रह्मचर्यव्रत का पालन करती हुई तपोवन में हरिणियों के साथ रहेगी।

प्रियंवदा—आर्य, धर्मचरणेऽपि परवशोऽयं जनः। गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः। (अज्ज, धम्मचरणे वि परवसो अयं जणो। गुरूणो उण से अणुरूववरप्पदाणे संकप्पो।)

व्याकरण—अनुरूपवरप्रदाने – अनुरूपाय वराय प्रदाने (तत्पु०)।

प्रियंवदा—आर्य, धर्माचरण में भी यह व्यक्ति (शकुन्तला) पराधीन है। फिर भी पिता कण्व (गुरु) का इसे योग्य वर को देने का (विचार) है।

राजा—(आत्मगतं) **न दुरवापेयं खलु प्रार्थना।**

राजा—(अपने मन में) (निश्चय ही मेरी) यह (शकुन्तला प्रतिरूप) अभिलाषा (प्रार्थना)

भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ।। २७ ।।

अन्वय—हृदय साभिलाषं भव, सम्प्रति सन्देहनिर्णयः जातः, यत् अग्निम् आशङ्कसे, तत् इदं स्पर्शक्षमं रत्नम् (अस्ति)।

शब्दार्थ—हृदय = हे हृदय ! साभिलाषं = अभिलाषा से युक्त। भव = हो जाओ। सम्प्रति = अब। सन्देहनिर्णयः = सन्देह का निर्णय (निवारण)। जातः = हो गया। यत् = जिसको। अग्निम् = अग्नि। आशङ्कसे = समझ रहे थे। तत् = वह। इदम् = यह। स्पर्शक्षमं = स्पर्श के योग्य। रत्नम् = रत्न (है)।

अनुवाद—हे हृदय, अब (शकुन्तला के प्रति) अभिलाषा से युक्त हो जाओ। अब सन्देह का निर्णय हो गया। जिसको तुम अग्नि समझ रहे थे वह यह स्पर्श के योग्य रत्न है।

संस्कृत व्याख्या—हृदय–हे मनः, **साभिलाषं भव**–शकुन्तलाविषये आशान्वितं भव; **सम्प्रति**–इदानीम्, **सन्देहनिर्णयः**–संशयनिश्चयः इयं मद्योग्या अस्ति न वेति सन्देहस्य परिहारः, **जातः**–भूतः, यत् शकुन्तलारूपं वस्तु (त्वम्) **अग्निम्** – अनलम्, तापसकन्यात्वेन अग्नितुल्यं स्पर्शानर्हमित्यर्थः, **आशङ्कसे**–संशयं करोषि, **तत्** शङ्कितम्, **इदं**– शकुन्तलारूपं **वस्तु, स्पर्शक्षमं** — स्पर्शार्हम्, **रत्नम्**–मणिस्वरूपम्, अस्ति इति शेषः। नेयं ब्राह्मणकन्या नापि नैष्ठिकब्रह्मचारिणी किन्तु अप्सरस्सम्भवा क्षत्रियवीर्योत्पन्ना; अतः मत्परिग्रहयोग्या इति भावः।

संस्कृत-सरलार्थः—प्रियंवदायाः 'गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः' इति वचनमाकर्ण्य सन्तुष्टो राजा हृदयं सम्बोधयन् ब्रवीति-'त्वमिदानीं शकुन्तलाप्राप्त्याशाचितं भव, यतो हि साम्प्रतं मम सन्देहानां समाधानं जातम्। शकुन्तलारूपं यद् वस्तु त्वमग्नित्वेन मनुषे तदेत स्पर्शयोग्यं कन्यारत्नमस्ति। मम विवाहाय शकुन्तला सर्वथा योग्येति भावः।

अलङ्कार—श्लोक में (१) उत्तरार्धगत वाक्य पूर्वार्धगत वाक्य के प्रति हेतु रूप से अवस्थित होने से 'काव्यलिङ्ग' अलङ्कार है— (२) 'अग्निं रत्नम्' यहाँ समास न होने से व्यस्त रूपक तथा 'अग्नि स्पर्शक्षम रत्न प्रमाणित हुआ' में व्यतिरेक रूपक है।

छन्द—पद्य में आर्या जाति छन्द है।

व्याकरण— सन्देहनिर्णयः – सन्देहस्य निर्णयः (तत्पु०)। स्पर्शक्षमम् – स्पर्शस्य क्षमम् (तत्पुरुष)। साभिलाषम् – अभिलाषेण सहितम्।

टिप्पणी—(१) पहले तो राजा दुष्यन्त को सन्देह था कि यह शकुन्तला मुनि-कन्या (ब्राह्मण-कन्या) है या नहीं। जब राजा को यह ज्ञात हो जाता है कि यह क्षत्रिय-कन्या है तथा कण्व इसे योग्य वर को देना चाहते हैं तो राजा मन में विचार करता है कि हे हृदय, अब तुम शकुन्तला को प्राप्त करने की इच्छा कर सकते हो। जिस शकुन्तलारूप वस्तु को मुनिकन्या समझकर तुम अग्नि समझ रहे थे—उसे छूने तक से डर रहे थे, वह तो स्पर्श के योग्य रत्न है अर्थात् क्षत्रियकन्या होने के कारण अभिलषणीय एवं ग्रहण करने के योग्य है। अग्नि छूने वाले को जला देती है। इसके विपरीत रत्न का स्पर्श सुखद एवं मङ्गलमय होता है। रत्न जीवन में भी शोभा में चार चाँद लगा देता है। शकुन्तला नारीरत्न है।

शकुन्तला—(सरोषमिव) **अनसूये, गमिष्याम्यहम्**। (अणसूए, गमिस्सं अहं।)

शकुन्तला—(रुष्ट-सी होकर) अनसूया, मैं चली जाऊँगी।

अनसूया—किं निमित्तम् ? (किं णिमित्तं।)

अनसूया—किसलिये ?

शकुन्तला—इमामसम्बद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै निवेदयिष्यामि। (इमं असंबद्धप्पलाविणिं पिअंवदं अज्जाए गोदमीए णिवेदइस्सं।)

व्याकरण एवं शब्दार्थ—असम्बद्धप्रलापिनीम् –अलर्गल प्रलाप करने वाली। यह पद 'प्रियंवदाम्' का विशेषण है। निवेदयिष्यामि – नि+विद्+णिच्+लृट्+उ०प्र०एक०व०।

शकुन्तला—असम्बद्ध-प्रलाप (अनर्गल प्रलाप) करने वाली इस प्रियंवदा को आर्या गौतमी से कहूँगी (अर्थात् आर्या गौतमी से जाकर प्रियंवदा की शिकायत करूँगी)।

अनसूया—सखि, न युक्तमकृतसत्कारमतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम्। (सहि, ण जुत्तं अकिदसक्कारं अदिहिविसेसं विसज्जिअ सच्छन्ददो गमणं।)

व्याकरण एवं शब्दार्थ—अकृतसत्कारम् – अकृतः सत्कारः भक्ष्यपेयार्पणादिभिः पूजा यस्य स तथोक्तम् – जिसका सत्कार नहीं किया गया है। यह 'अतिथिविशेषम्' का विशेषण है। **विसृज्य** – वि+सृज+क्त्वा+ल्यप् = छोड़कर।

अनसूया—सखि, असत्कृत (जिसका सत्कार नहीं किया गया है ऐसे) विशिष्ट अतिथि को छोड़कर स्वच्छन्दतापूर्वक चला जाना उचित नहीं है।

(शकुन्तला न किञ्चिदुक्त्वा प्रस्थितैव)

(शकुन्तला बिना कुछ कहे ही चल पड़ती है)।

राजा—(ग्रहीतुमिच्छन् निगृह्यात्मानम्। आत्मगतम्) **अहो चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः। अहं हि**—

व्याकरण एवं शब्दार्थ—चेष्टाप्रतिरूपिका – चेष्टायाः अनुरूपा (अनुकूला) = चेष्टा के अनुरूप। यह पद '**कामिजनमनोवृत्ति**' का विशेषण है।

राजा—(शकुन्तला को पकड़ने की इच्छा करता हुआ (भी) अपने को रोककर। अपने मन में) अहो, कामी-जनों (प्रेमियों) की मनोवृत्ति (उसकी) चेष्टाओं के अनुकूल (हुआ करती है) क्योंकि मैं—

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः॥ २८॥

अन्वय—मुनितनयाम् अनुयास्यन् सहसा विनयेन वारितप्रसरः, (हि) स्थानात् अनुच्चलन् अपि गत्वा पुनः प्रतिनिवृत्तः इव (अस्मि)।

शब्दार्थ—मुनितनयाम् = मुनि (कण्व) की पुत्री के। अनुयास्यन् = पीछे जाने की इच्छा करता हुआ। सहसा = एकाएक। विनयेन = विनय (शिष्टता) के कारण। वारितप्रसरः = रोक ली गयी है गति जिसकी ऐसा मैं। स्थानात् = (अपने) स्थान से। अनुच्चलन् = उठकर न चला हुआ। अपि = भी। गत्वा = जाकर। पुनः = फिर। प्रतिनिवृत्तः इव = मानो लौट आया हूँ।

अनुवाद—मुनि (कण्व) की पुत्री (शकुन्तला) के पीछे जाने (पीछा करने) की इच्छा करता हुआ सहसा शिष्टतावशात् अवरुद्ध (रोकी हुई) गति वाला (मैं अपने) स्थान से उठकर न चलने पर भी मानो जाकर फिर लौट आया (हूँ)।

संस्कृत व्याख्या—**मुनितनयाम्** – कण्वपुत्रीं शकुन्तलाम् , **अनुयास्यन्** – अनुगमिष्यन्, **सहसा** – अकस्मात् , **विनयेन** – शिष्टतया, **वारितप्रसरः** – अवरुद्धवेगः, **स्थानात्** – स्वासनात् , **अनुच्चलन् अपि** – पदमेकमगच्छन् अपि, **गत्वा** – तामनुसृत्य, **पुनः** – भूयः, **प्रतिनिवृत्तः इव** – प्रत्यागतः इव।

संस्कृत-सरलार्थः—शकुन्तलां ग्रहीतुमुद्यतमात्मानं निगृह्य राजा चिन्तयति 'कण्वदुहितरमनुगमिष्यन् किन्तु विनयेव निरुद्धगतिरहं स्वस्थानादगच्छन्नपि शकुन्तलाभ्याशं गत्वा पुनः प्रत्यागत इव जातः।

व्याकरण—**मुनितनयाम्** – मुनेः तनयाम् (तत्पु०)। **अनुयास्यन्** – अनु+या+लृट्+शतृ। **वारितप्रसरः** – वारितः निरुद्धः प्रसरः गतिः यस्य सः (बहु०)। **अनुच्चलन्** – अन्+उत्+चल्+शतृ। **प्रतिनिवृत्तः** – प्रति+नि+वृ+क्त।

अलङ्कार—श्लोक में 'सहसा विनयेन वारितप्रसरः' **काव्यलिङ्ग**, 'अचलन्नपि गत्वा' में '**विरोधाभास**' एवं 'प्रतिनिवृत्तः इव' में '**क्रियोत्प्रेक्षा**' अलङ्कार है।

छन्द—यह पद्य 'आर्या' छन्द का उदाहरण है।

टिप्पणी—(१) इस श्लोक में कालिदास की मनोवैज्ञानिक विज्ञता का परिचय मिलता है। बाह्य रूप से शारीरिक चेष्टा न करने की स्थिति में भी मनुष्य इच्छा की प्रबलता के कारण भीतर ही भीतर मानसिक चेष्टा संवलित शारीरिक चेष्टा करने की प्रतीति होती है। जाती हुई शकुन्तला को पकड़ने की दृढ़ इच्छा के कारण कुछ न करने पर भी ऐसा लगता है कि वह जैसे शकुन्तला के पीछे जाकर लौट आया है। (२) **विनयेन**—भरत मुनि ने विनय का अर्थ 'जितेन्द्रिय' किया है – इन्द्रियाणां जयं प्राह विनयं भरतो मुनिः। (३) '**मुनितनयाम्**' में मुनि शब्द साभिप्राय है। मुनि की पुत्री होने के कारण शकुन्तला के प्रति अतिशिष्ट व्यवहार अपेक्षित है – यह दुष्यन्त का अभिप्राय है।

प्रियंवदा—(शकुन्तलां निरूध्य) **हला न ते युक्तं गन्तुम्।** (हला, ण दे जुत्तं गन्तुं।)

प्रियंवदा—(शकुन्तला को रोककर) सखी, तुम्हारा जाना ठीक नहीं है।

शकुन्तला—(सभ्रूभङ्गम्) **किं निमित्तम् ?** (किं णिमित्तं ?)

शकुन्तला—(भौहें टेढ़ी करके) किस लिये ?

प्रियंवदा—**वृक्षसेचने द्वे धारयसि मे। एहि तावत्। आत्मानं मोचयित्वा ततो गमिष्यसि।** (रूक्खसेअणे दुबे धारेसि मे। एहि दाव। अत्ताणं मोचिअ तदो गमिस्ससि।) (इति बलादेनां निवर्तयति)।

प्रियंवदा—वृक्ष सींचने (के कार्य) में तुम दो (वृक्षों को सींचने) की मेरी ऋणी हो (अर्थात् मैंने तुम्हारे हिस्से के दो वृक्षों को सींचा था, अब तुम्हें मेरे हिस्से के दो वृक्षों को सींचना है।) तो चलो पहले अपने को (ऋण से) मुक्त कराकर तब जाना। (यह कहकर बलपूर्वक इसको लौटाती है)।

राजा—भद्रे, वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये तथा ह्यस्याः—

राजा—भद्रे, वृक्षसेचन के कारण ही इन आदरणीया (शकुन्तला) को थकी हुई देख रहा हूँ। क्योंकि इनकी—

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणाद्
अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं कर्णशिरीषरोधि वदने धर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः।। २९।।

अन्वय—घटोत्क्षेपणात् (अस्याः) बाहू स्रस्तांसौ अतिमात्रलोहिततलौ (स्तः) प्रमाणाधिकः श्वासः अद्यापि स्तनवेपथुं जनयति, वदने कर्णशिरीषरोधि धर्माम्भसां जालकं बद्धम्, बन्धे स्रंसिनि पर्याकुलाः मूर्धजाः च एकहस्तयमिताः (सन्ति)।

शब्दार्थ—घटोत्क्षेपणात् = घड़े को उठाने से। अस्याः = इसकी। बाहू = दोनों भूजायें। स्रस्तांसौ = जिनके कन्धे झुक गयें हैं ऐसी (झुके हुये कन्धों वाली)। अतिमात्रलोहिततलौ = जिनकी हथेली अत्यधिक लाल हो गयी है ऐसी (अत्यधिक लाल हथेली वाली)। प्रमाणाधिकः = (निश्चित) मात्रा (प्रमाण) से अधिक, (लम्बी-लम्बी)। श्वासः = निःश्वास वायुः (साँस)। अद्यापि = अब भी। स्तनवेपथुं = स्तनों में कम्पन को। जनयति = उत्पन्न कर रही है। वदने = मुख पर। कर्णशिरीषरोधि = कानों (में आभूषण स्वरूप पहने गये) शिरीष (शिरस) के पुष्प को रोकने वाला (गाल पर चिपका कर स्थिर करने वाला)। घर्माम्भसां = घाम (गर्मी) से (उत्पन्न) होने वाले जल (पसीने) की बूँदों का। जालकम् = समूह। बद्धम् = व्याप्त (अस्ति) है। च = और। बन्धे = केशबन्धन के। स्रंसिनि = ढीला हो जाने पर। एकहस्तयमिताः = एक हाथ से पकड़े गये। मूर्धजाः = बाल। पर्याकुलाः = बिखरे हुये। सन्ति = हैं।

अनुवाद—घड़े को उठाने से (इसकी) (दोनों) भुजायें झुके हुए कन्धों वाली और अत्यधिक लाल हथेली वाली (हो गयी हैं)। निश्चित मात्रा से अधिक चलने वाला श्वास वायु (साँस) अब भी स्तनों में कम्पन उत्पन कर रहा है। मुख पर (कपोलों पर), कर्णाभूषण रूप शिरीष (शिरस) के पुष्पों को रोकने वाले (अर्थात् चिपकाने वाले) पसीने की बूदों का समूह व्याप्त है और केशबन्धन के शिथिल हो जाने पर (खुल जाने पर) एक हाथ से सँभाले गये बाल बिखरे हुये है।

संस्कृत व्याख्या—(वृक्षसेचनाय) **घटोत्क्षेपणात्** – जलपूर्णघटानाम् उत्थापनात् (अस्याः शकुन्तलायाः), **बाहू** – भुजौ, **स्रस्तांसौ** – परिश्रान्ततया अवनतस्कन्धौ, **अतिमात्रलोहिततलौ** – अत्यर्थं रक्तकरतलौ, **प्रमाणाधिकः** – स्वाभाविकादधिकः, **श्वासः** – निःश्वासः, **अद्यापि** – इदानीमपि, **स्तनवेपथुं** – कुचकम्पम्, **जनयति** – उत्पादयति, **वदने** – मुखमण्डले, **कर्णशिरीषरोधि** – कर्णभूषणभूतशिरीषकुसुमसञ्चाररोधकम्, **धर्माम्भसां** – स्वेदवारिकणानाम्, **जालकं** – समूहः, **बद्धम्** – अभिव्याप्तम्, **बन्धे** – केशबन्धने, **स्रंसिनि** – स्खलिते सति, **एकहस्तयमिताः** – एकेन हस्तेन संयतीकृताः, **मूर्धजाः च** – केशा। (अतएव) पर्याकुला विकीर्णाः (सन्ति)।

संस्कृत-सरलार्थः—वृक्षसेचनात् परिश्रान्तां शकुन्तलयां वीक्ष्य राजा कथयति – 'घटोत्क्षेपणाद्धेतोरस्या बाह्वनतस्कन्धावतिलहितकरौ चास्तः। प्रमाणाधिकः श्वासवायुरधुनाऽपि कुचकम्पनं जनयति। मुखमण्डले कर्णाभरणीकृतशिरीषपुष्पसञ्चलननिरोधकः स्वेदजलानां बिन्दुसमूहो गलितो

दृश्यते। घटोत्क्षेपणादेव केशबन्धे स्खलति सति विक्षिप्ता: केशा एकहस्त- बद्धा विकीर्णाश्च लक्ष्यन्ते।

व्याकरण—घटोत्क्षेपणात् – घटानाम् उत्क्षेपणात् (तत्पु०), हेत्वर्थ में पञ्चमी। स्त्रस्तांसौ- स्त्रस्तौ अंसौ ययो: तौ (बहु०)। अतिमात्रलोहिततलौ – अतिमात्रं लोहितं तलं ययो: तौ (बहु०)। प्रमाणाधिक: – प्रमाणात् अधिक: (तत्पु०)। स्तनवेपथुं – स्तनयो: वेपथुम् (तत्पु०)। एकहस्तयमिता: – एकेन हस्तेन यमिता: (तत्पु०)। मूर्धजा: – मूर्धनि जाता: = मूर्धन्+जन्+ड। वेपथु: – वेप्+अथुच्। कर्णशिरीषरोधि – कर्णयो: शिरीषं रोद्धुं शीलमस्य तत्, तच्छील्ये णिनि:। कर्णशिरीष+रुध्+णिनि।

अलङ्कार—(१) शकुन्तला की थकावट को दिखाने के लिये उसके कन्धों का झुका होना, हथेलियों का लाल होना, लम्बी श्वास लेने के कारण स्तनों का काँपना आदि कारणों का कथन होने से **समुच्चय** अलङ्कार है। (२) श्रान्त (थकी हुई) शकुन्तला का स्वाभाविक वर्णन करने के कारण स्वभावोक्ति अलङ्कार है। (३) 'घटोत्क्षेपणात्' इस एक पद का सभी 'स्त्रस्तांस, अतिमात्रलोहिततलौ, श्वास: प्रमाणाधिक:' आदि से सम्बन्ध होने के कारण '**दीपक**' अलङ्कार है।

छन्द—इस पद्य में शार्दूलविक्रीडित छन्द है।

टिप्पणी—(१) सुन्दर स्त्रियों के कन्धे स्वभावत: सामान्य स्त्रियों की अपेक्षा कुछ अधिक झुके हुये होते हैं। किन्तु पानी भरा घड़ा बार-बार ढोने के कारण थकानवश शकुन्तला के कन्धे और अधिक झुक गये हैं। शकुन्तला की स्वभावत: लाल हथेलियाँ बार-बार घड़ा उठाने से अत्यधिक लाल हो गई हैं। स्त्रियों के झुके हुए कन्धे और लाल हथेली सौन्दर्य-सूचक होते हैं। (२) प्राचीन काल में सुन्दरियाँ शिरीष के पुष्प को झुमका बनाकर, कानों में पहना करती थीं। झुमका हिलता रहता है। किन्तु श्रम के कारण शकुन्तला के मुख पर जो पसीना आ गया है, उस पसीने में शिरीष का पुष्प (झुमका) चिपक गया है। अब वह हिल डुल नहीं रहा है। (३) अत्यधिक हिलने डुलने से शकुन्तला के बाल खुलकर इधर-उधर बिखर गये हैं। एक हाथ में घड़ा होने से शकुन्तला दूसरे हाथ से बालों को सँभाले हुये है।

तदहमेनामनृणां करोमि। (इत्यङ्गुलीयकं दातुमिच्छति)।

व्या० एवं श०—अङ्गुलीयम् = अङ्गुलौ भवम् – अङ्गुलि+छ-ईय = अंगूठी।

तो मै इनको ऋणमुक्त करता हूँ। (अँगूठी देना चाहता है)।

(उभे नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयत:)

व्याकरण—अनुवाच्य – अनु+वच्+णिच्+क्त्वा-ल्यप् = पढ़कर।

(दोनों नामाङ्कित अँगूठी के अक्षरों को पढ़कर, एक दूसरे को देखने लगती हैं)।

राजा—अलमस्मानन्यथा सम्भाव्य। राज्ञ: परिग्रहोऽयम्।

व्या० एवं श०—परिग्रह: – उपहार – परि+ग्रह+घञ्। सम्भाव्य = सम्+भू+णिच्+क्त्वा-ल्यप् = समझ कर।

राजा—हमें और कुछ (अर्थात् दुष्यन्त राजा) न समझें। यह राजा का उपहार (परिग्रह) है।

प्रियंवदा—तेन हि नार्हत्येतदङ्गुलीयकमङ्गुलीवियोगम्। आर्यस्य

वचनेनानृणेदानीमेषा । (किञ्चिद्विहस्य) **हला शकुन्तले, मोचिताऽस्यनुकम्पिनार्येण, अथवा महाराजेन । गच्छेदानीम् ।** (तेण हि णारिहदि एदं अंगुलीअअं अंगुलीविओअं । अज्जस्स वअणेण अणिरिणा दाणिं एसा । हला सउन्दले, मोइदा सि अणुअम्पिणा अज्जेण, अहवा महाराएण । गच्छ दाणिं ।)

प्रियंवदा—तो यह अँगूठी (आप की) उँगली के वियोग के योग्य नहीं है । आपके कहने से (ही) यह (शकुन्तला) अब ऋणमुक्त हो गयी है । (कुछ हँसकर) सखी शकुन्तला, तुम (इन) दयालु आर्य अथवा महाराज के द्वारा मुक्त करा दी गयी हो । अब जाओ (जा सकती हो) ।

शकुन्तला—(आत्मगतम्) **यद्यात्मनः प्रभविष्यामि ।** (प्रकाशम्) **का त्वं विस्रष्टव्यस्य रोद्धव्यस्य वा ?** (जइ अत्तणी पहविस्सं । का तुमं विसज्जिदव्वस्स रुन्धिदव्वस्स वा ?)

विस्रष्टव्यस्य – वि+सृज्+तव्यत् – ष०ए० । रोद्धव्यस्य – रुध्+तव्यत् – ष०ए०व०

शकुन्तला—(अपने मन में) यदि अपने वश में होऊँगी (तब तो जाऊँगी) । (प्रकट रूप में) तुम (मुझे) छोड़ने या रोकने वाली कौन हो ?

राजा—(शकुन्तलां विलोक्य । आत्मगतम्) **किन्नु खलु यथा वयमस्यामेव-मियमप्यस्मान् प्रति स्यात् । अथवा लब्धावकाशा मे प्रार्थना । कुतः—**

राजा—(शकुन्तला को देखकर अपने मन में) क्या जिस प्रकार हम इस पर (साभिलाष, अनुरक्त हैं) उसी प्रकार यह भी हमारे प्रति (अनुरक्त) है अथवा मेरी अभिलाषा को अवसर प्राप्त हो गया है (अर्थात् मेरी इच्छा के पूर्ण होने के लक्षण दिखायी दे रहे हैं) । क्योंकि—

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यभिमुखं मयि भाषमाणे ।
कामं न तिष्ठति मदाननसम्मुखीना
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ।। ३० ।।

अन्वय—यद्यपि (इयं) मद्वचोभिः वाचं न मिश्रयति, (तथापि) मयि भाषमाणे अभिमुखं कर्णं ददाति, कामं मदाननसम्मुखीना न तिष्ठति, (तथापि) अस्याः दृष्टिः तु भूयिष्ठम् अन्यविषया न (भवति) ।

शब्दार्थ—यद्यपि = यद्यपि । मद्वचोभिः = मेरे वचनों (बातों) से । वाचं = (अपने) वचन । न = नहीं । मिश्रयति = मिलाती है । मयि = मेरे । भाषमाणे = बोलने पर । अभिमुखम् = मेरी ओर । कर्णं = कान । ददाति = देती है (अर्थात् कान लगाये रखती है) । कामं = भले ही, यह सत्य है कि । मदाननसम्मुखीना = मेरे मुख की ओर मुख कर । न = नहीं । तिष्ठति = रहती है (पर यह सत्य है कि) । अस्याः = इस (शकुन्तला) की । दृष्टिः = दृष्टि । भूयिष्ठम् = अधिकतर । अन्यविषया = अन्य विषयों (वस्तुओं) की ओर (दूसरी ओर) । न = नहीं । भवति = रहती है ।

अनुवाद—यद्यपि (यह शकुन्तला) मेरी बातों से अपनी बात नहीं मिलाती है (अर्थात् मेरे साथ बात नहीं करती है); (तथापि) मेरे बोलने पर मेरी ओर कान लगाये रखती है । भले ही (यह) मेरे मुख की ओर मुख कर नहीं रहती है, (तथापि) इसकी दृष्टि प्रायः अन्य विषयों (वस्तुओं) की ओर नहीं (रहती है) अर्थात्, मेरे अतिरिक्त किसी दूसरे की ओर नहीं जाती है ।

संस्कृत-व्याख्या—**यद्यपि** – इयं शकुन्तला, **मद्वचोभिः** – मम उक्तिभिः सह; **वाचं** – वचनं (निजोक्तिम्), **न मिश्रयति** – न सम्मेलयति, साक्षान्मया सह नालपतीत्यर्थः, (तथापि), **मयि** – दुष्यन्ते, **भाषमाणे** – कथयति सति, **अभिमुखं** – मां प्रति, **कर्णं** – श्रोत्रम् , **ददाति** – करोति, **मद ुक्तिं** – सादरं शृणोतीत्यर्थः (यद्यपि), **कामम्** – पर्याप्तं, **मदाननसम्मुखीना** – मन्मुखाभिमुखी, **न तिष्ठति** – न वर्तते, (तथापि) **अस्याः** – शकुन्तलायाः, **दृष्टिः** – नयनम् , **तु भूयिष्ठम्** – अतिशयेन, **अन्यविषया** – मन्मुखातिरिक्तविषयगता, **न** – नहि (वर्तते)।

संस्कृत-सरलार्थः—राजा (दुष्यन्तः) शकुन्तलागतां चेष्टामवलोक्य स्वचेनसि विचारयति – 'यद्यपि नेयं मया सह वार्तालापं कुरुते, तथापि मयि कथयति सति सावधानतया मम वचनं भृणुते। यद्यपीयं मन्मुखाभिखी न भवति तथाप्यस्या दृष्टिर्मन्मुखातिरिक्तवस्तुगता न जायते। ईहग्भिश्चेष्टाभिरस्या अनुमातुं शम्यते यदेषा नथैव मय्युरक्ता तथाऽहमस्यामिति।

व्याकरण—मदाननसम्मुखी – मम आननम् मदाननम् तस्य सम्मुखी (ष०त०)। भूयिष्ठम् – बहु+इष्ठन् बहु को 'भू' आदेश और 'इ' को 'यि' आदेश। अन्यविषया – अन्यःविषयः यस्याः सा (बहु०)।

अलङ्कार—(१) यहाँ शकुन्तला के हृदय में राजा के प्रति अनुराग की उत्पत्ति रूपी कार्य के प्रति कान लगाना (कर्णं ददाति) तथा अन्य विषयों की ओर दृष्टि न लगाना (दृष्टिः भूयिष्ठम् अन्यविषया न) इन दो कारणों का उल्लेख होने से 'समुच्चय' नामक अलङ्कार है। (२) अन्यत्र **छेकानुप्रास** तथा **वृत्त्यनुप्रास** भी है।

छन्द—इस पद्य में 'वसन्ततिलका' छन्द है।

टिप्पणी—इस श्लोक में शकुन्तला की शारीरिक तथा मानसिक अवस्था वर्णित है, उससे उसका दुष्यन्त के प्रति अनुराग सूचित होता है। ये लक्षण उस युवती के हैं जो अनुराग के वशीभूत है। जिसके प्रति आदर या अनुराग नहीं होता, उसकी बातें कान लगाकर नहीं सुनी जाती और उसके सामने रहने पर व्यक्ति ऊब कर दूसरी ओर दृष्टि कर लेता है – दूसरे रुचिकर विषयों को देखने लगता है।

(नेपथ्ये) **भो भोस्तपस्विनः सन्निहितास्तपोवनसत्त्वरक्षायै भवत। प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः।**

व्याकरण एवं शब्दार्थ—सन्निहिताः – सम्+नि+धा (हि आदेश)+क्त प्र०बहु व०। समीपवर्ती हो जाइये। प्रत्यासन्नः – समीपस्थ – प्रति+आसद्+क्त प्र०एक व०। मृगयाविहारी – शिकार के लिये विचरण करने वाला – मृगयया विहर्तुं शीलमस्येत्यर्थे – मृगया+वि+हृ+णिनि। भवत – भू+लोट्+म०पु०बहु व०।

(नेपथ्य में) हे हे तपस्वियों, तपोवन के प्राणियों (सत्त्वों) की रक्षा के लिये आप लोग (उन प्राणियों के) समीपवर्ती हो जाइये। शिकार के लिये विचरण करने वाला राजा दुष्यन्त (आश्रम के) पास में आ गया है।

तुरगखुरहतस्तथा हि रेणुर्विटपनिषक्तजलार्द्रवल्कलेषु।
पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु॥ ३१॥

अन्वय—तथा हि तुरगखुरहतः परिणतारुणप्रकाशः रेणुः शलभसमूहः इव विटपनिषक्तजलार्द्रवल्कलेषु आश्रमद्रुमेषु पतति।

शब्दार्थ—तथा हि = क्योंकि। तुरगखुरहत: = घोड़ों के खुरों से उड़ायी गयी। परिणतारुणप्रकाश: = सायंकालीन सूर्य के (अरुण) (प्रकाश) के तुल्य कान्ति वाली। रेणु: = धूलि। शलभसमूह: इव = पतङ्गों के (टिड्डियों के) समूह की भाँति। विटपविसक्तजलार्द्रवल्कलेषु जिनकी शाखाओं (डालियों) पर जल से गीले वल्कलवस्त्र डाले गये (फैलाये गये) हैं ऐसे, शाखाओं पर डाले गये (फैलाये गये) जल से गीले वल्कलवस्त्र वाले। आश्रमद्रुमेषु = आश्रम के वृक्षों पर। पतति = गिर रही है (पड़ रही है)।

अनुवाद—क्योंकि घोड़ों के खुरों से उठायी (उड़ायी) गयी सायंकालीन (अर्थात् अस्त होते हुये) सूर्य की कान्ति के तुल्य (लाल) कान्ति वाली धूल पतङ्गों के समूह (टिड्डियों के दल) की भाँति आश्रम के (उन) वृक्षों पर गिर रही (पड़ रही) है, जिनकी शाखाओं (डालियों) पर मुनियों के जल से गीले वल्कलवस्त्र (सूखने के लिये) डाले गये (फैलाये गये) हैं।

संस्कृत व्याख्या—तथा हि – यतो हि, **तुरगखुरहत:** – अश्वखुरोत्थित:, **परिणतारुणप्रकाश:** – सांयकालीनस्य सूर्यस्य प्रकाश: इव प्रकाश: (दीप्ति:) यस्य स: तथाभूत:, **रेणु:** – धूलि:, **शलभसमूह: इव** – पतङ्गवृन्दम् इव, **विटपनिषक्तजलार्द्रवल्कलेषु** – शाखालम्बितजलसिक्तवल्कलेषु, **आश्रमद्रुमेषु** – तपोवनपादपेषु, **पतति** – पतितो भवति।

संस्कृत-सरलार्थ:—तपस्विभि: कैश्चिन्नेपथ्ये राजरथतुरगोत्त्थापितैर्धूलिकणै राजागमनमनुमाय सूच्यते — तुरगखुरसमुत्थापिता धूलिकणा: सान्ध्यसूर्यप्रकाशा: पतङ्गसमूहा इव तेषु तपोवनवृक्षेषु वायुनोड्डीयमाना: पतन्ति येषां (वृक्षाणां) शाखासु मुनिजनानामार्द्राणि वल्कलानि लम्बितानि सन्ति।

व्याकरण—तुरगखुरहत: – तुरेण वेगेन गच्छन्ति इति तुरगा: – तुर+गम्+ड (कर्तरि), तुरगाणां खुरा: (स०त०) तै: हत: – (तृ०त०)। यह पद 'रेणु' का विशेषण है। **विटप०** – जलेन आर्द्राणि जलार्द्राणि (तृ०त०), तथाभूतानि वल्कलानि (कर्म०) विटपेषु – वृक्षशाखासु निषक्तानि (तृ०त०) विटपनिषक्तानि जलार्द्रवल्कलानि येषु ते (ब०ब्री०) तेषु। परिणता० – परिणत: अरुण: = सायंकालीन: सूर्य: (कर्म०) तस्य प्रकाश इव प्रकाशो यस्य (बहु०), परि+नम्+क्त। यह पद शलभसमूह: इस पद का विशेषण है।

अलङ्कार—परिणतारुणप्रकाश में 'इव' पद का लोप होने से लुप्तोपमालङ्कार है तथा 'शलभसमूह इव' में श्रौती उपमा है। यहाँ रेणु उपमेय, शलभसमूह उपमान, 'इव' वाचकशब्द तथा प्रकाश साधारण धर्म है। कुछ टीकाकार यहाँ काव्यलिङ्ग, अप्रस्तुतप्रशंसा भी मानते है।

छन्द—यहाँ 'पुष्पिताग्रा' नामक छन्द है। लक्षण है –अयुजि नयुगरेफतोयकारो युजि तु नजौ जरगाश्च पुष्पिताग्रा॥ अर्थात्, प्रथम और तृतीय चरणों में क्रमश: नगण, नगण, रगण और यगण तथा द्वितीय और चतुर्थ चरणों में नगण जगण, जगण, रगण और एक गुरु वर्ण हो तो, वह पुष्पिताग्रा नामक (अर्धसम) वृत्त (छन्द) होता है।

टिप्पणी—(१) जिस प्रकार टिड्डी-दल का आगमन अपने आप में एक महान् सङ्कट है उसी प्रकार शिकार खेलते हुये राजा और उसकी इतनी विशाल सेना का आश्रम के निकट आ पहुँचना भी महान् सङ्कट है। प्राणियों की रक्षा करने के लिये तपस्वियों को उनके आस-पास स्थित होने को कहा गया है। (२) टिड्डियों का रङ्ग लाल होता है और वे पेड़ों पर इस तरह बैठती हैं जैसे धूल के बादल। इस साम्य को देखकर ही यहाँ उपमा दी गयी है। टिड्डियाँ और धूल दोनों

ही सायंकालीन सूर्य की कान्ति के समान लाल है। धूल का रङ्ग लाल मिट्टी के कारण और टिड्डियों का रङ्ग स्वाभाविक रूप से लाल है।

अपि च— और भी—

तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः
पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः ।
मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः ।। ३२ ।।

अन्वय—स्यन्दनालोकभीतः तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः भिन्नसारङ्गयूथः गजः नः तपसः मूर्तः विघ्नः इव धर्मारण्यं प्रविशति।

शब्दार्थ—स्यन्दनालोकभीतः = रथ को देखने से भयभीत। तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः = तीव्र-प्रहार से टूटी हुई वृक्ष की शाखा (डाली) में फँसे हुये एक दाँत वाला। पादाकृष्टव्रत-तिवलयासङ्गसञ्जातपाशः = पैरों से खींचे गये लतासमूह के लिपटने से उत्पन्न पाश वाला, पैरों से खींचे गये लतासमूह के लिपटने से जिसके (पैर में) बेड़ी (पाश) सी पड़ गयी है। भिन्नसारङ्गयूथः = हरिणों के झुण्ड को छिन्न-भिन्न (तितर-बितर) कर देने वाला। गजः = हाथी। नः = हमारी। तपसः = तपस्या के। मूर्तः = शरीरधारी। विघ्नः इव = विघ्न की भाँति। धर्मारण्यं = तपोवन में। प्रविशति = प्रवेश कर रहा है।

अनुवाद—रथ को देखने से भयभीत, तीव्र (कठोर) प्रहार से सामने के वृक्ष की शाखा (डाली) में टूटे हुये एक दाँत वाला, पैरों से खींचे गये लतासमूह के लिपटने से (पैरों में) पड़ी हुयी बेड़ी वाला तथा हरिणसमूह को छिन्न-भिन्न (तितर-बितर) कर देनेवाला (यह) हाथी हम लोगों की तपस्या के शरीरधारी विघ्न की भाँति तपोवन में प्रवेश कर रहा है।

संस्कृत व्याख्या—**स्यन्दनालोकभीतः** – स्यन्दनस्य रथस्य आलोकेन दर्शनेन त्रस्तः, **तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः** – तीव्रेण आघातेन प्रहारेण त्रोटितः यः तरुः वृक्षः तस्य स्कन्धे शाखायां लग्नः संसक्तः एकः दन्तः यस्य सः, **पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः** – पादैः चरणैः आकृष्टम् यद् व्रततिवलयं लताजालं तस्य सम्पर्केण सञ्जातः समुत्पन्नः पाशः बन्धः यस्य सः, **भिन्नसारङ्गयूथः** – भीत्युत्पादनात् भिन्नः पृथक्कृतः हरिणानां समूहः येन सः, **गजः** – हस्ती, **नः** – अस्माकं , **तपसः** – तपस्यायाः, **मूर्तः** – शरीरधारी, **विघ्नः इव** – अन्तरायः इव, **धर्मारण्यं** – तपोवनम् , **प्रविशति** – प्रवेशं करोति।

संस्कृत-सरलार्थः—रथालोकनभीतस्य गजस्य वर्णनं क्रियते तपस्विभिर्वचनैरेभिः- राजरथदर्शनभीतस्तपोनियमस्य मूर्तिमान् विघ्न इव गजस्तपोवनं प्रविशति, यस्यैको दन्तः कठोरप्रहारादभिमुखस्य वृक्षस्य स्कन्धे लग्नः, पादाकृष्टलताजालवेष्टनेन यस्य बन्धनं जातम् येन्च वनमृगसमूहा इतस्ततः पलायिताः।

व्याकरण—स्यन्दनालोकभीतः – स्यन्दनस्य आलोकात् भीतः (तत्पु०)। तीव्राघातप्रतिहतरुस्कन्धलग्नैकदन्तः – तीव्रेण आघातेन प्रतिहतस्य तरोः स्कन्धे लग्नः एकः दन्तः यस्य सः (तत्पु०, बहु०)। पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः – पादैः आकृष्टस्य व्रततीनां वलयस्य आसङ्गेन सञ्जातः पाशः यस्य सः (तत्पु०, बहु०)। भिन्नसारङ्गयूथः – भिन्नं सारङ्गाणां

यूथं येन सः (तत्पु०, बहु०)। धर्मारण्यं - धर्मस्य (धर्मार्थं वा) अरण्यम् (तत्पु०)। प्रविशति - प्र+विश+लट्+प्र०पु०ए०व०।

रस—इस श्लोक में **भयानक** रस है। गजगत भय स्थायीभाव, गजद्वारा दृश्यमान रथ विभाव (आलम्बन) भागना आदि अनुभाव है।

अलङ्कार—(१) 'मूर्तो विघ्नस्तपस इव' में **उत्प्रेक्षालङ्कार** है। यहाँ गज में तपस्या के मूर्तिमान् विघ्न की उत्प्रेक्षा की गयी है। (२) गज के 'तीव्राघात-दन्तः', 'पादाकृष्ट-जातपाशः', 'भिन्नसारङ्गयूथः', आदि विशेषणों के साभिप्राय होने के कारण '**परिकरालङ्कार**' है।

छन्द—पद्य में **मन्दाक्रान्ता** छन्द है। उसके प्रत्येक चरण में लक्षणानुसार मगण, भगण, नगण, तगण, तगण, तथा दो गुरु वर्ण हैं। लक्षण—'मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्।' इसमें चतुर्थ, षष्ठ, सप्तम वर्ण पर यति होती है।

टिप्पणी—(१) तपोवन (आश्रम) का हाथी रथ को देखकर भड़क गया और तेजी से भागने लगा। एक पेड़ की डाल की टक्कर से टूटे दाँत को बिना निकाले ही शाखा सहित भागा जा रहा है। भागते समय उसके पैरों में लतायें फँसी हैं और वह उनको खींचता जाता है। इससे पैरों में लताओं की बेड़ी-सी बन गयी है। (२) तपस्वी डर गये हैं कि इससे तपस्या में विघ्न होगा।

(सर्वाः कर्णं दत्वा किञ्चदिव सम्भ्रान्ताः)

[सभी (मुनिकन्यायें) कान लगाकर (अर्थात् सुनकर) कुछ घबड़ा सी जाती हैं।]

राजा—(आत्मगतम्) **अहो धिक्। पौरा अस्मदन्वेषिणस्तपोवनमुपरुन्धन्ति। भवतु। प्रतिगमिष्यामस्तावत्।**

व्याकरण—उपरुन्धन्ति - उप+रुध+लट्+प्र०पु०बहु वचन। प्रतिगमिष्यामः - प्रति+गम+लृट्+उ०पु ०ब०व०।

राजा—(अपने मन में) ओह, धिक्कार है। नगरवासी मुझे खोजते हुए तपोवन को घेर रहे हैं। अच्छा, तो मै लौट जाता हूँ।

सख्यौ—आर्य, अनेनारण्यकवृत्तान्तेन पर्याकुलाः स्मः। अनुजानीहि न उटजगमनाय। (अज्ज, इमिणा आरण्णअवुत्तन्तेण पज्जाउला म्ह। अणुजाणीहि णो उडअगमणस्स।)

व्याकरण—पर्याकुलः - परितः आकुलाः प्रादिसमास। अनुजानीहि - अनु+ज्ञा+लोट्+म०पु०एक वचन।

दोनों सखियाँ—आर्य, हम लोग इस जङ्गली हाथी (आरण्यक) के वृत्तान्त से घबड़ा गयी हैं। हमें कुटी (उटज) पर जाने की अनुमति दीजिये।

राजा—(ससम्भ्रमम्) **गच्छन्तु भवत्यः। वयमप्याश्रमपीडा यथा न भवति तथा प्रयतिष्यामहे।** (सर्व उत्तिष्ठन्ति)।

व्याकरण—आश्रमपीडा - आश्रमस्य पीडा (ष०त०), प्रयतिष्यामहे - प्र+यत्+लृट्+उ०पु०ब०व०।

राजा—(घबराहट के साथ) आप लोग जाइये। हम भी ऐसा प्रयत्न करेंगे, जिससे आश्रम को कष्ट न हो। (सभी लोग उठ जाते हैं)।

सख्यौ—आर्य, असम्भावितातिथिसत्कारं भूयोऽपि प्रेक्षणनिमित्तं लज्जामह आर्यं विज्ञापयितुम् । (अज्ज, असंभाविदादिहिसक्कारं भूओ वि पेक्खणणिमित्तं लज्जेमो अज्जं विण्णविदुं ।)

व्याकरण एवं शब्दार्थ—असम्भावित: अप्रापित: अतिथिसत्कार: यस्य स: तम् = जिसका अतिथिसत्कार नहीं किया गया है ऐसे व्यक्ति (दुष्यन्त) को। प्रेक्षणनिमित्तम् – दर्शनार्थम् – दर्शन के लिये। विज्ञापयितुम् – निवेदयितुम् ।

दोनों सखियाँ—आर्य, आपका अतिथि-सत्कार नहीं किया जा सका – ऐसे आप से पुन: दर्शन देने के लिये निवेदन करने में हम लोग लज्जित हो रही हैं।

राजा—मा मैवम् । दर्शनैनैव भवतीनां पुरस्कृतोऽस्मि ।

व्याकरण एवं शब्दार्थ—पुरस्कृत: – पुरस्+कृ+क्त: – सत्कृत: ।

राजा—नहीं, ऐसा न (कहिये)। आप लोगों के दर्शन से ही मैं सत्कृत हो गया हूँ।

शकुन्तला—अनसूये, अभिनवकुशसूच्या परिक्षतं मे चरणं कुरबकशाखापरिलग्नं च वल्कलम् । तावत् परिपालयत मां यावदेतन्मोचयामि । (अणसूये, अहिणअकुससूईए परिक्खदं मे चलणं कुरवअसाहापरिलग्गं अ वक्कलं। दाव परिपालेध मं जाव णं मोआवेमि।) (शकुन्तला राजानमवलकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता)।

व्याकरण एवं शब्दार्थ—अभिनवकुशसूच्या – अभिनवस्य नवजातस्य कुशस्य सूची तया (स०त०) – नये कुशों की नोकों से। **कुरबकशाखापरिलग्नं** – कुरबकस्य शाखायां परिलग्नम् तत्पुरुषसमास – कुरबक की डाल में फँसा हुआ। यह पद 'वल्कलवस्त्रम्' का विशेषण है। परिपालयत – परि+पाल+णिच्+लट् म०पु० बहु वचन – प्रतीक्षा करो। मोचयामि – मुच+णिच्+उ०पु०ए०व० – छुड़ाती हूँ।

शकुन्तला—अनसूया, नये कुशों की नोक से मेरा पैर क्षत (घायल) हो गया है और मेरा वल्कलवस्त्र कुरबक की डाल में फँस गया है। (मैं) जब तक इसको छुड़ाती हूँ तब तक मेरी प्रतीक्षा करो। (शकुन्तला राजा को देखती हुई, बहाने से देर कर सखियों के साथ निकल जाती है)।

राजा—मन्दौत्सुक्योऽस्मि नगरगमनं प्रति । यावदनुयात्रिकान् समेत्य नातिदूरे तपोवनस्य निवेशयेयम् । न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्तयितुम् । मम हि—

व्याकरण एवं शब्दार्थ—मन्दौत्सुक्य: – मन्दं स्वल्पीकृतम् औसुक्यम् – 'उत्साहो यस्य तादृश:। यह पद दुष्यन्त का विशेषण है। **अनुयात्रिकान्** – अनुयायिन: = अनुयायियों को। **निवेशयेयम्** – नि+विश्+उ०पु०ए०व०।

राजा— नगर में जाने के प्रति मेरी उत्सुकता मन्द पड़ गयी है (अर्थात् नगर की ओर जाने में मेरी उत्सुकता समाप्त हो गयी है)। तो अपने अनुयायियों से मिलकर उन्हें आश्रम से कुछ दूरी पर ठहराता हूँ। मैं अपने को शकुन्तला के प्रेम-व्यापार से रोकने में असमर्थ हूँ। क्योंकि—

गच्छति पुर: शरीरं धावति पश्चादसंस्तुतं चेत: ।
चीनांशुकमिव केतो: प्रतिवातं नीयमानस्य ।। ३३ ।।

(इति निष्क्रान्ता: सर्वे)।

अन्वय—शरीरं पुरः गच्छति, चेतः असंस्तुतं प्रतिवातं नीयमानस्य केतोः चीनांशुकम् इव पश्चात् धावति।

शब्दार्थ—शरीरम् = शरीर। पुरः = आगे की ओर। गच्छति = जा रहा है। चेतः = चित्त (मन)। असंस्तुतम् = अपरिचित (सा)। प्रतिवातं = वायु के प्रतिकूल। नीयमानस्य = ले जाये जाते हुये। केतोः = ध्वजा के। चीनांकुशम् इव = चीनी वस्त्र (रेशमी वस्त्र) की भाँति। पश्चात् = पीछे की ओर। धावति = दौड़ रहा है।

अनुवाद—(मेरा) शरीर (तो) आगे (अपने अनुयायियों) की ओर जा रहा है और (मेरा) मन (मुझसे) अपरिचित (पराया) सा (होकर) वायु के विपरीत ले जाये जाते हुए ध्वजा (ध्वजदण्ड) के चीनी-वस्त्र (रेशमी वस्त्र) की भाँति पीछे (शकुन्तला) की ओर दौड़ रहा है।

(सभी निकल जाते हैं)।

संस्कृत व्याख्या—मम शरीरम् – वपुः, **पुरः** – अग्रतः, अनुयात्रिकान् प्रति इति भावः, **गच्छति** – प्रयाति, किन्तु **चेतः** – हृदयम् , **असंस्तुतम्** – अपरिचितम् सत् , **प्रतिवातं** – वायुसम्मुखम् , **नीयमानस्य** – चाल्यमानस्य, **केतोः** – पताकायाः, **चीनांशुकम् इव** – चीनदेशोद्भवं पट्टवस्त्रम् इव, **पश्चात्** – पश्चात् दिशि, शकुन्तलाभिमुखम् इत्यर्थः, **धावति** – प्रयाति।

संस्कृत-सरलार्थः—शकुन्तलामपहाय सेनाभिमुखं गच्छन् दुष्यन्तः स्वदशाविषये चिन्तयति यन्मदीयमिदं कलेवरं यद्यप्यग्रे गच्छति किन्तु मे हृदयं शरीरेणापरिचितमिव तथैव शकुन्तलाम्प्रति पृष्ठे धावति यथा वायो प्रतिकूलमुह्यमानस्य ध्वजस्य दण्डोऽग्रे याति, परन्तु चीनांशुकं (ध्वजक्षौमवस्त्रम्) पृष्ठ उड्डीयते। शरीरं मेऽग्रे मन्दं मन्दं याति परन्तु चित्तं वेगेन पृष्ठे (शकुन्तलाम्प्रति) धावतीति भावः।

व्याकरण—प्रतिवातम् – प्रतिगतं वातस्य यथास्यात्तथा वातस्य प्रतिकूलम् (अव्ययीभावः) = वायु के प्रतिकूल। **चीनांशुकम्** – चीनस्य अंशुकम् (तत्पु०)। नीयमानस्य – णी+यक्+शानच्+ष०ए०व०। यह 'केतोः' का विशेषण है। **असंस्तुतम्** – सम्+स्तु+क्त = संस्तुतम्; न संस्तुतम् असंस्तुतम्।

अलङ्कार—(१) शरीर और मन का परस्पर सम्बन्ध रहने पर भी **'गच्छति पुरः शरीरम्'** तथा **'चेतः पश्चाद् धावति'** इन दोनों वाक्यों द्वारा शरीर एवं मन में असम्बन्ध दिखाया गया है, अतः यहाँ **अतिशयोक्ति** (सम्बन्धों में असम्बन्ध रूप) है। अतिशयोक्ति का लक्षण विश्वनाथ के अनुसार निम्नाङ्कित है– 'सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते' —सा०द०, अर्थात् 'उपमेय' का निगरण (अधःकरण) कर उसके साथ उपमान की अभेद प्रतीति को 'अध्यवसाय' कहा जाता है। अतिशयोक्ति का व्युत्पत्तिलभ्य अर्थ है – अतिशयिता प्रसिद्धिमतिक्रान्ता उक्तिरिति – अतिशयोक्तिः। यह अतिशयोक्ति ५ प्रकार की होती है—(१) भेद में अभेदवर्णना (२) सम्बन्ध में असम्बन्धवर्णना (३) अभेद में भेदवर्णना (४) असम्बन्ध में सम्बन्धवर्णना (५) कार्यकारणभाव-नियम की विपर्यय वर्णना। यहाँ **सम्बन्ध में असम्बन्ध वर्णना रूप** 'अतिशयोक्ति' है। (२)

'चीनांशुक'०– यहाँ पर '**उपमा**' अलङ्कार है। 'चेतः' उपमेय है 'चीनांशुक' उपमान, 'इव' वाचक शब्द है और 'प्रतिकूल' गमन साधारण धर्म है। (३) 'असंस्तुतं चेतः' में गम्योत्प्रेक्षा है क्योंकि यहाँ 'इव' 'मन्ये' आदि के कथन के बिना चित्त की अस्थिरता की सम्भावना की गयी है।

छन्द—उक्त पद्य '**आर्या**' छन्द में निबद्ध है।

टिप्पणी—(१) इस श्लोक से भी महाकवि कालिदास की मनोवैज्ञानिक विदग्धता का ज्ञान होता है। यद्यपि राजा दुष्यन्त आरण्यक का वृत्तान्त सुनकर अपने अनुयायियों (सैनिकों आदि) की ओर प्रस्थान कर देता है परन्तु उसका मन शकुन्तला में आसक्त होने के कारण पीछे ही दौड़ता है। जैसे कोई 'ध्वजदण्ड' लेकर जब प्रतिकूल हवा में आगे बढ़ता है तो ध्वजदण्ड तो आगे जाता है परन्तु ध्वजा का चीनांशुक (पताका) आगे न जाकर पीछे जाता (उड़ता) है। अर्थात् जिस दिशा से वायु बहता है उस दिशा की ओर ध्वज-दण्ड तो ले जाया जा सकता है, परन्तु ध्वज दण्ड की पताका को आगे ले जाना सम्भव नहीं है। वह तो सामने न जाकर पीछे की ओर ही उड़ती है। उसी प्रकार ध्वज-दण्ड के समान राजा का शरीर तो उनके अधीन होने से सैनिकों-अनुयायियों की ओर जा रहा है परन्तु पताका के समान उनका मन उनके अधीन होने के कारण उनके शरीर के साथ आगे नहीं जा रहा है। इसका सारांश यह है कि राजा दुष्यन्त का चित्त शकुन्तला में आसक्त हो चुका है। अब वह उनके वश में नहीं है। (२) श्लोक में प्रयुक्त कतिपय शब्दों पर भी ध्यान देना आवश्यक है। यद्यपि राजा का मन (चित्त) उसका है पर वह शकुन्तला की प्रेम-सरिता में सर्वांशतः अवगाहन करने के कारण उनके लिये '**असंस्तुत**' (अपरिचित) सा हो गया है। यहाँ 'चेतः' के विशेषण के रूप में प्रयुक्त '**असंस्तुत**' पद उल्लेखनीय है। इसी प्रकार शरीर के साथ '**गच्छति**' एवं चेतः के साथ '**धावति**' इन क्रिया पदों का प्रयोग भी सारगर्भित है। शरीर आगे जा रहा है और चित्त पीछे दौड़ रहा है न कि जा रहा है। यहाँ '**गच्छति**' की अपेक्षा '**धावति**' की व्यञ्जना आपाततः महनीय है। (३) **निष्क्रान्ताः सर्वे** – प्रथम अङ्क के अन्त में सभी पात्र रङ्गमञ्च से बाहर चले जाते हैं। अङ्क के नेपथ्य में तपोवन के रक्षार्थ तपस्वियों का आह्वान इसलिये किया गया है क्योंकि रथों के घोड़ों के पैरों से उड़ायी गयी धूलि तपोवन के वृक्षों पर छा रही है और रथ को देखकर भयभीत हाथी आश्रम में ही प्रवेश कर रहा है। राजा अपने मन में यह अनुमान लगा लेता है कि '**उसे खोजते हुये नागरिक (सैनिक) तपोवन को घेर रहे हैं।** नाट्याचार्यों के विधानानुसार रङ्गमञ्च पर जिन-जिन वस्तुओं (घटनाओं) का प्रत्यक्ष प्रदर्शन निषिद्ध किया गया है उनमें संरोध (अवरोध) भी है। इसी विधान के अनुसार यहाँ अवरोध (घेराव) का प्रत्यक्ष प्रदर्शन नहीं किया गया है, अपितु नेपथ्य से उसकी सूचना दी गयी है और रङ्गमञ्च से सभी पात्रों का निर्गमन दिखाया गया है। दशरूपक के अनुसार रङ्गमञ्च पर निषिद्ध वस्तुओं का विवरण निम्नाङ्कित है— दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम्। संरोधं भोजनं स्नानं सुरतं चानुलेपनम् ॥ शस्त्रस्य ग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत्। द०रू०।

(४) **इति प्रथमोऽङ्कः** – नाट्यशास्त्रीय ग्रन्थों के विधानानुसार रूपकों का विभाजन अङ्कों में किया जाता है। जैसे 'शाकुन्तल' का विभाजन सात अङ्कों में किया गया है। 'अङ्क' नाट्यशास्त्र का पारिभाषिक शब्द है। अङ्क का लक्षण निम्नाङ्कित है—

यदा तु सरसं वस्तु मूलादेव प्रवर्तते। आदावेव तदङ्कः स्यादामुखाक्षेपसंश्रयः।
प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः। अङ्को नानाप्रकारार्थसंविधानरसाश्रयः॥

।। इति प्रथमोऽङ्कः ।।

॥ प्रथम अङ्क समाप्त

♦

द्वितीयोऽङ्कः

(ततः प्रविशति विषण्णो विदूषकः)

[तदनन्तर खिन्न (उदास) विदूषक प्रवेश करता है]

विदूषकः—(निःश्वस्य) **भो दिष्टम् । एतस्य मृगयाशीलस्य राज्ञोः वयस्यभावेन निर्विण्णोऽस्मि । अयं मृगोऽयं वराहोऽयं शार्दूल इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजिष्वाहिण्ड्यते-ऽटवीतोऽटवी । पत्रसङ्करकषायाणि कदुष्णानि गिरिनदीजलानि पीयन्ते । अनियतवेलं शूल्यमांसभूयिष्ठ आहारो भुज्यते । तुरगानुधावनकण्डितसन्धेः रात्रावपि निकामं शयितव्यं नास्ति । ततो महत्येव प्रत्यूषे दास्याः पुत्रैः शकुनिलुब्धकैर्वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि । इयतेदानीमपि पीडा न निष्क्रामति । ततो गण्डस्योपरि पिण्डकः संवृत्तः । ह्यः किलास्मास्वहीनेषु तत्रभवतो मृगानुसारेणाश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला ममाधन्यतया दर्शिता । साम्प्रतं नगरगमनाय मनः कथमपि न करोति । अद्यापि तस्य तामेव चिन्तयतोऽक्ष्णोः प्रभातमासीत् । का गतिः । यावत्तं कृताचारपरिक्रमं पश्यामि ।** (इति परिक्रम्यावलोक्य च) **एष बाणासनहस्ताभिः वनपुष्पमालाधारिणीभिर्यवनीभिः परिवृत इत एवागच्छति प्रियवयस्यः । भवतु । अङ्गभङ्गविकल इव भूत्वा स्थास्यामि । यद्येवमपि नाम विश्रामं लभेय ।**

(भो दिट्ठं । एदस्स मअआसिलस्स रण्णो वअस्सभावेण णिव्विणो म्हि । अअं मओ अअं वराहो अअ सद्दूलो त्ति मज्झण्णे वि गिम्हविरलपाअवच्छाआसु वणराईसु अहिण्डोअदि अडवीदो अडवी। पत्तसंकरकसाआइं कदुण्हाइं गिरिणइजलाइं पीअन्ति। अणिअदवेलं सुल्लमंसभूयिट्ठो आहारो अण्हीअदि । तुरगाणुधावणकण्डिसन्धिणो रत्तिम्मि वि णिकामं सइदव्वं णत्थि । तदो महन्ते एव्व पच्चूसे दासीएपुत्तेहिं सउणिलुद्धएहिं वणग्गहणकोहाहलेण पडिबोधिदो म्हि । एत्तएण दाणिं वि पीडा ण ण्क्किमदि । तदो गण्डस्य उवरि पिण्डको संवुत्तो । हिओ किल अह्मेसुं ओहीणेसु तत्तहोदो मआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउन्दला मम अधण्णदाए दंसिदा। संपदं णअरगमणस्स मणं कहं वि ण करोदि । अज्ज वि से तं एव्व चिन्तअन्तस्स अच्छीसु पभादं आसि। का गदी। जाव णं किदाचारपरिक्कमं पेक्खमि। एसो बाणासणहत्थी हि वणपुप्फमालाहारी हि जवनीहि परिवुदो इदो एव्व आअच्छदि पिअवअस्सो । होदु । अङ्गभङ्गविअलो पिअ भविअ चिट्ठिस्सं। जइ एव्वं वि णाम विस्समं लहेअं ।) (इति दण्डकाष्ठमवलम्ब स्थितः) ।

व्या० एवं श० —विषण्णः – वि+सद्+क्त = खिन्न (उदास)। यह पद विदूषक का विशेषण है । **निर्विण्णः** – निर्+विद्+क्त, 'निर्विण्णस्योपसंख्यानम्' वार्तिक से 'द्' को न् एवं णत्व = खिन्न, दुःखी । मध्याह्ने – अह्नः मध्यं तस्मिन् = दोपहर में । **ग्रीष्मविरलपादपच्छायासु** – पादपानां छाया पादपच्छायम् ग्रीष्मेण विरलं पादपच्छायं यासु (ब०ब्री०) = विरली वृक्षछाया वाले । यह पद 'वनराजिषु' का विशेषण है । **वनराजिषु** – वनानां राजिषु (ष०त०) = वन श्रेणियों में, वनप्रदेशों में । 'वीथ्यालिरावलिः पंक्तिः श्रेणी लेखास्तु राजयः' – इत्यमरः । **आहिण्ड्यते** – आ+हिण्ड्+त्यक् (कर्मवाच्य) प्र०पु०ए०व० = जाया जाता है (घूमना पड़ता है)। **अटवीतः** – अटन्ति अत्र अटवी अट्+अवि+ङीप् = अटवी+तसिल् = अटवीतः (एक) वन से । 'अटव्याख्यं

संस्कृत व्याख्या—**शिलायां** – प्रस्तरखण्डे, **तस्याः** – शकुन्तलायाः, **शरीरलुलिता** – शरीरेण सन्तप्तदेहेन लुलिता मर्दिता, **इयम्** – एषा, **पुष्पमयी शय्या** – पुष्परचिता शय्या, **नलिनीपत्रे** – कमलिनीपत्रे, **नखैः** – कररुहैः, **अर्पितः** – लिखितः, **एषः** – अयम् , **क्लान्तः** – म्लानः, **मन्मथलेखः** – कामपत्रम् , **हस्तात्** – करात् , **भ्रष्टं** – पतितम् , **इदम्** – एतत् , **बिसाभरणं** – मृणालवलयम् , **इति** – एतेषु पदार्थेषु, **आसज्यमानेक्षणः** संलग्ननेत्रः (अहम्), **शून्यात् अपि** – प्रियतमाविरहितात् अपि, **वेतसगृहात्** – वेतसलतामण्डपात्, **सहसा** – अकस्मात् , **निर्गन्तुं** – बहिर्यातुम् , **न शक्नोमि** – न समर्थोऽस्मि।

संस्कृत-सरलार्थः—शकुन्तलाविहीनं लतागृहं गत्वा तद्भुक्तानि वस्तूनि समवलोक्य राजा चिन्तयति—'अस्मिन् शिलाखण्डे शकुन्तलासन्तप्तदेहेन परिमर्दिता पुष्पविरचितैषा शय्या परिदृश्यते, कमलिनीपत्रे नखलिखितं प्रणयपत्रमिदमवलोक्यते तथा विरहकार्श्यवशात्तद्हस्तात्पति पुरोदृश्यमानं मृणालवलयमस्ति। प्रियोपभुक्तेषु वस्तुस्वेषु संलग्ननयनोऽहं प्रियतमाविरहितादपि वेतसलतामण्डपात् अकस्माद् बहिर्गन्तु न प्रभवामीति।

व्याकरण—शरीरलुलिता – शरीरेण लुलिता (तत्पु०)। पुष्पमयी – पुष्प+मयट्+ङीप्। नलिनीपत्रे – नलिन्याः पत्रे (तत्पु०)। मन्मथलेखः – मन्मथस्य लेखः (तत्पु०)। आसज्यमानेक्षणः – आसज्यमाने ईक्षणे यस्य सः (बहु०)।

अलङ्कार—(१) लतागृह से दुष्यन्त के न जाने का कारण '**आसज्यमानेक्षणः**' है अतः यहाँ पदार्थहेतुक '**काव्यलिङ्ग**' अलङ्कार है। लक्षण द्र० १।४ । (२) शकुन्तला के अभाव में लतागृह शून्य है अतः शून्य रूप कारण के होने पर भी दुष्यन्त का निर्गमन रूप कार्य के न होने से '**विशेषोक्ति** है। लक्षण – **विशेषोक्तिरखण्डेषु कारणेषु फलावचः –का०प्र०** अर्थात् सम्पूर्ण कारणों के रहने पर भी फल (कार्य) का न रहना विशेषोक्ति है। (३) इस लतागृह में शकुन्तला का उपस्थिति रूप कारण नहीं है फिर भी राजा का वहाँ उपस्थितिरूप कार्य हो रहा है। अतः कारण के न रहने पर भी कार्य का वर्णन होने से '**विभावना**' अलङ्कार है। लक्षण द्र० १।१८ श्लोक।

छन्द—'**शार्दूलविक्रीडित**' छन्द है। लक्षण द्र० १।१४ श्लोक।

टिप्पणी—(१) यहाँ '**पश्चात्ताप**' नामक नाटकीय अलङ्कार है। (२) चतुर्थ चरण में प्रेमाधिक्य को प्रदर्शित करने वाली विशेष बात कहने से **पुष्प** नामक प्रतिमुख सन्धि का अङ्ग है। लक्षण – 'पुष्पं विशेषवचनं मतम्'। (३) प्रेम के क्षेत्र में प्रेमी-प्रेमिका द्वारा उपभुक्त (प्रयुक्त) वस्तुयें भी एक दूसरे को आनन्द देती हैं और उनके लगाव का कारण बनती हैं। यहाँ दुष्यन्त की प्रेमिका शकुन्तला की अनुपस्थिति में भी उसकी शय्या आदि दुष्यन्त के विशेष लगाव की कारण हैं।

(आकाशे) **राजन्** , (आकाश में) हे राजन् ,

सायन्तने सवनकर्मणि सम्प्रवृत्ते
वेदिं हुताशनवतीं परितः प्रयस्ताः।
छायाश्चरन्ति बहुधा भयमादधानाः।

सन्ध्यापयोदकपिशाः पिशिताशनानाम् ।। २४ ।।

अन्वय—सायन्तने सवनकर्मणि सम्प्रवृत्ते हुताशनवतीं वेदिं परितः प्रयस्ताः सन्ध्यापयोदकपिशाः भयम् आदधानाः पिशिताशनानां छायाः बहुधाः चरन्ति।

शब्दार्थ—सायन्तने = सायंकालिक। सवनकर्मणि = यज्ञ-कर्म के। सम्प्रवृत्ते = प्रारम्भ होने पर। हुताशनवतीं = अग्नि से युक्त। वेदिं = यज्ञ-वेदी के। परितः = चारों ओर। प्रयस्ताः = व्याप्त (फैली हुई)। सन्ध्यापयोदकपिशाः = सायंकालिक बादलों के समान कपिश (लाल-काली)। भयम् = भय को। आदधानाः = धारण (उत्पन्न) करने वाली। पिशिताशनानाम् = कच्चे मांस का आहार करने वाले (राक्षसों) की। छायाः = छाया। बहुधाः = बहुत (अनेक) प्रकार से (विविध रूपों में)। चरन्ति = विचरण कर रही हैं (इधर-उधर चक्कर लगा रही हैं)।

अनुवाद—सायंकालीन यज्ञ-कर्म के प्रारम्भ होने पर अग्नि से युक्त यज्ञ-वेदी के चारों ओर व्याप्त (फैली हुई), सायंकालिक बादलों के समान लाल-काली और भय को उत्पन्न करने वाली, कच्चे मांस का आहार करने वाले राक्षसों की छाया अनेक प्रकार से (विविध रूपों में) विचरण कर रही हैं।

संस्कृत व्याख्या—सायन्तने – सायंकालिके, सवनकर्मणि – यज्ञकर्मणि, अग्निहोत्रे इत्यर्थः, सम्प्रवृत्ते – सम्यक् प्रारब्धे सति, हुताशनवतीम् – अग्नियुक्ताम् , वेदिं – यज्ञवेदिम्, परितः – वेद्याः समन्तात्, प्रयस्ताः – व्याप्ताः, सन्ध्यापयोदकपिशाः – सायंकालिकमेघवत् कृष्णरक्ताः, भयं – भीतिम् , आदधानाः – कुर्वाणाः, पिशिताशनानां – राक्षसानाम् , छायाः – प्रतिबिम्बानि, बहुधा-अनेकधाः, चरन्ति – इतस्ततः भ्रमन्ति।

संस्कृत-सरलार्थः—सायङ्कालिके यज्ञकर्मणि प्रारब्धे सति पावकमयीं यज्ञवेदिं परितो विक्षिप्ता भयोत्पादिकाः सन्ध्याकालिकमेघवत् कृष्णरक्ता राक्षसानां छाया अनेकवारमितस्ततः परिभ्रमन्तीति भावः।

व्याकरण—सायन्तने – सायं भवं सायन्तनम् तस्मिन् सायन्तने सायम्+ट्यु (अन)+तुट् विभक्तिकार्य। सम्प्रवृत्ते – सम्+प्र+वृत्+क्त सप्तमीविभक्ति। सवनकर्मणि – सवनस्य (यज्ञस्य) कर्मणि (तत्पु०)। सम्प्रवृत्ते – सम्+प्र+वृत+क्त। हुताशनवतीम् – अश्नातीति अशनः हुतस्य अशनः हुताशनः – हुताशन+मतुप्+ङीप्। वेदिं परितः परितः के योग में 'अभितः परितः' वार्तिक से द्वितीया। प्रयस्ताः – प्र+यस्+क्त प्र०पु०ब०व०। सन्ध्यापयोदकपिशाः – सन्ध्यापयोदा इव कपिशाः (उपमित समास)। आदधानाः – आ+धा+शानच् स्त्रीलिङ्ग प्र०ब०व०।

कोष—'सवनं यजनं स्नाने' – इति विश्वः 'छाया स्यादातपाभावे सच्छोभापङ्क्तिषु स्मृता' – इति विश्वः।

रस—यहाँ राक्षसों की भयङ्कर छाया के वर्णन से 'भयानक रस' है।

अलङ्कार—(१) यहाँ 'भयमादधानाः' का कारण राक्षसों की छाया है अतः **'काव्यलिङ्ग'** अलङ्कार है। लक्षण द्र० १।४ श्लोक। (२) 'सन्ध्यापयोदकपिशाः' सन्ध्यापयोदा इव कपिशा में समासगा वाचक लुप्ता **'उपमा'** अलङ्कार है। उपमेयभूत सन्ध्या, उपमानभूत पयोद (मेघ) और साधारण धर्म कपिशवर्णता युक्त है पर उपमावाचक (वत् – इव) आदि लुप्त है। (३) श्लोक में भय (भयमादधानाः) का कारण चारों ओर फैली हुई राक्षसों की छाया (वेदीं हुताशनवतीं परितः प्रयस्ताः छायाः) है, अतः **'काव्यलिङ्ग'** अलङ्कार है। लक्षण द्र० १।४। (४) यहाँ छेक, वृत्ति –

श्रुति अनुप्रास की भी स्थिति है।

छन्द—श्लोक '**वसन्ततिलका**' छन्द है। लक्षण द्र० १।८ श्लोक।

राजा—अयमहमागच्छामि । (इति निष्क्रान्तः)।

राजा—यह मैं (अभी) आता हूँ। (निकल जाता है)।

टिप्पणी—(१) **आकाशे** – इसे नाट्यशास्त्रीय ग्रन्थों में '**आकाशभाषित**' कहते हैं। लक्षण द्र०प्र० अंक, विष्कम्भक के बाद टिप्पणी। आकाशभाषित के द्वारा महत्त्वपूर्ण सूचनायें दी जाती हैं। इसके द्वारा महर्षि कण्व की अनुपस्थिति में राक्षसों द्वारा यज्ञकर्म में विघ्न के उपस्थित होने को दृष्टिगत कर राजा दुष्यन्त से यज्ञ की रक्षा का आह्वान किया गया है। (२) 'अयमहमागच्छामि' राजा के इस कथन से राजा की धीरोदात्तता और वीरता प्रकाशित हो रही है। (३) यहाँ '**त्रोटक**' नामक गर्भ सन्धि का अङ्ग है। लक्षण – 'त्रोटकं पुनः संरब्धवाक्' ।

।। इति तृतीयोऽङ्कः ।।

।। तृतीय अङ्क समाप्त ।।

◆

चतुर्थोऽङ्कः

(ततः प्रविशतः कुसुमावचयं नाटयन्त्यौ सख्यौ)

(तत्पश्चात् फूल चुनने का अभिनय करती हुयी दोनों सखियाँ प्रवेश करती हैं)।

व्या० एवं श०—कुसुमावचयम् – कुसुमानामवचयम् (अव+चि+अच्) = फूलों का चुनना। व्याकरण की दृष्टि से 'अवचय' यह पद अशुद्ध है। यहाँ 'हस्तादाने चेरस्तेये' सूत्र से 'चि' धातु से 'घञ्' होकर 'अवचाय' बनता है। कालिदास ने 'मालविकाग्निमित्र' में भी 'कुसुमावचयव्यग्रहस्ता' यह प्रयोग किया है। **नाटयन्त्यौ** – अभिनयन्त्यौ = अभिनय करती हुयी।

विशेष—चतुर्थ अङ्क की विशेषता आदि के लिये द्रष्टव्य भूमिका पृ० ३७-४२।

अनसूया—हला प्रियंवदे, यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तलाऽनुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयम् तथाप्येतावच्चिन्तनीयम्। (हला पिअंवदे, जइ वि गन्धव्वेण विहिणा णिव्वुत्तकल्लाणा सउन्दला अणुरूवभत्तुगामिणी संवुत्तेति णिव्वुदं मे हिअअं। तह वि एतिअं चिन्तणिज्जं।)

व्या० एवं श०—'गान्धर्वेण विवाहेन' – द्रष्टव्य – तृ०अं० के श्लो० २० की टिप्पणी। निर्वृत्तकल्याणा –निर्वृत्तं (निर+वृत्+क्त) निष्पन्नं कल्याणं मङ्गलं (मनोरथ-सिद्धिः) यस्याः सा (ब०व्री०) = सम्पन्न हो गया है विवाहरूप मङ्गल (मनोरथ-सिद्धि) जिसका ऐसी। यह पद 'शकुन्तला' इस पद का विशेषण है। अनुरूपभर्तृगामिनी – अनुरूपं योग्यं पतिं गच्छति (या) सा (अनुरूप+भर्तृ+गम+णिनि+ङीप्) अपने अनुरूप (योग्य) पति को पाने वाली। संवृत्ता – सम्+वृत्+क्त+टाप् = हो गयी है। निर्वृतम् – निर्+वृ+क्त = आनन्दित (प्रसन्न) (है)।

अनसूया—सखी प्रियंवदा, गान्धर्व (विवाह) विधि से सम्पन्न (विवाह रूप) कल्याण (मङ्गल कार्य) वाली शकुन्तला यद्यपि अपने योग्य पति से सङ्गत हो गयी है (अर्थात् अपने योग्य पति को पा गयी है)। इसलिये मेरा हृदय आनन्दित (प्रसन्न) है, तथापि इतनी सी बात विचारणीय है।

प्रियंवदा—कथमिव ? (कहं विअ ?)

प्रियंवदा—कौन-सी ?

अनसूया—अद्य स राजर्षिरिष्टिं परिसमाप्यर्षिभिर्विसर्जित आत्मनो नगरं प्रविश्यान्तःपुरसमागत इतोगतं वृत्तान्तं स्मरति वा न वेति।

(अज्ज सो राएसी इट्ठिं परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं पविसिअ अन्तेउरसमागदो इदोगदं वुत्तन्तं सुमिरदि वा ण वेति।)

व्या० एवं श०—राजर्षिरिष्टिम् = राजर्षिः+इष्टिम् (यज्+क्तिन्) = यज्ञ को। परिसमाप्य – परि+सम्+आप्+त्तवा+ल्यप् = समाप्त (सम्पन्न) कर। विसर्जितः – वि+सृज्+क्त – (राजधानी गमनाय) अनुज्ञातः = (राजधानी जाने के लिये ऋषियों द्वारा) छोड़ा गया (बिदा किया गया)। प्रविश्य – प्र+विश्+त्तवा – ल्यप् = प्रवेश कर। इतो गतम् = यहाँ घटित (यहाँ के विवाहादि)। वृत्तान्तम् = बात को।

अनसूया—आज वह राजर्षि (दुष्यन्त) यज्ञ को समाप्त करने के बाद ऋषियों द्वारा विदा किये जाने पर (जब) अपने नगर में प्रवेश करेगा तब अन्तःपुर की स्त्रियों से मिलने के बाद यहाँ के वृतान्त (विवाह आदि की बात) को याद करेगा या नहीं ?

प्रियंवदा—विस्रब्धा भव। न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति। तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति। (वीसद्धा होहि। ण तढिसा आकिदिविसेसा गुणविरोहिणो होन्ति। तादो दाणि इमं वुत्तन्तं सुणिअ अ आणे किं पडिवज्जिस्सदि त्ति।)

व्याकरण एवं शब्दार्थ—विस्रब्धा - वि+स्रम्भ्+क्त+टाप् = विश्वस्ता (निःशङ्का)। आकृतिविशेषाः - आकृतीनां विशेषाः (तत्पु०) = सुन्दर आकृति वाले। गुणविरोधिनः = गुणविरोधी (निर्गुण-गुणहीन)। प्रतिपत्स्यते - प्रति+पद्+लृट् प्र०पु०ए०व० = करेंगे (सोचेंगे)।

टिप्पणी—(१) 'यत्राकृतिस्तत्र गुणा वसन्ति' बृहत्संहिता के इस वचन के अनुसार सुन्दर व्यक्ति गुणहीन नहीं होता। (२) 'अग्नि पुराण' में भी कहा गया है—'यत्राकारस्ततो गुणाः'। (३) इसी प्रकार मृच्छकटिक में भी कहा गया है—'न ह्याकृतिः सुसदृशं विजहाति वृत्तम्'।

प्रियंवदा—विश्वस्त (निश्चिन्त) रहो। उस प्रकार की विशिष्ट (सुन्दर) आकृतियाँ गुणों से रहित नहीं होती हैं। पिता (कण्व) इस समाचार को सुनकर न जाने क्या करेंगे ? (अर्थात् शकुन्तला के गान्धर्व विवाह का अनुमोदन करेंगे, अथवा नहीं - यह बात विचाारणीय है।)

विशेष—राघवभट्ट के अनुसार यहाँ चतुर्थ अङ्क के प्रारम्भ से लेकर पञ्चम अङ्क के श्लोक १८ के बाद 'इति यथोक्तं करोति' तक **गर्भसन्धि** है। विश्वनाथ के अनुसार यहाँ से लेकर सप्तम अङ्क में शकुन्तला के पहचानने तक **'विमर्शसन्धि'** है। उनके मतानुसार तृतीय अङ्क के **'स्निग्धजनसंविभक्तम्'** इस वाक्य से लेकर तृतीय अङ्क की समाप्ति तक **'गर्भसन्धि'** है।

अनसूया—यथाऽहं पश्यामि, तथा तस्यानुमतं भवेत्। (जह अहं देक्खामि, तह तस्स अणुमदं भवे।)

अनसूया—जैसा मैं समझती हूँ, वैसा (यह) उनको अनुमत (स्वीकृत) होगा (अर्थात् वे इस विवाह का अनुमोदन कर देगें)।

प्रियंवदा—कथमिव ? (कहं विअ ?)

प्रियंवदा—कैसे ?

अनसूया—गुणवते कन्यका प्रतिपादनीयेत्ययं तावत् प्रथमः सङ्कल्पः। तं यदि दैवमेव सम्पादयति नन्वप्रयासेन कृतार्थो गुरुजनः। (गुणवदे कण्णआ पडिवादणिज्जे त्ति अअं दाव पढमो संकप्पो। तं जइ देव्वं एव्व संपादेदि णं अप्पआसेण किदत्थो गुरूअणो।)

व्याकरण एवं शब्दार्थ—गुणवते - गुणाः सन्ति अस्य - गुण+मतुप् च०ए०व० = गुणवान् को। प्रतिपादनीया - प्रति+पद्+णिच्+अनीयर+टाप् = देनी चाहिये।

अनसूया—गुणवान् व्यक्ति को कन्या देनी चाहिये - यह (माता-पिता का) पहला सङ्कल्प (दृढ़ विचार) होता है। उसको यदि भाग्य ही सम्पन्न (पूरा) कर देता है, तब तो गुरुजन (माता-पिता) बिना प्रयास के ही कृतकृत्य हो गये।

प्रियंवदा—(पुष्पभाजनं विलोक्य) **सखि, अवचितानि बलिकर्मपर्याप्तानि कुसुमानि।** (सहि, अवइदाइं बलिकम्मपज्जत्ताइं कुसुमाइं)।

प्रियंवदा—(पुष्पों के पात्र (टोकरी) को देखकर) सखी, पूजा-कार्य (बलिकर्म) के लिये पर्याप्त पुष्प चुन लिये गये।

अनसूया—ननु सख्याः शकुन्तलायाः सौभाग्यदेवताऽर्चनीया। (णं सहिए सउन्दलाए सोहग्गदेवआ अच्चणीआ।)

व्या० एवं श०—सौभाग्यदेवता = विवाह-देवता। अर्चनीया – अर्च+अनीयर+टाप् = पूजनीय है।

अनसूया—किन्तु सखी शकुन्तला के सौभाग्य (विवाह) देवता की पूजा करनी है।

प्रियंवदा—युज्यते। (जुज्जदि।) (इति तदेव कर्माभिनयतः)।

प्रियंवदा—ठीक है। (फिर उसी कार्य (अर्थात् पुष्प चुनने) का अभिनय करती हैं)।

(नेपथ्ये) **अयमहं भोः।**

(नेपथ्य में) यह मैं (आया) हूँ।

अनसूया—(कर्णं दत्त्वा) **सखि, अतिथीनामिव निवेदितम्।** (सहि; अदिधीणं विअ णिवेदिदं।)

अनसूया—सखी, (किसी) अतिथि का वचन (कथन) है (अर्थात् ऐसा लग रहा है कि कोई अतिथि पुकार रहा है)।

प्रियंवदा—ननूटजसन्निहिता शकुन्तला। (णं उडजसण्णिहिदा सउन्दला।)

व्याकरण एवं शब्दार्थ—उटजसन्निहिता – उटजे सन्निहिता उपस्थिता। सन्निहिता – सम्+नि+धा+क्त+टाप् = (कुटीरे) कुटिया में उपस्थित।

प्रियंवदा—शकुन्तला तो कुटी पर उपस्थित है ही।

अनसूया—अद्य पुनर्हृदयेनासन्निहिता। अलमेतावद्भिः कुसुमैः। (अज्ज उण हिअएण असण्णिहिदा। अलं एत्तिएहिं कुसुमेहिं।) (इति प्रस्थिते)।

अनसूया—किन्तु आज (वह) हृदय से अनुपस्थित है (अर्थात् आज उसका मन कहीं अन्यत्र लगा है)। इतने ही पुष्प (पूजा के लिये) पर्याप्त हैं। (दोनों चल देती हैं)।

(नेपथ्ये) **आः, अतिथिपरिभाविनि,**

व्याकरण एवं शब्दार्थ—अतिथिपरिभाविनि – अतिथिं परिभावयति तिरस्करोतीति – अतिथिपरिभाविनी तत्सम्बुद्धौ – अतिथिपरिभाविनि ! = अतिथि का तिरस्कार करने वाली।

(नेपथ्य में) अरे, अतिथि का तिरस्कार करने वाली,

विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति, त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव।। १।।

अन्वय—अनन्यमानसा यं विचिन्तयन्ती उपस्थितं तपोधनं मां न वेत्सि, सः प्रमत्तः प्रथमं कृतां कथाम् इव बोधितः सन् अपि त्वां न स्मरिष्यति।

शब्दार्थ—अनन्यमानसा = केवल एक ही ओर लगे हुये मन वाली (एकाग्र मन वाली)। यम् = जिसको। विचिन्तयन्ती = सोचती हुई। उपस्थितम् = उपस्थित (आये हुए)। तपोधनम् = तप रूपी धन वाले (तपस्वी)। माम् = मुझको। न = नहीं। वेत्सि = जान पा रही हो (देख पा रही हो)। सः = वह। प्रमत्तः = उन्मत्त। प्रथमम् = पहले। कृताम् = की गयी (कही गयी)। कथाम् इव = बात

की भाँति। बोधितः सन् = याद दिलाये जाने पर। अपि = भी। त्वाम् = तुमको। न = नहीं। स्मरिष्यति = स्मरण (याद) करेगा।

अनुवाद—एकाग्रचित्तवाली (किसी व्यक्ति विशेष पर आसक्त चित्तवाली) जिसका चिन्तन करती हुई (यहाँ) उपस्थित मुझ तपस्वी को नहीं जान (देख) पा रही हो, वह (तेरे द्वारा) स्मरण दिलाये जाने पर भी तुमको (उसी प्रकार) स्मरण नहीं करेगा (जिस प्रकार) उन्मत्त (व्यक्ति) पहले की गयी (कही गयी) बात को (स्मरण नहीं करता है)।

संस्कृत व्याख्या—अनन्यमानसा – एकाग्रचित्ता (सती) यं जनम् , **विचिन्तयन्ती** – ध्यायन्ती, **उपस्थितम्** – (अत्र) आगतम् , **तपोधनं** – तपोनिधिम् , **मां** दुर्वाससम् , **न** – नहि, **वेत्सि** – जानासि, **सः** – जनः, **प्रमत्तः** – उन्मत्तः, **प्रथमं** – पूर्वम् , **कृताम्** – अभिहिताम् , **कथाम् इव** – वार्ताम् इव, **बोधितः सन् अपि** – स्मारितः सन् अपि, **त्वां** – शकुन्तलाम् , **न** – नहि, **स्मरिष्यति** – अभिज्ञास्यति।

संस्कृत-सरलार्थः—अनन्यमानसा यं जनं (दुष्यन्तं) ध्यायन्ती समक्षमागतं तपस्विनं मां (दुर्वाससम्) न हि जानीसे, सः (दुष्यन्तः) पूर्वसम्पादितं विवाहादिवृत्तान्तं स्मारितोऽपि तथैव न स्मरिष्यति यथा कश्चिन्मत्तो (बोधितोऽपि सन्) पूर्ववृत्तान्तं न स्मरति)।

व्याकरण—अनन्यमानसा – न अन्यत् अवलम्बनम् यस्य तत् अनन्यम् अनन्यं मानसं यस्याः सा (ब०ब्री०)। विचिन्तयन्ती – वि+चिन्त्+णिच् (स्वार्थे) शतृ+ङीप्। तपोधनम् – तप एव धनं यस्य सः (ब०ब्री०) तम्। प्रमत्तः – प्र+मद्+क्त। स्मरिष्यति = स्मृ+लृट् + प्र०पु०ए०व०। बोधितः – बुध+णिच्+क्त।

कोष—'आस्तु कोपपीडयोः' इत्यमरः।

रस-भाव—यहाँ दुर्वासा के क्रोध का भाव व्यञ्जित है।

अलङ्कार—(१) यहाँ पूर्वार्द्ध विस्मरण रूपी कार्य का कारण है अतः **'काव्यलिङ्ग'** अलङ्कार है। द्र०ल० १/४ श्लो०। (२) 'माम्' का 'तपोधनम्' यह विशेषण साभिप्राय है अतः **'परिकर'** अलङ्कार है। द्र०ल० १/२६ श्लो०। (३) यहाँ 'कथां प्रमत्तः प्रथमं कृतामिव' में श्रौती **'पूर्णोपमा'** अलङ्कार है। दुष्यन्त का उपमान प्रमत्त, शकुन्तला का उपमान कथा है तथा 'इव' वाचक शब्द है। ल०द्र० १/५ श्लो०। (४) 'कथां प्रमत्तः प्रथमं कृतामिव' में श्लिष्ट अर्थ होने से **'श्लेष'** है। ल०द्र० २/७ श्लो०।

छन्द—श्लोक में **'वंशस्थ'** छन्द है। ल०द्र० १/१८ श्लो०।

टिप्पणी—(१) 'अतिथि देवो भव' इस वैदिक निर्देश के अनुपालन में महर्षि कण्व द्वारा अतिथिसत्कार के लिये नियोजित शकुन्तला की अतिथि दुर्वासा के प्रति अनवधानता एक अपराध है। यही कर्त्तव्य के प्रति अनवधानता रूप अपराध ही उनके क्रोधमूलक शाप का कारण है। दुष्यन्त के प्रति शकुन्तला की आसक्ति उनके शाप का कारण नहीं है। (२) मूल कथा में शाप की चर्चा नहीं है। यह कालिदास की सोद्देश्य परिकल्पना है। विशेष जानकारी के लिये द्रष्टव्य भूमिका पृ० २७-२९। शाप की परिकल्पना से दुष्यन्त के चरित्र का परिष्कार किया गया है। (३) इसी शाप की परिकल्पना से पञ्चम अङ्क में दुष्यन्त के दरबार में शाप-प्रभावित दुष्यन्त के द्वारा शकुन्तला का न पहचाना जाना सङ्गत होता है और आगे की कथा साधार बनती है। शापाभाव में पञ्चम अङ्क में ही दुष्यन्त-शकुन्तला-मिलन हो जाता और आगे की कथा के लिये कोई अवसर न

रह जाता। (४) 'कथां प्रमत्तः प्रथमं कृतामिव' का औपम्यविधान अत्यन्त सटीक एवं सार्थक है। जैसे प्रमत्त (शराबी व्यक्ति) याद दिलाये जाने पर भी पहले की गयी – कही गयी – बात को स्मरण दिलाने पर भी नही समझ पाता, उसी प्रकार शकुन्तला का चिन्तनीय (अभीष्ट) व्यक्ति भी उसके घटित घटना का स्मरण नही कर पायेगा।

प्रियंवदा—हा धिक्, हा धिक् । अप्रियमेव संवृत्तम् । कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला । (पुरोऽवलोक्य) **न खलु यस्मिन् कस्मिन्नपि । एष दुर्वासाः सुलभकोपो महर्षिः । तथा शप्त्वा वेगबलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्तः ।** (हद्धी, हद्धी। अप्पिअं एव्वं संवुत्तं। कस्सिं पि पूआरुहे अवरद्धा सुण्णहिअआ सउन्दला। ण हु जस्सिं कस्सिं पि। एसो दुव्वासो सुलहकोवो महेसी। तह सविअ वेअबलुप्फुल्लाए दुव्वाराए गईए पडिणिवुत्ती।)

व्या० एवं श०—अप्रियम् = अशुभ-अनर्थ। पूजार्हे – पूजामर्हति – इति पूजार्हः (पूजा+अर्ह+अच्) तस्मिन् पूजार्हे = पूजनीय व्यक्ति के प्रति। अपराद्धा – अप्+राध्+क्त+टाप् = अपराधिनी-अपराधयुक्त। शून्यहृदया – शून्यं हृदयं यस्याः सा = शून्य हृदय वाली-अन्यमनस्क। अवलोक्य – अव्+लोक्+क्त्वा –ल्यप् = देखकर। सुलभ कोपः – सुलभः कोपः यस्य सः (ब०ब्री०) = सुलभ कोप वाले-अति क्रोधी। शप्त्वा – शप्+क्त्वा = शाप देकर। वेगबलोत्फुल्लया – वेगस्य बलं तेन उत्फुल्ला तया (तृ०त०) = वेग के बल से युक्त अर्थात् अति तीव्र। दुर्वारया = अनिवारणीय। ये दोनों पद 'गत्या' पद के विशेषण हैं। प्रतिनिवृत्तः – प्रति+नि+वृत्+क्त = लौट गये। संवृत्तम् – सम्+वृत्+क्त = हो गया।

प्रियंवदा—हाय धिक्कार है, हाय धिक्कार है। अनर्थ (अप्रिय) ही हो गया। किसी पूज्नीय व्यक्ति के प्रति (दुष्यन्त के चिन्तन में आसक्त होने के कारण) शून्य हृदयवाली शकुन्तला ने अपराध कर दिया है। (सामने देखकर) जिस किसी (साधारण व्यक्ति) के प्रति ही (अपराध नहीं किया)। ये सहजतः क्रुद्ध हो जाने वाले महर्षि दुर्वासा हैं। इस प्रकार (शकुन्तला को) शाप देकर वेग के बल से युक्त (अर्थात् अत्यन्त तीव्र) और दुर्निवार्य गति से लौटे जा रहे हैं।

अनसूया—कोऽन्यो हुतवहाद् दग्धुं प्रभवति । गच्छ । पादयोः प्रणम्य निवर्तयैनं यावदहमर्घोदकमुपकल्पयामि । (को अण्णो हुदवहादो दहिदुंपहवदि। गच्छ। पादेसु पणमिअ णिवत्तेहि णं जाव अहं अग्घोदअं उवकप्पेमि।)

व्या० एवं श०—हुतवहात् – हुतम् हव्यम् (घृतादिकं द्रव्यम्) तस्य वहः तस्मात् = अग्नि के अतिरिक्त। दग्धुम् – दह्+तुमुन् = जलाने के लिये। प्रभवति = समर्थ है। प्रणम्य – प्र+नम्+क्त्वा–ल्यप् = प्रणाम कर। निवर्तय – नि+वृत्+णिच्+लोट् प्र०पु०ए०व० = लौटाओ। एनम् = उनको (दुर्वासा को)। निवर्तय एनम् – निवर्तयैनम् = वृद्धिसन्धि। अर्घोदकम् – अर्घश्च उदकं च तयोः समाहारः = अर्घ एवं जल को। उपकल्पयामि – उप+कल्प+णिच्+उ०पु०ए०व० = तैयार करती हूँ।

अनसूया—अग्नि के अतिरिक्त और कौन जलाने में समर्थ हो सकता है। जाओ, (उनके) चरणों में प्रणाम कर (पैरों पर गिरकर) इन्हें लौटा लाओ, जब तक मैं अर्घ और जल (पूजा का सामान) तैयार करती हूँ।

टिप्पणी—अर्घोदकम् – अर्घश्च उदकं च तयोः समाहारः – इसका अर्थ होता है – अर्घ और जल। इसमें आठ वस्तुयें होती हैं। वे हैं—जल, क्षीर (दूध), कुशाग्र, दधि, सर्पि (घी),

तण्डुल (चावल), यव तथा सिद्धार्थक। भारतीय संस्कृति में अतिथि के सत्कार की यह एक विधि है। पूज्य अतिथि को अर्घोदक देकर उसका सम्मान किया जाता था। देव पूजा के समय भी अर्घोदक दिया जाता है। कहीं-कहीं 'अर्घ' के स्थान पर 'अर्घ्य' यह पाठ है। अर्घ से यत् (अर्घ+यत्) लगाकर अर्घ्य बनता है।

प्रियंवदा—तथा (तह।) (इति निष्क्रान्ता)।

प्रियंवदा—(जैसा तुम कहती हो) वैसा (करती हूँ)। (यह कहकर निकल जाती है)।

अनसूया—(पदान्तरे स्खलितं निरूप्य) **अहो, आवेगस्खलितया गत्या प्रभ्रष्टं ममाग्रहस्तात् पुष्पभाजनम्।** (अम्मो, आवेअक्खलिदाए गईए पब्भट्ठं मे अग्गहत्थादो पुप्फभाअणं।) (इति पुष्पोच्चयं रूपयति)।

अनसूया—(कुछ पग चलने के बाद गिरने का अभिनय कर) ओह, आवेग (घबराहट) से लड़खड़ाती हुई चाल के कारण मेरे हाथ से फूल का पात्र (डलिया) गिर गया। (फूलों के उठाने का अभिनय करती है)।

(प्रविश्य) **प्रियंवदा—सखि, प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णति। किमपि पुनः सानुक्रोशः कृतः।** (सहि, पकिदिवक्को सो कस्स अणुणअं पडिगेण्हदि। किं वि उण साणुक्कोसो किदो।)

व्या० एवं श०—प्रकृतिवक्रः - प्रकृत्या वक्रः (तृ०त०) = स्वभाव से टेढ़े। प्रतिगृह्णाति - प्रति+ग्रह+लट्+प्र०पु०ए०व० = स्वीकार करते हैं। सानुक्रोशः - अनुक्रोशेन दयया सहितः = दयायुक्त।

(प्रवेश करके) **प्रियंवदा**—सखी, स्वभाव से टेढ़े वे (महर्षि दुर्वासा) किसकी प्रार्थना को स्वीकार करते (मानते) हैं ? फिर भी (मैने उन्हें) कुछ दयायुक्त कर लिया।

अनसूया—(सस्मितम्) **तस्मिन् बह्वेतदपि। कथय।** (तस्सिं बहु एदं पि। कहेहि।)

व्या० एवं श०—बह्वेतदपि - बहु+एतदपि-यण् दीजिये।

अनसूया—(मुस्कराते हुए) उस (दुर्वासा) के विषय में इतना भी बहुत है। बताओ (क्या हुआ) ?

प्रियंवदा—यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया। भगवन् प्रथम इति प्रेक्ष्याविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षयितव्य इति। (जदा णिवत्तिदुं ण इच्छदि तदा विण्णविदो मए। भवअं, पढ़म त्ति पेक्खिअ अविण्णादतवप्पहावस्स दुहिदुजणस्स भअवदा एक्को अवराहो मरिसिदब्बो त्ति।)

व्या० एवं श०—विज्ञापितः - वि+ज्ञा+णिच्+क्त = प्रार्थना की। अविज्ञाततपःप्रभावस्य - न विज्ञातः तपः प्रभावः येन सः तस्य (ब०ब्री०) = तप के प्रभाव को न जाननें वाली। दुहितृजनस्य = पुत्री (शकुन्तला) का। मर्षयितव्यः - मृश्+णिच्+तव्य = क्षमा कर देना चाहिये।

प्रियंवदा—जब लौटने की इच्छा नही किये (अर्थात् लौटने को तैयार नहीं हुये) तब मैने उनसे प्रार्थना की - 'भगवन् तप के प्रभाव को न जानने वाली पुत्रीजन (शकुन्तला) का यह पहला अपराध है - (यह समझकर) आप के द्वारा उसका यह एक अपराध क्षन्तव्य है (ये क्षमा कर दीजिये)।

अनसूया—ततस्ततः ? (तदो तदो ?)

अनसूया—तब, तब (क्या हुआ) ?

प्रियंवदा—ततो न मे वचनमन्यथाभवितुमर्हति, किन्त्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यत इति मन्त्रयमाण एवान्तर्हितः । (तदो ण मे वअणं अण्णहाभविदुं अरिहदि, किंदु अहिण्णाणाभरणदंसणेण सावो णिवत्तिस्सदि त्ति मन्तअन्तो एव्व अन्तरिहिदो ।)

व्या० एवं श०—अभिज्ञानाभरणदर्शनेन – अभिज्ञानरूपं यदाभरणं तस्य दर्शनेन = अभिज्ञान (पहचान) रूप आभूषण के देखने से । निवर्तिष्यते – नि+वृत्+लृट् प्र०पु०ए०व० = निवृत्त (समाप्त) हो जायेगा । मन्त्रयमाण – मन्त्र्+णिच्+लट्+शानच् प्र०पु०ए०व० = कहते हुये । अन्तर्हितः – अन्तर्+धा+क्त = अन्तर्हित (अदृश्य) हो गये ।

प्रियंवदा—तब 'मेरा वचन असत्य (अन्यथा) नहीं हो सकता, किन्तु पहचान (अभिज्ञान) के आभूषण को दिखाने से शाप समाप्त हो जायेगा'—यह कहते हुए ही (वे) अदृश्य (अन्तर्हित) हो गये ।

अनसूया—शक्यमिदानीमाश्वसितुम् । अस्ति तेन राजर्षिणा सम्प्रस्थितेन स्वनामधेयाङ्कितमङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम् । तस्मिन् स्वाधीनोपाया शकुन्तला भविष्यति । (सक्कं दाणिं अस्ससिदुं अत्थि तेण राएसिणा संपत्थिदेण सणामहेअंकिअं अंगुलीअअं सुमरणीयं त्ति सअं पिणद्धं । तस्सिं साहीणोवाआ सउन्दला भविस्सदि ।)

व्या० एवं श०—शक्यम् – शक्+यत् = शक्य है । आश्वसितुम् – आ+श्वस्+तुमुन् = आश्वासन प्राप्त करना (धैर्य धारण करना) । सम्प्रस्थितेन – सम्+प्र+स्था+क्त-तृ०ए०व० = प्रस्थान करते हुये । स्वनामधेयाङ्कितम् – स्वस्य नामधेयेन अङ्कितम् = अपने नाम से अङ्कित । स्मरणीयम् – स्मृ+अनीयर् = स्मरण के योग्य – अर्थात् स्मृति चिह्न के रूप में । पिनद्धम् – अपि+नह+क्त (अपि के 'अ' का भागुरि के मतानुसार लोप) = पहनाया (था) । स्वाधीनोपाया – स्वाधीनः उपायः यस्याः सा = स्वतन्त्र उपायवाली (अर्थात् पहचान के लिये यह अंगूठी शकुन्तला के लिये उसके अधीन उपाय है) ।

अनसूया—अब (हम लोग) धैर्य-धारण के लिये समर्थ हैं (अर्थात् अब हम लोग धैर्य रख सकती हैं) । (अपनी राजधानी को) जाते हुये उस राजर्षि ने अपने नाम से अङ्कित अङ्गूठी स्मृति-चिन्ह के रूप में (शकुन्तला की अङ्गुली में) स्वयं पहनायी थी । शकुन्तला उस (अङ्गूठी) से स्वतन्त्र उपाय वाली होगी (अर्थात् उस अङ्गूठी से शकुन्तला शाप-मुक्त देने से पहचान ली जायेगी) ।

प्रियंवदा—सखि, एहि । देवकार्यं तावद् निर्वर्तयावः । (सहि, एहि । देवकज्जं द व णिव्वत्तेम्ह ।) (इति परिक्रामतः) ।

व्या० एवं श०—देवकार्यम् – दैवस्य कार्यम् – (ष०त०) देव कार्य को । निर्वर्तयावः – नि+वृत्+णिच्+उ०पु०पु०द्वि०व० = सम्पन्न (समाप्त) कर लें ।

प्रियंवदा—सखी आओ । तब तक देवकार्य (देव-पूजन) सम्पन्न कर लें । (दोनों घूमती हैं) ।

प्रियंवदा—(विलोक्य) **अनसूये, पश्य तावत् । वामहस्तोपहितवदनाऽऽ लिखितेव प्रियसखी । भर्तृगतया चिन्तयात्मानमपि नैषा विभावयति । किं पुनरागन्तुकम् ।** (अणसूए, पेक्ख दाव । वामहत्थोवहिदवअणा आलिहिदा विअ पिअसही भत्तुगदाए चिन्ताए अताणं पि ण एसा विभावेदि । किं उण आअन्तुअं) ।

व्या० एवं श०—वामहस्तोपहितवदना – वामहस्ते उपहितं वदनं यस्याः सा = जिसने बायें हाथ पर अपना मुख रख रखा है। यह प्रिय सखी (शकुन्तला) का विशेषण है। आलिखितेव – आलिखिता – इव (गुण सन्धि)। आ+लिख्+क्त+टाप् = चित्रित की भाँति। भर्तृगतया = पति से सम्बद्ध। विभावयति – वि+भू+णिच्+लट्+प्र०पु०ए०व० = समझ पा रही है।

प्रियंवदा—(देखकर) अनसूया, देखो तो। बायें हाथ पर मुँह रक्खी हुई प्रिय सखी (शकुन्तला) चित्रित-सी (बैठी हुई) है। पति सम्बन्धी चिन्ता से उसे अपनी भी सुध नहीं है (अर्थात् अपने को भी भूल गयी है)। फिर अतिथि की (बात ही) क्या ?

अनसूया—प्रियंवदे, द्वयोरेव नौ मुख एष वृत्तान्तस्तिष्ठतु। रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी। (पिअंवदे दुवेणं एव्व णो मुहे एसो वुत्तन्तो चिट्ठदु। रक्खिदव्वा क्खु पकिदिपेलवा पिअसही।)

व्या० एवं श०—नौ – आवयोः द्वयोरेव – हम दोनों में ही। मुखे – मुख में। नौ – आवयोः के स्थान पर (अस्मद्) शब्द का अन्वादेश। वृत्तान्तस्तिष्ठतु – यह वृत्तान्त रहे। तिष्ठतु – स्था+लोट्+प्र०पु०ए०व० = इस वाक्य का अभिप्राय यह है यह शाप का वृत्तान्त हम दोनों तक ही सीमित रहे। इसे शकुन्तला न जानने पावे। रक्षितव्या – रक्ष्+तव्यत्+टाप् = रक्षणीय है। प्रकृतिपेलवा – प्रकृत्या (स्वभावतः) पेलवा – कोमला = स्वभाव से कोमल।

अनसूया—प्रियंवदा, यह समाचार हम दोनों के मुख तक ही (सीमित) रहे। निश्चय ही स्वभाव से कोमल प्रियसखी (शकुन्तला) की रक्षा करनी चाहिये।

प्रियंवदा—को नामोष्णोदकेन नवमालिकां सिञ्चति। (को णाम उण्होदएणणोमालिअं सिंचेदि।) (इत्युभे निष्क्रान्ते)।

व्या० एवं श०—को नामोष्णोदकेन – कः+नाम्+उष्णोदकेन – उष्णं च तदुदकम् तेन = गर्म जल से।

प्रियंवदा—भला कौन नवमालिका (चमेली) को गर्म जल से सींचता है – **सींचेगा** (अर्थात् कोई नहीं)। (दोनों निकल जाती हैं)।

टिप्पणी—न मे वचनमन्यथा भवितुमर्हति – इसका भाव यह है कि दुर्वासा ने जो शाप दे दिया, वह अन्यथा (असत्य) नहीं हो सकता। लौकिक पुरुषों की वाणी अर्थ का अनुगमन करती है अर्थात् अर्थ के अनुरूप उनकी वाणी होती है परन्तु इसके विपरीत अलौकिक महापुरुषों-ऋषियों-मुनियों की वाणी का अर्थ अनुधावन करते हैं अर्थात् वे जैसा कह देते हैं अर्थ वैसा ही हो जाता है। अतः दुर्वासा जैसे सिद्ध ऋषि का शाप असत्य नहीं हो सकता। इस सन्दर्भ में भवभूति की यह उक्ति ध्यातव्य है—'लौकिकानां हि साधूनामर्थं वागनुवर्तते। ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥ उ०रा०च०। (२) **स्वनामधेयाङ्कितमङ्गुलीयकम्** – दुष्यन्त ने हस्तिनापुर प्रस्थान के पूर्व अपने नाम से अङ्कित अङ्गूठी शकुन्तला की अङ्गुलि में पहनायी थी और दुर्वासा के 'अभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यते' – इस वचनानुसार अङ्गूठी रूपी पहचान से उनका शाप मिटा था। पञ्चम अङ्क में तो उस अङ्गूठी को शकुन्तला न दिखा सकी थी परन्तु छठे अङ्क में धीवरों के द्वारा प्राप्त उस अङ्गूठी से राजा शाप-मुक्त होकर शकुन्तला के गान्धर्व-विवाह का स्मरण करने में समर्थ हुये थे। (३) **आत्मानमपि न विभावयति** – दुर्वासा के आगमन के समय शकुन्तला अपने पति दुष्यन्त की चिन्ता में इतनी मग्न थी कि वह अपनी सुध-बुध भी खो बैठी

थी। ऐसी दशा में वह दुर्वासा को कैसे जान सकती थी ? इस दृष्टि से वस्तुतः वह निरपराध थी। (४) **को नाम उष्णोदकेन नवमालिकां सिञ्चति** – नवमालिका (चमेली) का पौधा बहुत कोमल होता है। अतः वह जरा सी धूप में कुम्हला जाता है। यहाँ शकुन्तला की तुलना (कोमलता में) नवमालिका से की गयी है। जिस प्रकार नवमालिका को गर्म जल से कोई नहीं सींचता, उसी प्रकार हम प्रकृत्या कोमला शकुन्तला को गर्म जल के समान दुर्वासा के शाप का समाचार बताकर कैसी उसे पीड़ित कर सकती हैं ? यह प्रियंवदा के कहने का अभिप्राय है। यह वाक्य सूक्ति के रूप में मान्य है।

।। विष्कम्भकः ।।

।। विष्कम्भक समाप्त ।।

विष्कम्भक—इसके स्वरूप (लक्षण) आदि के विषय में तृतीय अङ्क का प्रारम्भ का भाग (प्रथम श्लोक के समीपस्थ) द्रष्टव्य है यहाँ दुर्वासा संस्कृत में तथा अनसूया एवं प्रियंवदा प्राकृत में बोलती हैं। सभी पात्र मध्यम श्रेणी के हैं।

(ततः प्रविशति सुप्तोत्थितः शिष्यः)

(तत्पश्चात् सोकर उठा हुआ शिष्य प्रवेश करता है)।

शिष्यः—वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन काश्यपेन। प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति। (परिक्रम्यावलोक्य च) **हन्त प्रभातम्। तथाहि—**

व्या० एवं श०—सुप्तोत्थितः – सुप्तं स्वापः तस्मादुत्थितः = सोकर उठा हुआ। अथवा आदौ सुप्तः पश्चादुत्थितः इति 'पूर्वकालैक...' – सूत्र से कर्मधारय समास। वेलोपलक्षणार्थम् – वेलायाः उपलक्षणार्थम् = बेला (समय) देखने (जानने) के लिये। आदिष्टः आ+दिश्+क्त = आदेश दिया गया है। उपावृत्तेन – उप+आ+वृत्+क्त–तृ०ए०व० = लौटे हुये। यह पद 'काश्यपेन' का विशेषण है। काश्यपेन – कण्व के द्वारा।

शिष्य—प्रवास से लौटे हुए आदरणीय कण्व के द्वारा समय को जानने के लिये मुझे आदेश दिया गया है। तो प्रकाश में निकलकर देखता हूँ कि रात का कितना (भाग) शेष है। (चारों ओर घूमकर और देखकर) प्रातःकाल हो गया है। क्योंकि—

> **यात्येकतोऽस्तशिखरं पतिरोषधीना-**
> **माविष्कृतोऽरुणपुरःसर एकतोऽर्कः।**
> **तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां**
> **लोको नियम्यत इवात्मदशान्तरेषु ।। २ ।।**

अन्वय—एकतः ओषधीनां पतिः अस्तशिखरं याति, एकतः अरुणपुरःसरः अर्कः आविष्कृतः, लोकः तेजोद्वयस्य युगपत् व्यसनोदयाभ्याम् आत्मदशान्तरेषु नियम्यते इव।

शब्दार्थ—एकतः = एक ओर। ओषधीनां पतिः = ओषधियों (वनस्पतियों) का स्वामी (चन्द्रमा)। अस्तशिखरम् = अस्ताचल के शिखर की ओर। याति = जा रहा है। एकतः = एक ओर। अरुणपुरःसरः = अरुण (नामक सारथि) आगे चलने वाला है जिसके ऐसा अरुण (नामक

अपने सारथि) को आगे किये हुये। अर्कः = सूर्य। आविष्कृतः = प्रकट (उदित) हो गया है। लोकः = संसार। तेजोद्वयस्य = दो (चन्द्र और सूर्य) तेजों के। युगपत् = एक साथ। व्यसनोदयाभ्याम् = अस्त एवं उदित होने से। आत्मदशान्तरेषु = अपनी विभिन्न (परिवर्तनीय) अवस्थाओं (दशाओं) के विषय में। नियम्यते इव = मानो नियमित किया जा रहा है (मानो उन्हें अपरिहार्य उत्थान-पतन के विषय में बताया जा रहा है)।

अनुवाद—एक ओर वनस्पतियों का स्वामी (चन्द्रमा) अस्ताचल के शिखर की ओर जा रहा है (अर्थात् अस्त हो रहा है)। (और) एक ओर (दूसरी ओर) अरुण (नामक अपने सारथि) को आगे किये हुये सूर्य प्रकट (उदित) हो रहा है। (इस प्रकार यह) संसार दो तेजों (चन्द्रमा और सूर्य) के एक साथ अस्त एवं उदित होने से अपनी अवस्थाओं (दशाओं) के परिवर्तित होने के विषय में मानों नियन्त्रित (नियमित) किया जा रहा है (अर्थात् संसार को अपरिहार्य उत्थानपतन के विषय में बताया जा रहा है)।

संस्कृत व्याख्या—एकतः – एकस्यां दिशि, पश्चिमदिग्भागे इत्यर्थः, **ओषधीनां पतिः** – ओषधीशः चन्द्रः, **अस्तशिखरम्** – अस्ताचलस्य शृङ्गं, **याति** – गच्छति, **एकतः** – एकस्यां दिशि, पूर्वदिग्भागे इत्यर्थः, **अरुणपुरःसरः** – अरुणः गरुडाग्रजः पुरःसरः अग्रगामी यस्यः सः, **अर्कः** – सूर्यः, **आविष्कृतः** – आत्मानं प्रकाशयितुमारभते, प्रादुर्भूतः इत्यर्थः, **लोकः** – संसारः, **तेजोद्वयस्य** – चन्द्रसूर्ययोः, **युगपत्** – समकालम् , **व्यसनोदयाभ्याम्** – अस्तोदयगमनाभ्याम्। विपत्सम्पद्भ्यां, **आत्मदशान्तरेषु** – सुखदुःखात्मकावस्थाविशेषेषु, **नियम्यते इव** – शिक्ष्यते इव। स्वस्वविपत्तिसम्पत्तिदशानां परिवर्तने केनापि दुःखहर्षौ न कार्यौ – इतिभावः।

संस्कृत-सरलार्थः—आसन्ने प्रभाते पश्चिमदिग्भागे चन्द्रोऽस्ताचलं याति पूर्वदिग्भागे च सूर्यः प्रादुर्भवति। इत्थं समकालमेव चन्द्रस्य पतनरूपविपत्त्या तथा सूर्यस्योदयरूपसम्पत्त्या च लोकस्य कृते शिक्षेयं प्रदीयते यत् सर्वषामेवेत्थं क्षयोदयौ स्तः। न कोऽपि चिरस्थायीति। अतः सम्पत्तौ हर्षो, विपत्तौ च शोको न कार्यो।

व्याकरण—एकतः – एक+तसिल् (सप्तम्यर्थे), ओषधिः ओषः पाकः दीप्तिर्वा धीयते अस्यामिति – ओष+धा+किम तासां पतिः ष०त०। अस्तशिखरम् – अस्तस्य शिखरम् (ष०त०)। आविष्कृतः – आविष्+कृ+क्त। अरुणपुरःसरः – अरुणः पुरः सरः यस्य (ब्र०व्री०), पुरःसरः – पुरः सरतीति पुरःसरः पुरष्+सृ+ट। अर्कः अर्च्यते इति अर्कः – 'अर्क' स्तवने अथवा 'अर्च' पूजायाम् धातु से घञ्। युगपद्व्यसनोदयाभ्याम् – व्यसनं (वि+अस्+ल्युट् भावे) च उदयश्च इति व्यसनोदयौ (द्वन्द्व) युगपत यौ व्यसनोदयौ ताभ्याम्। आत्मदशारन्तेषु – आत्मनः दशानाम् अन्तराणि (तत्पु०) तेषु। नियम्यते – नि+यम्+यक् – कर्मवाच्य प्र०पु०ए०व० आत्मनेपद।

कोष—'अस्तस्तु चरमक्ष्माभृतः' इत्यमरः। 'विधुः सुधांशुः शुभ्रांशुरोषधीशो निशां पतिः' – इत्यमरः। 'सूर्यसुतोऽरुणोऽनुरूःकाश्यपिर्गरुडाग्रजः' इत्यमरः। 'व्यसनं विपदि भ्रंशे' – इत्यमरः। 'उदयः सम्पदुत्पत्त्योः पूर्वशैले समुन्नतौ' – इत्यमरः। 'लोकस्तु भुवने जने' – इत्यमरः। 'अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ' – इति मेदिनी। 'दशावस्थादीषत्यों' – इति मेदिनी।

अलङ्कार—(१) चन्द्र एवं सूर्य में दो सज्जन व्यक्तियों का आरोप होने से **समासोक्ति** अलङ्कार है। ल०द्र० १/२३ श्लोक। (२) प्रभातवर्णन में चन्द्र और सूर्य – इन दोनों के प्रस्तुत होने के कारण **तुल्ययोगिता** अलङ्कार है। ल०द्र० ३/१७ श्लो०। चन्द्र एवं सूर्य का क्रमशः

व्यसन (विपत्ति) उदय (सम्पत्ति) – 'व्यसनोदयाभ्याम्' (प्रथमचरण में चन्द्र व्यसन तथा द्वितीयचरण में सूर्य का उदय वर्णित है) से सम्बन्ध होने से **यथासंख्य** अलङ्कार है। (३) 'नियम्यते इव' में **उत्प्रेक्षा** अलङ्कार है। ल०द्र० १/१८ श्लो०। यहाँ 'इव' उत्प्रेक्षा बोधक है। चन्द्रमा एवं सूर्य के क्रमशः व्यसन (विपत्ति) एवं उदय (सम्पत्ति) से संसार में लोगों की अपरिहार्य विपत्ति-सम्पत्ति की शिक्षा की सम्भावना की गयी है।

छन्द—श्लोक में **'वसंततिलका'** छन्द है। ल०द्र० १/८ श्लोक।

टिप्पणी—(१) **अरुणपुरःसरः** – सूर्य के सारथि 'अरुण' के अन्य नाम हैं—सूर्य-सूत, काश्यपि, गरुडाग्रज तथा अनूरु। सूर्य के सारथि होने से 'सूर्यसूत', कश्यप के पुत्र होने से 'काश्यपि' गरुड के बड़े भाई होने से 'गरुडाग्रज' और जंघाविहीन होने से 'अनूरु' कहे जाते हैं। पौराणिक कथा के अनुसार अरुण के पिता कश्यप तथा माता विनता हैं। इनके बड़े भाई का नाम गरुड है, जिन्हें 'वैंनतेय' नाम से भी जाना जाता है। प्रसव के लिए निर्धारित समय से पहले माता द्वारा अण्डा फोड़ कर निकाल दिये जाने के कारण ये जंघाविहीन हैं, इसीलिये इन्हें 'अनूरु' (नास्ति अरू यस्य अनूरुः) कहा जाता है। सूर्य अपने सारथि अरुण को आगेकर उदित होते हैं। फलतः अरुणोदय पहले होता है तदन्तर सूर्योदय। (२) वेद में भी **चन्द्र** (सोम) को ओषधियों का पति कहा जाता है—सोम ओषधीनां पतिः। 'ओषधीश' चन्द्र का एक नाम है। **ओषधि** शब्द वनस्पतिमात्र के लिये प्रयुक्त होता है। चन्द्र की किरणों से वनस्पतियों (ओषधियों) का विकास होता है। (३) **लोको नियम्यत इव** – प्रातः काल में एक ही साथ चन्द्रमा अस्ताचल को जाता है और सूर्य उदयाचल पर आरूढ़ होता है अर्थात् चन्द्रमा का पतन तथा सूर्य का उत्थान होता है। जो चन्द्रमा रात में अपने विकास को प्राप्त था, वही अब प्रातः काल में प्रभाविहीन होकर विपत्तिग्रस्त हो रहा है। इसके विपरीत रात में जो सूर्य निष्प्रभ होकर विपन्न हो गया था, अब प्रातः काल में वही उदयाचल पर आरूढ़ होकर उत्थान (अभ्युदय) को प्राप्त हो रहा है। चन्द्रमा एवं सूर्य के क्रमशः पतन तथा उत्थान से संसार में लोगों को मानो यह शिक्षा मिल रही है कि सभी प्राणियों का उत्थान और पतन (सम्पत्ति और विपत्ति) अवश्यम्भावी है। समय बलवान् होता है वह उन्नत को अवनत और अवनत को उन्नत बनाता रहता है। अतः सम्पत्ति में हर्ष एवं विपत्ति में शोक नही करना चाहिये। इस सन्दर्भ में मेघदूत की 'कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा' यह उक्ति तथा माघ का 'समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम्' यह कथन ध्येय है। (४) यहाँ अपने पक्ष की पुष्टि के लिये दृष्टान्त देने से **'दृष्टान्त'** नामक नाटकीय लक्षण है। 'दृष्टान्त' का लक्षण है – 'दृष्टान्तो यातु पक्षार्थसाधनाय निदर्शनम्'। यहाँ शापवृत्तान्त से (प्रसन्न) दुष्यन्त की अवनत दशा भी सूच्य है।

अपि च—

और भी—

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि ।। ३ ।।

अन्वय—शशिनि अन्तर्हिते सा एव कुमुद्वती संस्मरणीयशोभा (सती) मे दृष्टिं न

नन्दयति, नूनम् अबलाजनस्य इष्टप्रवासजनितानि दुःखानि अतिमात्रसुदुःसहानि।

शब्दार्थ—शशिनि = चन्द्रमा के। अन्तर्हिते = अस्त हो जाने पर। सा एव = वही। कुमुद्वती = कुमुदिनी। संस्मरणीयशोभा = जिसकी शोभा (अब केवल) स्मरणीय (स्मरण का विषय) रह गयी है ऐसी (स्मरणीय (नष्ट) शोभा वाली)। मे = मेरी। दृष्टिं = दृष्टि को (नेत्रों को)। न = नहीं। नन्दयति = आनन्दित कर रही है। नूनम् = निश्चय ही। अबलाजनस्य = स्त्री-समुदाय का। इष्टप्रवासजनितानि = प्रियतम के प्रवास (परदेश-गमन) से उत्पन्न। दुःखानि = दुःख। अतिमात्रसुदुःसहानि = अत्यधिक कठिनाई से सहने योग्य (अत्यन्त असह्य)। भवन्ति = होते हैं।

अनुवाद—चन्द्रमा के अस्त हो जाने पर (छिप जाने पर) स्मरणीय (नष्ट) शोभा वाली (अर्थात् शोभाविहीन) होने से वही कुमुदिनी सम्प्रति मेरी दृष्टि को आनन्दित नहीं कर रही है। निश्चय ही स्त्री-समाज के लिये अपने इष्ट व्यक्ति के प्रवास से उत्पन्न दुःख अत्यन्त असह्य होते हैं।

संस्कृत व्याख्या—**शशिनि**- चन्द्रे, **अन्तर्हिते** - अस्तं गते सति, **सा एव** - सा एव (मनोहारिणी कुमुदिनी) सम्प्रति, **संस्मरणीयशोभा** - संस्मरणीया सम्यक् स्मरणार्हा शोभा सौन्दर्यं यस्याः सा, विनष्टशोभा (शोभाविहीना) सती, **मे** - मम (कण्वशिष्यस्य), **दृष्टिं** - नेत्रम् , **न** - नहि, **नन्दयति** - हर्षयति; **नूनं** - निश्चितम् , **अबलाजनस्य** - प्रमदालोकस्य, **इष्टप्रवासजनितानि** - इष्टस्य वल्लभस्य प्रवासेन देशान्तरगमनेन जनितानि उत्पन्नानि, **दुःखानि** - कष्टानि, **अतिमात्रसुदुःसहानि** - अत्यधिकम् असह्यानि, भवन्ति इति शेषः।

संस्कृत-सरलार्थः—प्रभाते चन्द्रेऽस्तं गते सति म्लानिमापन्नां कुमुदिनीमवलोक्य कथयतः कण्वशिष्यस्याम - भिप्रायोऽस्ति यद् रात्रौ प्रभातकालात्पूर्वं चन्द्रे प्रकाशमाने या कुमुदिनी विकसितकुसुमा नयानानन्दायिनी आसीत्, सा इदानीं तस्मिन् (चन्द्रे) अस्तंगते क्षीणशोभा सती मम नेत्रं न समाह्लदयति। निःसन्दिग्धमिदं तथ्यं यत् कामिनीलोकस्य प्रियजनप्रवासोत्पन्नानि कष्टानि नितान्तमसह्यानि जायन्ते। स्वाप्रियवियोगेऽबलानां दुःखं स्वभाविकमेव।

व्याकरण—अन्तर्हिते - अन्तर्+धा+क्त स०ए०व०। 'धा' के स्थान में 'हि' आदेश हुआ है। शशिनि - शशः कलङ्कः अस्यास्तीति शशी (शश+इन्) तस्मिन्। कुमुद्वती - कुमुद+मतुप् (म् को व्) +ङीप्। संस्मरणीयशोभा - संस्मरणीया शोभा यस्याः सा (ब०ब्री०)। इष्टप्रवासजनितानि - इष्टस्य प्रवासः (प्र+वस्+घञ्) - इष्टप्रवासः तेन जनितानि (त०स०)। अतिमात्रसुदुःसहानि - अतिमात्रं सुदुःसहानि (प्रा०स०), सु+दुस्+सह+खल् न०प्र०व०।

कोष—'शोभा कान्तिः द्युतिश्छविः' - इत्यमरः।

अलङ्कार—(१) यहाँ चन्द्र और कुमुद्वती पर लिङ्ग के आधार पर क्रमशः दुष्यन्त (नायक) एवं शकुन्तला (नायिका) के व्यवहार का आरोप होने से **'समासोक्ति'** अलङ्कार है। ल०द्र० १/२३ श्लो०। (२) कुमुदिनी का शोभाविहीन होना **'संस्मरणीयशोभा'** नेत्र को अच्छा न लगने - 'दृष्टिं न नन्दयति' का कारण है अतः **काव्यलिङ्ग** है। ल०द्र० १/४ श्लो०। (३) पूर्वार्धगत विशेष का उत्तरार्धगत सामान्य से समर्थन होने के कारण **अर्थान्तरन्यास** है। ल०द्र० १/२ श्लो०। (४) श्लोक में छेक, वृत्ति, श्रुति अनुप्रास की भी स्थिति है।

छन्द—श्लोक में **वसन्ततिलका** छन्द है। ल०द्र० १/८ श्लोक।

टिप्पणी—(१) यहाँ 'शकुन्तला को शीघ्र दुष्यन्त के पास भेजना चाहिये' इस गूढ़ अर्थ

के व्यङ्ग्य होने से प्रस्थानसूचक तृतीय **पताकास्थानक** है। उसका लक्षण है—अर्थोपक्षेपणं यत्र न गूढं सविनयं भवेत्। श्लिष्टा प्रत्युत्तरोपेतं तृतीयं तन्मतम्। मातृगुप्ताचार्य। यहाँ समासोक्ति द्वारा प्रयुक्त **पताकास्थानक** है। (२) **अन्तर्हिते सैव कुमुद्वती** – कुमुदिनी चन्द्रोदय होने पर खिलती है और उसके अस्त होने पर मुरझा जाती है। वह अपनी विकासावस्था में ही दर्शकों के नत्रों को आनन्दित करती है। मुरझाने पर वह नेत्रों को आनन्द नहीं देती। नायक रूप चन्द्र एवं नायिका रूप कुमुदिनी के वर्णन से यह तथ्य प्रकाश में लाया गया है कि प्रमदायें अपने प्रियतम की संयोगावस्था में आनन्दित होती हैं और वियोगावस्था में अत्यन्त दुःखी हो जाती हैं। यहाँ चन्द्र से दुष्यन्त और कुमुदिनी से, शकुन्तला की ओर सङ्केत है। चन्द्र के वियोग में कुमुदिनी की भाँति दुष्यन्त के वियोग में शकुन्तला अत्यन्त दुःखी है, इस तथ्य का उद्घाटन किया गया है। निश्चय ही इस वर्णन से शकुन्तला की व्यञ्जित व्यथा के प्रति सबकी सहानुभूति प्राप्त होती है। यह भी अर्थ विचार्य है कि नायक चन्द्र यद्यपि सकलङ्क है फिर भी कुमुदिनी उसके लिये म्लान हो रही है। इसी प्रकार नायक दुष्यन्त भी सकलङ्क है, किन्तु शकुन्तला उसके लिये विकल है।

(प्रविश्यापटीक्षेपेण)

(बिना पर्दा उठाये हाथ से पर्दा हटाने के साथ प्रवेश करके)

व्या० एवं श०—पट्याः क्षेपः पटीक्षेपः न पटीक्षेपः = पर्दा उठाये बिना, केवल एक ओर पर्दा को झटका देकर। प्रविश्य – प्र+विश्+क्त्वा – ल्यप् = प्रवेश कर। सहसा किसी बात की सूचना देने के लिये पात्र पर्दे को झटका देकर सहसा रङ्गमञ्च पर आता है। राघवभट्ट ने अपटी का अर्थ पर्दा माना है और अर्थ किया है पर्दा हटाये बिना। कोष में अपटी का अर्थ पर्दा होता है— 'अपटी काण्डपटीकाप्रतिसीरा जवनिका तिरस्कारिणी' इति हलायुधः।

अनसूया—यद्यपि नाम विषयपराङ्मुखस्य जनस्यैतन्न विदितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम्। (जइ वि णाम विसअपरम्मुहस्स जणस्स एदं ण विदिअं तह वि तेण रण्णा सउन्दलाए अणज्जं आअरिदं।)

व्या० एवं श०—विषयपराङ्मुखस्य – विषयाः भोक्तव्याः स्रक्चन्दनवनितादयः अर्थाः तेभ्यः पराङ्मुखस्य = (सांसारिक) विषयों (योग्य अर्थों) से विमुख। अनार्यम् – न आर्यम् अनार्यम् (न०त०) = अश्रेष्ठ-(अशिष्ट, गर्हित)। आचरितम् – आ+चर्+क्त = (व्यवहार) किया गया।

अनसूया—यद्यपि (सांसारिक) विषयों से विमुख (हम जैसे) लोगों को यह (सब) ज्ञात नहीं है, तथापि (मेरी समझ से) उस राजा (दुष्यन्त) के द्वारा शकुन्तला के साथ (निश्चय ही) अशिष्ट (अभद्र) व्यवहार किया गया है।

शिष्य—यावदुपस्थितां होमवेलां गुरवे निवेदयामि। (इति निष्क्रान्तः)।

व्या० एवं श०—उपस्थिताम् – उप+स्था+क्त+टाप्+द्वि०प्र०व० = आयी। होमवेलाम् – होमस्य वेलाम् (स०त०) = हवन की बेला (समय) को। निवेदयामि – नि+विद्+णिच्+उ०पु०ए०व० = निवेदन करता हूँ।

शिष्य—तो (चलकर) गुरुजी से कहता हूँ कि हवन का समय हो गया है। (यह कह कर निकल जाता है)।

अनसूया—प्रतिबुद्धाऽपि किं करिष्यामि ? न मे उचितेष्वपि निजकराणीयेषु हस्तपादं

प्रसरति। काम इदानीं सकामो भवतु, येनासत्यसन्धे जने शुद्धहृदया सखी पदं कारिता। अथवा दुर्वाससः शाप एष विकारयति। अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वैतावतः कालस्य लेखमात्रमपि न विसृजति। तदितोऽभिज्ञानमङ्गुलीयकं तस्य विसृजावः। दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम्? ननु सखीगामी दोष इति व्यवसिताऽपि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीतामापन्नसत्त्वां शकुन्तलां निवेदयितुम्। इत्थंगतेऽस्माभिः किं करणीयम्। (पडिबुद्धा वि किं करिस्सं ? ण मे उइदेसु वि णिअकणिज्जेषु हत्थापाआ पसरन्ति। कामो दाणिं सकामो होदु, जेण असच्चसन्धे जणे सुद्धहिअआ सही पदं कारिदा। अहवा दुव्वाससो सावो एसो विआरेदि। अण्णहा कहं सो राएसी तारिसाणि मन्तिअ एत्तिअस्स कालस्स लेहमेत्तं पि ण विसज्जेदि। ता इदो अहिण्णाणं अङ्गुलीअअं तस्स विसज्जेम। दुक्खसीले तवस्सिजणे को अब्भत्थीअद ? णं सहीगामी दोसो त्ति ब्ववसिदा वि ण पारेमि पवासपडिणिउत्तस्स तादकस्सवस्स दुसन्तपरिणीदं आवण्णसतं सउन्दलं णिवेदिदुं। इत्थंगदे अम्हेहिं किं करणिज्जं।)

व्या० एवं श०—प्रतिबुद्धा – प्रति+बुध्+क्त+टाप् = जागी हुई। हस्तपादम् – हस्तौ च पादौ च इति हस्तपादम् – समाहारद्वन्द्व, एकपदभाव, कीबत्व = हाथ पैर। असत्यसन्धे – असत्या सन्धा प्रतिज्ञा यस्य सः (बहु०) तस्मिन् –'सन्धा प्रतिज्ञा मर्यादा'–इत्यमरः = असत्य प्रतिज्ञा वाले। यह पद जने (दुष्यन्ते) का विशेषण है। कारिता – कृ+णिच्+क्त+टाप् = करायी गयी। विकारयति – वि+कृ+णिच् प्र०पु०ए०व० = विकार (अनर्थ-गड़बड़) करा रहा है। मन्त्रयित्वा – मन्त्र+णिच्+क्त्वा = कहकर। अभिज्ञानम् – अभिज्ञायते अनेन इति अभिज्ञानम् – अभि+ज्ञा+ल्युट् (करणे) = पहचान। व्यवसिता – वि+अव्+सो+क्त+टाप् = निश्चित-उद्यत। प्रवासप्रतिनिवृत्तस्य – प्रवासात् प्रतिनिवृत्तस्य (प०त०) = प्रवास से लौटे हुये। दुष्यन्तपरिणीताम् – दुष्यन्तेन परिणीताम् – परिणीता – परि+नी+क्त+टाप् – द्वि०ए०व० = दुष्यन्त के साथ विवाहित। आपन्नसत्त्वाम् – आपन्नं प्राप्तं सत्त्वं यया यस्याःवा (बहु०) ताम् अथवा सत्त्वं गर्भमापन्ना इति आपन्नसत्त्वानाम्। आपन्नाम् – आ+पद्+क्त+टाप् द्वि०ए०व०।

अनसूया—जागी हुई भी (जाग कर भी) मैं क्या करूँगी ? (प्रातःकाल) के उचित (अभ्यस्त) करणीय कार्यों में भी मेरे हाथ-पैर नहीं फैल (चल) रहे हैं। कामदेव की इच्छा अब पूरी हो जिसने झूठी प्रतिज्ञा करने वाले व्यक्ति (दुष्यन्त) के प्रति शुद्ध हृदयवाली भोली-भाली सखी (शकुन्तला) को समर्पित (प्रेमासक्त) करा दिया। अथवा दुर्वासा का शाप (ही) यह अनर्थ (गड़बड़) करा रहा है। नहीं तो कैसे वे राजर्षि उस प्रकार की (प्रेमभरी) बातें कर इतने दिनों तक एक पत्र भी नहीं भेजते। अतः यहाँ से हम पहचान की अङ्गूठी उनके पास भेजती हैं। (अब समस्या यह है कि अङ्गूठी ले जाने के लिये) कष्ट सहने वाले (निरन्तर तपस्याजनित कष्ट झेलने वाले) तपस्वी लोगों में किससे प्रार्थना की जाय ? 'निश्चित ही सब दोष (अपराध) सखी (शकुन्तला) पर ही आयेगा। (कहने के लिये) उद्यत होकर भी (व्यवसिसताऽपि) मैं प्रवास से लौटे हुये पिता कण्व से, दुष्यन्त के साथ (गान्धर्व विधि से) शकुन्तला के विवाहित और गर्भिणी होने की बात नहीं कह सकती। (अर्थात् पिता कण्व को यह नहीं बता सकती कि शकुन्तला का दुष्यन्त के साथ गान्धर्व-विधि से विवाह हो गया है और वह गर्भिणी है)। ऐसी दशा में हमें क्या करना चाहिये ?

विशेष—(१) 'आपन्नसत्त्वा स्याद् गुर्विण्यन्तर्वत्नी च गर्भिणी' इत्यमरः। गर्भवती के

चार नाम हैं—आपन्नसत्त्वा, गुर्विणी, अन्तर्वत्नी, गर्भिणी। (२) **दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम्** – सदा तपस्या में निरत रहने के कारण तपस्वी जन दुःख झेलने वाले और संयमी हैं। (उनमे से) इस प्रकार का सन्देश ले जाने के लिये किससे कहा जाय-यह समझ में नहीं आता। अर्थात् किसी भी तपस्वी के द्वारा सन्देश भेजना ठीक नहीं है। (३) **सखीगामी दोष इति** – निवेदन करने पर सारा दोष सखी शकुन्तला का ही माना जायेगा। इसका भाव यह है कि पिता कण्व से कहने पर शकुन्तला का दोष मानकर कुछ भी हो सकता है। (४) **व्यवसिताऽपि** – वि+अव+सो+क्त+टाप् – (कहने के लिये) उद्यत होकर भी पिता से कहने का साहस नहीं है।

(प्रविश्य) **प्रियंवदा**—(सहर्षम्) **सखि, त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम्।** (सहि, तुवर तुवर सउन्दलाए प्रत्थानकोदअं णिव्वतिदुं।)

व्या० एवं श०—त्वरस्व – त्वर्+लो०म०पु०ए०व० = जल्दी करो। प्रस्थानकौतुकम् – प्रस्थाने यत् कौतुकम् = प्रस्थान सम्बन्धी माङ्गलिक कार्य।

(प्रवेश कर) **प्रियंवदा**—(प्रसन्नतापूर्वक) सखी, शकुन्तला के प्रस्थान (विदाई) के माङ्गलिक-कार्यो को पूरा करने के लिये शीघ्रता करो, शीघ्रता करो।

टिप्पणी—प्रस्थानकौतुकम् – प्रस्थान के समय जो माङ्गलिक कार्य किये जाते हैं उन्हें 'कौतुक' कहते हैं । कहा भी गया है—'मङ्गलार्थं सुधा गैरिकलेपादि यत् क्रियते तत् कौतुकमुच्यते' अर्थात् प्रस्थान के समय चूना, गेरू आदि का जो लेप आदि होता है उसे 'कौतुक' कहते हैं। कौतुक का अर्थ कंगन, माङ्गलिक धागा आदि भी होता है। कोष में इसके अनेक अर्थ होते हैं— 'कौतुकं नर्मणीच्छायामुत्सवे मुदि। पारम्पर्यागतमङ्गलोद्वाहसूत्रयोः' इति हैमः। इस प्रकार के मङ्गल पारम्परिक होते हैं। प्रियंवदा का अभिप्राय पारम्परिक मङ्गल से ही है।

अनसूया—सखि, कथमेतत् ? (सहि, कहं एदं ?)

अनसूया—सखी, यह कैसै ?

प्रियंवदा—शृणु। इदानीं सुखशयितप्रच्छिका शकुन्तलासकाशं गताऽस्मि। (सुणाहि। दाणिं सुहसइदपुच्छिआ सउन्दलासआसं गदम्हि।)

व्या० एवं श०—सुखेन शयितं सुखशयितम् सुप्सुपा समास तत् पृच्छतीति – सुखशयितप्रच्छिका – सुखशयित+प्रच्छ्+ण्वुल् (अक्) टाप् = सुखपूर्वक शयन हुआ या नहीं, यह पूछना। शकुन्तलासकाशम् – शकुन्तलायाः सकाशम् = शकुन्तला के पास।

प्रियंवदा—सुनो। अभी 'सुखपूर्वक सोयी कि नहीं' – यह पूछने की इच्छा से मैं शकुन्तला के पास गयी थी।

अनसूया—ततस्ततः। (तदो तदो।)

अनसूया—तब, तब (क्या हुआ) ?

प्रियंवदा—तावदेनां लज्जावनतमुखीं परिष्वज्य तातकाश्यपेनैवमभिनन्दितम्। दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता। वत्से, सुशिष्यपरिदत्ता विद्येवाशोचनीयासि संवृत्ता। अद्यैव ऋषिरक्षितां त्वां भर्तुः सकाशं विसर्जयामीति। (दाव एणं लज्जावणदमुहिं परिस्सजिअ तादकस्सवेण एव्वं अहिणन्दिदं। दिट्ठिआ धूमाउलिददिट्ठिणो वि जअमाणस्स पावए एव्व आहुदी पडिदा। वच्छे, सुसिस्सपरिदिण्णा विज्जा विअ असोअणिज्जासि संवुत्ता। अज्ज एव्व

इसिरक्खिदं तुमं भत्तुणो असासं विसज्जेमि त्ति।)

व्या० एवं श०—लज्जावनतमुखीम् – लज्जया अवनतमुखीम् = लज्जा वश नीचे मुख किये हुई । परिष्वज्य – परि+स्वज्+क्त्वा–ल्यप् = आलिङ्गन कर (गले लगाकर)। अभिनन्दितम् – अभि+नन्द्+क्त = अभिनन्दन किया। दिष्ट्या = सौभाग्य से। धूमाकुलितदृष्टेः – धूमेन आकुलिता दृष्टिः यस्य तस्य (ब०व्री०) = धूम से व्याकुल दृष्टि वाले। सुशिष्यपरिदत्ता – सुशिष्याय परिदत्ता (च०त०) = सुशिष्य को दी गयी (यह पद 'विद्या' पद का विशेषण है)। ऋषिरक्षिताम् – ऋषिभिः रक्षिताम् (तृ०त०) = ऋषियों से रक्षित। भर्तुःसकाशम् = पति के पास। विसर्जयामि – वि+सृज्+णिच्+उ०पु०ए०व० = भेज रहा हूँ। यहाँ 'विसर्जयिष्यामि' लृट् के स्थान पर 'विसर्जयामि' लट् का प्रयोग है।

प्रियंवदा—तब लज्जा से झुके हुये मुख वाली इस (शकुन्तला) को गले लगाकर पिता कण्व के द्वारा इस प्रकार अभिनन्दन किया गया—'सौभाग्य से धुयें से व्याकुल दृष्टि वाले भी यजमान की आहुति अग्नि में ही गिरी (पड़ी) है। बेटी, सुशिष्य को दी गयी विद्या की भाँति (तुम) अशोचनीय हो गयी हो (अर्थात् तुम्हारे विषय में मुझे अब कोई चिन्ता नहीं है)। आज ही ऋषियों से सुरक्षित तुमको पति (दुष्यन्त) के पास भेज रहा हूँ।

टिप्पणी—(१) **धूमाकुलित** – कण्व के कहने का अभिप्राय यह है कि यज्ञ में आहुति देने वाले यजमान की दृष्टि के, यज्ञीय धूम्र से व्याकुल होने पर भी, जैसे उसकी आहुति अग्नि में ही पड़ जाय तो यह उसका सौभाग्य ही कहा जायगा। ठीक यही बात शकुन्तला के विषय में भी लागू है क्योंकि उसने पिता कण्व की अनुपस्थिति में उनकी अनुमति लिये बिना दुष्यन्त से गान्धर्व विवाह रूप अनुचित काम कर डाला, पर यह उसका सौभाग्य ही है कि उसे दुष्यन्त जैसा सुयोग्य एवं कुलीन वर मिल गया। (२) **सुशिष्यपरिदत्तेव विद्या** – सुशिष्य को दी गयी विद्या ही गुरु के यश को बढ़ाती है और उसे निश्चिन्त बनाती है, इसके विपरीत कुशिष्य को दी गयी विद्या गुरु के यश को क्षीण करती है तथा उसके शोक का कारण बनती है। कहा भी गया है—'कुशिष्यमध्यापयतः कुतो यशः'। मनुस्मृति में कहा गया है कि विद्या ब्राह्मण के पास जाकर स्वयं निवेदन करती है कि "मै तुम्हारी निधि हूँ अतः मेरी रक्षा करो। तुम मुझे असूयक को कदापि न देना, इस प्रकार मै बलवती बनूँगी"—'विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम्। असूयकाय मां मा दास्तथा स्यां वीर्यक्तमा' ठीक इसी प्रकार अपनी कन्या के लिये योग्य वर की खोज की चिन्ता उसके पिता को रहती है। सुयोग्य पति को पाने वाली कन्या ही पिता के लिये अशोचनीय होती है – अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता ।। आज पिता कण्व अपनी कन्या के लिये दुष्यन्त जैसे सुयोग्य वर को पाकर सर्वथा निश्चिन्त (शोकरहित) हो गये। उनके उक्त कथन (सुशिष्य परिदत्तेव विद्या अशोचनीयासि मे संवृत्ता) का यही अभिप्राय है कि जिस प्रकार सुशिष्य को दी गयी विद्या गुरु के लिये अशोचनीय बन जाती है, उसी प्रकार सुवर को प्राप्त करने वाली पुत्री शकुन्तला अपने पिता कण्व के लिए अशोचनीय बन गयी। (३) यहाँ पर **'उपमा'** अलङ्कार है। शकुन्तला उपमेय, विद्या उपमान, इव वाचक शब्द तथा सुशिष्य – सुवर की प्राप्ति – साधारण धर्म है।

अनसूया—अथ केन सूचितस्तातकाश्यपस्य वृत्तान्तः। (अह केण सूइदो तादकस्सवस्स वुत्तन्तो।)

अनसूया—तो किसके द्वारा पिता कण्व को (यह) समाचार बताया गया ?

प्रियंवदा—अग्निशरणं प्रविष्टस्य शरीरं बिना छन्दोमथ्या वाण्या। (अग्गिसरणं पविट्ठस्स सरीरं विणा छन्दोमईए वाणिआए।)

व्या० एवं श०—अग्निशरणम् - अग्ने: शरणम् (ष०त०) = यज्ञशाला।

प्रियंवदा—यज्ञशाला (अग्निशरण) मे गये हुये (उनको) शरीर-रहित छन्दोमयी वाणी (आकाशवाणी) के द्वारा (यह समाचार) (बताया गया है)।

अनसूया—(सविस्मयम्) **कथमिव ?** (कहं विअ ?)

अनसूया—(आश्चर्य के साथ) किस प्रकार ?

प्रियंवदा—(संस्कृतमाश्रित्य)

प्रियंवदा—(संस्कृत का आश्रय लेकर अर्थात् संस्कृत भाषा में)

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव।। ४।।

अन्वय—ब्रह्मन्, दुष्यन्तेन आहितं तेज: भुव: भूतये दधानां तनयाम् अग्निगर्भां शमीम् इव अवेहि।

शब्दार्थ—ब्रह्मन् = हे ब्राह्मण (विप्र)! दुष्यन्तेन = दुष्यन्त के द्वारा। आहितम् = आधान किये गये (स्थापित)। तेज: = तेज (वीर्य) को (सन्तान को)। भुव: = पृथ्वी के। भूतये = कल्याण के लिये। दधानाम् = धारण करने वाली। तनयाम् = पुत्री को। अग्निगर्भाम् = अग्नि है गर्भ में (भीतर) जिसके ऐसी (अपने अन्दर अग्नि को धारण करने वाली)। शमीम् इव = शमीलता की भाँति। अवेहि = समझो।

अनुवाद—हे ब्राह्मण, दुष्यन्त के द्वारा स्थापित तेज (वीर्य, सन्तान) को, पृथ्वी के कल्याण के लिये धारण करने वाली पुत्री (शकुन्तला) को, अपने अन्दर अग्नि को धारण करने वाली शमीलता की भाँति समझो (जानो)।

संस्कृत व्याख्या—ब्रह्मन् - हे विप्रवर ! **दुष्यन्तेन** - राज्ञा, **आहितम्** - निषिक्तम्, **तेजः** - वीर्यम्, **भुवः** - पृथिव्या:, **भूतये** - अभ्युदयाय, **दधानां** - धारयन्तीम्, **तनयां** - पुत्रीं शकुन्तलाम्, **अग्निगर्भा** - वह्निगर्भाम्, **शमीम् इव** - शमीलताम् इव, **अवेहि** - जानीहि।

संस्कृत-सरलार्थः—यथा शमीलता स्वगर्भे अग्निं धारयति तथैव ते पुत्री शकुन्तला भुवनमण्डलस्य कल्याणाय दुष्यन्तेन निषिक्तं तेज: (सन्तानरूपं) स्वगर्भे धारयति अर्थात् ते पुत्री भाविनं भुवनभर्त्तारं तनयं धत्ते - इति जानीहीति निगलितोऽर्थ:।

व्याकरण—आहितम् - आ+धा+क्त (धा को हि) = स्थापिता। अग्निगर्भाम् - अग्नि: गर्भे यस्या: ताम् (बहु०)। दधानाम् - धा+शनच्+टाप् - द्वि०ए०व० = धारण करने वाली।

कोष—'ब्रह्मा विप्र: प्रजापति:' इत्यमर:। 'तेज: प्रभावे दीप्तौ च बले शुक्रेऽपि' इत्यमर:।

अलङ्कार—इस श्लोक में 'अग्निगर्भां शमीमिव' में श्रौती 'पूर्णोपमा' अलङ्कार है। शकुन्तला उपमेय, शमीलता उपमान, तेजोधारण - तेज (सन्तान-अग्नि) साधारण धर्म तथा 'इव' वाचक शब्द हैं। ल०द्र० १/५ श्लो०।

छन्द—यहाँ **अनुष्टुप** छन्द है। ल०द्र० १/५ श्लो०।

अनुवाद—हे प्रिये, प्रतिदिन (इस अङ्गूठी पर खुदे हुये) मेरे नाम के एक-एक अक्षर को गिनना। जब तक तुम (गिनती हुयी) अन्त को (अर्थात् अन्तिम अक्षर पर) पहुँचोगी तब तक मेरे अन्तःपुर में प्रवेश कराने के लिये (तुम्हें) ले जाने वाला व्यक्ति तुम्हारे पास पहुँच जायेगा।

संस्कृत व्याख्या—**प्रिये** – हे शकुन्तले ! **दिवसे दिवसे** – प्रतिदिनम् , **एकैकम्** – एकमेकम् , **मदीयं** – मम , **नामाक्षरं** – 'दुष्यन्त' इति नामाक्षरम् , **गणय** – गणनां कुरु; **यावत्** – यावत्कालम् , **अन्तम्** – अन्तिममक्षरम् , **गच्छसि** – प्राप्नोसि, **तावत्** – तावत् कालम् , **मदवरोधगृहप्रवेशं** – मम, अन्तःपुरे प्रवेशनम् , **नेता** – प्रापयिता, **जनः** – व्यक्ति; **तव** – ते, **समीपम्** – अन्तिके, **उपैष्यति इति** – अभिगमिष्यति इति।

संस्कृत-सरलार्थः—प्रिये ! शकुन्तले अत्रस्थिता प्रतिदिनमेकैकम् मम् नामाक्षरं गणय। गणवन्ती यावदन्तिममक्षरं यास्यसि तदा मदन्तःपरं निवेशयितुं कश्चिन्नेता जनस्तव समीपमागमिष्यति।

व्याकरण—दिवसे दिवसे – 'नित्यवीप्सयोः' से द्वित्व ! एकैकम् – यहाँ 'स्वार्थे अवधार्यमाणे एकस्मिन् 'द्वे' सूत्र से द्विरुक्ति में द्वित्व तथा 'एकं बहुव्रीहिवत्' से सुप् का लोप। नामाक्षरम् नाम्नः अक्षरम् (ष०त०)। मदवरोधगृहप्रवेशम् – मम अवरोधगृहम् – मदवरोधगृहम् तस्मिन् प्रवेशम् (तत्पु०)। यहाँ 'गुण कर्मणि नेष्यते' वार्तिक से प्रवेश में द्वितीया हुयी है। नेता – नी+तृच् प्र०ए०व०। उपैष्यति – उप+इष्+लृट् प्र०पु०ए०व०।

अलङ्कार—(१) यहाँ स्पष्ट रूप से गणना के पाँच दिनों का उल्लेख न कर अप्रत्यक्ष रूप से कथन करने के कारण 'पर्यायोक्त' अलङ्कार है। ल०द्र० ३/५ श्लो०। राघवभट्ट ने यहाँ काव्यलिङ्ग अलङ्कार माना है।

छन्द—यहाँ 'वसन्ततिलका' छन्द है। ल०द्र० १/८ श्लो०।

टिप्पणी—(१) 'दुष्यन्त' इस नाम में स्वर-व्यञ्जन मिलाकर पाँच अक्षर हैं। प्रत्येक दिन एक-एक अक्षर गिनने से 'दुष्यन्त', नाम के पाँचों अक्षर पाँच दिन में समाप्त हो जायेंगे। अतः पाँच दिन के अन्दर हस्तिनापुर से कोई व्यक्ति तुम्हारे पास आ जायेगा'—यह राजा के कथन का अभिप्राय है।

राजा—तच्च दारुणात्मना मया मोहान्नानुष्ठितम्।

व्या० एवं श०—दारुणात्मना – दारुण आत्मा यस्य तेन (ब०ब्री०) = अनुष्ठितम् – अनु+स्था+क्त = किया गया।

राजा—और निष्ठुर (कठोर) हृदय वाले मेरे द्वारा मोहवश (अज्ञानवश) वह कार्य पूरा नहीं किया गया।

सानुमती—रमणीयः खल्ववधिर्विधिना विसंवादितः। (रमणीओ क्खु अवही विहिणा विसंवादिदो।)

व्या० एवं श०—अवधिः – काल सीमा। विसंवादितः – वि+सम्+वद्+णिच्+क्त = बिगाड़ दिया।

सानुमती—(यह) रमणीय अवधि विधाता (अथवा भाग्य) के द्वारा बिगाड़ दी गयी।

विदूषकः—कथं धीवरकल्पितस्य रोहितमत्स्यस्योदराभ्यन्तर आसीत् । (कहं धीवलकप्पिअस्स लोहिअमच्छस्स उदलब्भन्तले आसि ?)

व्या० एवं श०—धीवरकल्पितस्य - धीवरेण कल्पितस्य (तत्पु०) = धीवर के द्वारा काटी गयी। उदराभ्यन्तरे - उदरस्य अभ्यन्तरे = पेट के भीतर।

विदूषक—कैसे (यह अङ्गूठी) धीवर (मल्लाह) द्वारा काटी गयी रोहू (रोहित) मछली के पेट के भीतर (पहुँच गयी) थी ?

राजा—शचीतीर्थं वन्दमानायाः सख्यास्ते हस्ताद् गङ्गास्त्रोतसि परिभ्रष्टम् ।

व्या० एवं श०—वन्दमानायाः - वन्द+शानच्+ष०ए०व० = शचीतीर्थ की वन्दना करती हुयी। परिभ्रष्टम् - परि+भस्ज्+क्त = गिर गयी।

राजा—शचीतीर्थ की वन्दना करती हुयी तुम्हारी सखी (शकुन्तला) के हाथ से गङ्गा की धारा में गिर गयी थी।

विदूषकः—युज्यते । (जुज्जइ ।)

विदूषक—ठीक है। (यह सम्भव है)।

सानुमती—अत एव तपस्विन्याः शकुन्तलाया अधर्मभीरोरस्य राजर्षेः परिणये सन्देह आसीत् । अथवेदृशोऽनुरागोऽभिज्ञानमपेक्षते । कथमिवैतत् ? (अदो एव्व तवस्सिणीए सउन्दलाए अधम्मभीरुणो इमस्स राएसिणो परिणए संदेहो आसि। अहवा ईदिसो अणुराओ अहिण्णाणं अवेक्खदि। कहं विअ एदं ?)

व्या० एवं श०—अधर्मभीरोः - अधर्मात् भीरोः (तत्पु०) = अधर्म से डरने वाले। अभिज्ञानम् - अभि+ज्ञा+ल्युट् = पहचान।

सानुमती—यही कारण है कि अधर्म से डरने वाले इस राजर्षि को बेचारी (भोली-भाली) शकुन्तला के साथ विवाह के विषय में संदेह हो गया था। अथवा इस प्रकार का प्रेम (अनुराग) (भी) अभिज्ञान (निशानी) की अपेक्षा रखता है—यह कैसी बात है।

राजा—उपालप्स्ये तावदिदमङ्गुलीयकम् ।

व्या० एवं श०—उपालप्स्ये - उप+लभ्+लृट् उ०पु०ए०व० = उलाहना दूँगा।

राजा—तो इस अङ्गूठी को उलाहना दूँगा।

विदूषकः—(आत्मगतम्) **गृहीतोऽनेन पन्था उन्मत्तानाम् ।** (गहीदो णेण पन्था उन्मत्तआणं ।)

विदूषक—(अपने मन में) इस (राजा दुष्यन्त) के द्वारा (अब) पागलों का मार्ग पकड़ लिया गया है।

राजा—(अङ्गुलीयकं विलोक्य) **मुद्रिके,**

राजा—(अङ्गूठी को देखकर) हे अङ्गूठी,

कथं नु तं बन्धुरकोमलाङ्गुलिं करं विहायासि निमग्नमम्भसि ?
अथवा

अचेतनं नाम गुणं न लक्षयेन्मयैव कस्मादवधीरिता प्रिया ।। १३ ।।

अन्वय—कोमलबन्धुराङ्गुलिं तं करं विहाय कथं नु अम्भसि निमग्नम् असि ! अथवा

अचेतनं गुणं नाम न लक्षयेन्मया एव कस्मात् प्रिया अवधीरिता।

शब्दार्थ—(मुद्रिके ! = हे अङ्गूठी !) बन्धुरमनोहरकोमलाङ्गुलिम् = मनोहर एवं कोमल अङ्गुली वाले। तम् करम् = उस हाथ को। विहाय = छोड़कर। कथम् = कैसे ? नु = यह प्रश्न सूचक अव्यय है। अम्भसि = जल में। निमग्नम् असि = डूब गयी थी। अचेतनम् = निर्जीव (वस्तु)। गुणं नाम = गुण को। न लक्षयेत् = नहीं देखती। मयैव (मया+एव) = मेरे द्वारा ही। कस्मात् = क्यों (किस कारण से)। प्रिया = प्रिया शकुन्तला। अवधीरिता = तिरस्कृत की गयीं।

अनुवाद—सुन्दर और कोमल अङ्गुलियों वाले उस हाथ को छोड़कर तुम कैसे जल में डूब गयी (गिर गयी) ? अथवा अचेतन (वस्तु) गुणों को नहीं देख सकती। (किन्तु चेतन होते हुये भी) मेरे द्वारा ही क्यों प्रिया (शकुन्तला) अपमानित की गयी (अर्थात् मैंने ही प्रिया का अपमान क्यों किया) ?

संस्कृत व्याख्या—बन्धुरकोमलाङ्गुलिम् – सुन्दरकोमलाङ्गुलियुक्तम् , **तं करम्** – शकुन्तलायाः हस्तम् , **विहाय** – त्यक्त्वा, **कथं नु** – केन कारणेन, **अम्भसि** – जले, **निमग्नम्** – निमज्जितम् असि ? अथवा, अचेतनम् – चेतनारहितम् (वस्तु), गुणम् – वैशिष्ट्यम्, नाम – सम्भावनाम् , **न लक्षयेत् – न विलोकयितुं** – शक्नुयात् ? **मया एव** – मया – सचेतनेन दुष्यन्तेनैव, **कथम्** – केन हेतुना, **प्रिया** – प्रियतमा (शकुन्तला), **अवधीरिता** – तिरस्कृता (अस्वीकृता) ?

संस्कृत-सरलार्थः—स्वीयां मुद्रिकां सम्बोधयन् दुष्यन्तो ब्रूते – मुद्रिके त्वं (प्रियायाः शकुन्तलायाः) सुन्दरं कोमलं च करं परित्यज्य, केन कारणेन जले निमग्ना (पतिता) जाता इत्युक्त्वा स पुनर्विचारयति – अचेतनं वस्तु अपरवस्तुगतं वैशिष्ट्यं न पश्येत् तत्र नाचेतनस्य दोषः। सचेतनेन मया दुष्यन्तेन हेतुमन्तरैव कथं प्रिया शकुन्तला तिरस्कृता ? वस्तुतो दोषस्तु सचेतनस्य ममैव नाचेतनस्याङ्गुलीयकस्येतिभावः।

व्याकरण—बन्धुराः कोमलाः अङ्गुलयः यस्य तम् (ब०ब्री०), बन्धुरः – बन्ध्+उरच्। विहाय – वि+हा+क्त्वा – ल्यप्। निमग्नम् – नि+मज्ज्+क्त। लक्षयेत् – लक्ष्+णिच्+लिङ् प्र०पु०ए०व०। अवधीरिता – अव+धीर+णिच्+क्त+टाप्।

कोष—'बन्धुरं तैन्नताममम्' इत्यमरः। 'बन्धुरं सुन्दरं रम्ये' इति विश्वः।

अलङ्कार—(१) पूर्वार्द्ध में अँगूठी पर चेतन व्यवहार का आरोप होने से **'समासोक्ति'** अलङ्कार है। ल०द्र० १/२३ श्लो०। (२) यहाँ पर तिरस्कार के कारण के अभाव में भी तिरस्कार होने से 'विभावना' अलङ्कार है। ल०द्र० १/१८ श्लो०। (३) तृतीय चरण के 'अचेतनं नाम गुणं न लक्षयेत्' इस सामान्य के द्वारा पूर्वोक्त विशेष का समर्थन होने से **'अर्थान्तरन्यास'** अलङ्कार है। ल०द्र० १/२ श्लो०।

छन्द—इस श्लोक में **'वशंस्थ'** छन्द है। ल०द्र० ५/१७ श्लो०।

विदूषकः—(आत्मगतम्) **कथं बुभुक्षया खादितव्योऽस्मि** (कहं बुभुक्खाए खादिदव्वो म्हि।)

व्या० एवं श०—खादितव्यः – खाद्+तव्यत् = खा लिया जाऊँगा। बुभुक्षया – भुज्+सन्+अ टाप् – बुभुक्षा तया = भूख से।

विदूषक—(अपने मन में) क्या मैं भूख के द्वारा खा लिया जाऊँगा (अर्थात् मुझे भूख बहुत अधिक सता रही है)।

राजा—प्रिये, अकारणपरित्यागानुशयतप्तहृदयस्तावदनुकम्प्यतामयं जनः पुनर्दशनेन।

व्या० एवं श०—अकारणपरित्यागानुशयतप्तहृदयः – अकारणं कारणराहित्येन यः परित्यागः तेन अनुशयः पश्चात्तापः तेन तप्तं हृदयं यस्य तेन।

राजा—प्रिये, बिना कारण (तुम्हारे) परित्याग के कारण पश्चात्ताप (अनुशय) से सन्तप्त हृदय वाले इस व्यक्ति (मुझ दुष्यन्त) को फिर से दर्शन देकर अनुगृहीत (कृतार्थ) करो।

(प्रविश्यापटीक्षेपेण चित्रफलकहस्ता)

(चित्रपट हाथ में ली हुयी पर्दा हटाने के साथ प्रवेश कर)

चतुरिका—इयं चित्रगता भट्टिनी। (इअं चित्तगदा भट्टिणी।) (इति चित्रफलकं दर्शयति)।

चतुरिका—यह चित्रलिखित (चित्र में बनायी गयी) स्वामिनी (शकुन्तला) हैं। (चित्रपट को दिखाती है)।

विदूषकः—(विलोक्य) **साधु वयस्य। मधुरावस्थानदर्शनीयो भावानुप्रवेशः स्खलतीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु।** (साहु वअस्स। महुरावत्थाणदंसणिज्जो भावाणुप्पवेशो। क्खलदि विअ मे दिट्ठी णिण्णुण्णअप्पदेसेसु।)

व्या० एवं श०—मधुरावस्थानदर्शनीयः – मधुरं सुन्दरं यः अङ्गविन्यासः तेन दर्शनीयः = सुन्दर अङ्ग विन्यास से रमणीय। भावानुप्रवेशः प्रेमादिभावानाम् अनुप्रवेशः आविर्भावः = भावों की अभिव्यक्ति। स्खलतीव = मानो लड़खड़ा रही है। निम्नोन्नतप्रदेशेषु = ऊँचे-नीचे स्थानों पर।

विदूषक—(देखकर) मित्र, (बहुत) सुन्दर है। भावों की अभिव्यक्ति सुन्दर (अवयव के) विन्यास (अवस्थान) के कारण दर्शनीय है। मेरी दृष्टि ऊँचे-नीचे स्थानों पर मानो लड़खड़ा रही (फिसल जा रही) है।

सानुमती—अहो, एषा राजषेर्निपुणता। जाने सख्यग्रतो मे वर्तत इति। (अम्मो, एसा राएषिणो णिउणदा। जाणे सही अग्गदो मे वट्टदि त्ति)।

व्या० एवं श०—सख्यग्रतः – सखी+अग्रतः – यण् सन्धि आगे सखी (है)।

सानुमती—ओह, यह है राजर्षि (दुष्यन्त) (के चित्र बनाने) की निपुणता। लगता है कि (मेरी) सखी (शकुन्तला) मेरे सम्मुख विद्यमान है।

राजा—

यद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा।
तथापि तस्या लावण्यं रेखया किञ्चिदन्वितम्॥ १४॥

अन्वय—चित्रे यत् यत् साधु न स्यात् तत् तत् अन्यथा क्रियते, तथापि तस्याः लावण्यं रेखया किञ्चित् अन्वितम्।

शब्दार्थ—चित्रे = चित्र में। यत् यत् = जो-जो (जो कुछ)। साधु = सुन्दर। न = नहीं। स्यात् = है। तत् तत् = वह वह (वह सब)। अन्यथा = विपरीत (दूसरे प्रकार से)। क्रियते

= किया जा रहा है (बनाया जा रहा है)। तथापि = तो भी। तस्याः = उसका। लावण्यम् = सौन्दर्य। रेखया = रेखाओं के द्वारा। किञ्चित् = कुछ ही (थोड़ा ही)। अन्वितम् = अनुकृत किया जा सका है (प्रकट हो पाया है)।

अनुवाद—चित्र में जो-जो सुन्दर नहीं है (अर्थात् त्रुटिपूर्ण है) वह सब (मेरे द्वारा) ठीक किया जा रहा है (अर्थात् उसको मैं अभी ठीक कर रहा हूँ)। फिर भी उस (शकुन्तला) का सौन्दर्य रेखाओं के द्वारा कुछ ही प्रकट हो पाया है।

संस्कृत व्याख्या—चित्रे – मत्कृते आलेखने, **यत् यत्** – यत्किञ्चिदपि, **साधु** – रम्यम् , **न** – नहि, **स्यात्** – वर्तते, **तत् तत्** – तत्सर्वम् , **अन्यथा** – शोभनम् , **क्रियते** – विधीयते, **तथापि तस्याः** – शकुन्तलायाः, **लावण्यं** – सौन्दर्यम् , **रेखया** – तूलिका-विहिताभिः रेखाभि, **किञ्चित्** – स्वल्पमेव, **अन्वितम्** – अनुगतम् , अस्तीति शेषः। अलौकिकरूपे राशिभूतेयं शकुन्तला मनुष्यस्य तूलिकया कथम प्यनुकर्त्तुं न शम्यत इति भावः।

संस्कृत-सरलार्थः—विदूषकृतचित्रप्रशंसामाकर्ण्य राजा वदति – शकुन्तलायाश्चित्रे यत् यत् सुन्दरं नास्ति तत्सर्वम् असुन्दरं रूपं मया सुष्ठु विधीयते। परन्तु तथ्यन्त्विदमस्ति यत् प्रियायाः शकुन्तलाया यथार्थ लावण्यं न चित्रयितुं शक्यते। शकुन्तलाया अपूर्वलावण्यं साकल्येन चित्रीकृतं न जातं चित्रेऽस्मिन् – इति भावः।

व्याकरण—लावण्यम् – लवणस्य भावः लवण+घ्यञ्। अन्वितम् – अनु+रण्+क्त।

छन्द—इस श्लोक में **'पथ्यावक्त्र'** छन्द है। ल०द्र० ३/१७ श्लो०।

टिप्पणी—(१) राजा दुष्यन्त चित्र बनाने में अत्यन्त प्रवीण हैं। उन्होंने बहुत सावधानी से चित्र बनाया है और चित्र की त्रुटियों को ठीक भी कर दिया है फिर भी शकुन्तला का लावण्य रेखाओं द्वारा कुछ ही प्रकट हो पाया है—वह इतनी सुन्दर है कि उसकी सुन्दरता चित्र में किसी प्रकार भी चित्रित नहीं की जा सकती।

सानुमती—सदृशमेतत् पश्चात्तापगुरोः स्नेहस्यानवलेपस्य च। (सरिसं एदं पच्छादावगुरुणो सिणेहस्स अणवलेवस्स अ।)

व्या० एवं श०—पश्चात्तापगुरोः – पश्चात्तापेन गुरुः तस्य (तत्पु०) = पश्चात्ताप से बढ़े हुये। यह पद 'स्नेहस्य' पद का विशेषण है। अनवलेपस्य – न अवलेपः अनवलेपः तस्य = अभिमानशून्यता के।

विशेष—राघवभट्ट ने अनवलेप का अर्थ निर्दोष किया है। तब यह पद 'स्नेहस्य' का विशेषण होगा। ऐसी स्थिति में पूरे वाक्य को अर्थ होगा – पश्चात्ताप के कारण बढ़े हुये निरभिमान (स्वाभाविक) स्नेह के अनुरूप ही है।

सानुमती—पश्चाताप के कारण बढ़े हुये (गुरु) प्रेम और अभिानशून्यता के अनुरुप ही यह (कथन) है।

विदूषकः—भोः इदानीं तिस्रस्तत्र भवत्यो दृश्यन्ते। सर्वाश्च दर्शनीयाः। कतमाऽत्र तत्रभवती शकुन्तला? (भो, दाणिं तिण्हिओ तत्तहोदीओ दीसन्ति। सव्वाओ अ दंसणीआओ। कदमा एत्थ तत्तहोदी सउन्दला ?)

व्या० एवं श०—कतमा – किम्+डतमच्+टाप् = कौन।

विदूषक—हे (मित्र) (इस चित्रपट में) तीन माननीय युवतियाँ दिखायी दे रहीं हैं। सभी दर्शनीय (सुन्दर) हैं। यहाँ (इनमें) श्रीमती शकुन्तला कौन हैं ?

सानुमती—अनभिज्ञः खल्वीदृश्यस्थ रूपस्य मोघदृष्टिरयं जनः। (अणभिण्णो क्खु ईदिसस्स रूवस्स मोहदिट्ठि अअं जणो।)

व्या० एवं श०—मोघदृष्टिः - मोघा दृष्टिः यस्य स = निष्फल दृष्टि।

सानुमती—निष्फल दृष्टि वाला यह व्यक्ति (विदूषक) निश्चय ही इस प्रकार के अनुपम रूप से अनभिज्ञ है।

राजा—त्वं तावत् कतमां तर्कयसि ?

व्या० एवं श०—तर्कयसि = समझ रहे हो।

राजा—तुम (इनमें से) किसको (शकुन्तला) समझ रहे हो ?

विदूषकः—तर्कयामि यैषा-शिथिलबन्धनोद्वान्तकुसुमेन केशान्तेनोद्भिन्नस्वेदबिन्दुना वदनेन विशेषतोऽपसृताभ्यां बाहुभ्यामवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत्परिश्रान्तेवालिखिता सा शकुन्तला। इतरे सख्याविति। (तक्केमि जा एसा सिढिलबन्धणुव्वन्तकुसुमेण केसन्तेण उब्भिण्णस्सेअबिन्दुणा वअणेअ विसेसदो ओसरिंआहिं बाहाहिं अबसेअसिणिद्ध—तरुणपल्लवस्स चूअपाअवस्स पासे इसिपरिसन्ता विअ आलिहिदा सा सउन्दला। इदरांओ सहीओ त्ति।)

व्या० एवं श०—शिथिलबन्धनोद्वान्तकुसुमेन - शिथिलेन बन्धनेन उद्वान्तानि कुसुमानि यस्मात् तेन (बहु०) = ढीली चोटी से फूल गिर गये हैं जिसके ऐसे। यह पद 'केशपाशेन' पद का विशेषण है। केशपाशेन - केशपाश से युक्त (केशपाशवाली), उद्भिन्नस्वेदबिन्दुना - उद्भिन्नाः स्वेदविन्दवः यस्मिन् तेन (ब०ब्री०) = जिस पर पसीने की बूँदें उभरी हुई है अर्थात् दिखायी दे रही हैं ऐसे। यह पद 'वदनेन' पद का विशेषण है। अपसृताभ्याम् = झुकी हुयी। यह पद 'बाहुभ्याम्' इस पद का विशेषण है। अवसेकस्निग्धतरुणपल्लवस्य - अवसेकेन (सेचनेन) स्निग्धाः (मसृणाः) तरुपल्लवाः (नवपत्राणि) यस्य तादृशस्य = सीचने से हरे-भरे नवीन पत्तों वाले। यह पद 'चूतपादपस्य' इस पद का विशेषण है। चूतपादपस्य = आम्रवृक्ष के। ईषत् परिश्रान्तेव = कुछ थकी हुयी। इतरे = अन्य दो। सख्याविति - सख्यौ+इति - आव् आदेश।

विदूषक—मैं समझता हूँ कि ढीली चोटी से गिर गये हैं पुष्प जिसके ऐसे केशपाश वाली उभरी हुयी (दिखायी देने वाली) पसीने की बूदों वाले मुख (तथा) अत्यधिक झुकी हुई भुजाओं से युक्त और सींचने के कारण चिकने नवीन पत्तों वाले आम्र-वृक्ष के समीप कुछ थकी हुयी सी जो चित्रित की गयी है, वह शकुन्तला हैं। दूसरी दो सखियाँ हैं।

राजा—निपुणो भवान्। अस्त्यत्र मे भावचिह्नम्।

व्या० एवं श०—भावचिह्नम् - भावस्य चिह्नम् = (सात्त्विक) भाव के चिह्न।

राजा—आप (सचमुच) चतुर हैं। यहाँ (इस चित्र में) मेरे (सात्त्विक) भाव का सङ्केत (चिह्न) है—

> **स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः।**
> **अश्रु च कपोलपतितं दृश्यमिदं वर्णिकोच्छ्वासात्॥ १५॥**

अन्वय—रेखाप्रान्तेषु मलिनः स्विन्नाङ्गुलिविनिवेशः दृश्यते, वर्णिकोच्छ्वासात् इदं च कपोलपतितम् अश्रु दृश्यम् ।

शब्दार्थ—रेखाप्रान्तेषु = (चित्र की) रेखाओं के किनारों पर । मलिनः = धूमिल । स्विन्नाङ्गुलिविनिवेशः = पसीने से युक्त अङ्गुलियों का रखना (अर्थात् पसीने से युक्त अङ्गुलियों का निशान) । दृश्यते = दिखायी दे रहा है । च = और । वर्णिकोच्छ्वासात् = रङ्ग के फूल जाने के कारण । इदम् = यह । कपोलपतितम् = गालों पर गिरा हुआ । अश्रु = आँसू । दृश्यम् = (भी) दिखायी दे रहा है ।

अनुवाद—(चित्र की) रेखाओं के किनारों पर पसीने से युक्त अङ्गुलियों का मलिन निशान दिखायी दे रहा है और रङ्ग के फूल जाने के कारण यह (शकुन्तला) के गालों पर गिरा हुआ आँसू (भी) दृष्टिगोचर हो रहा है ।

संस्कृत व्याख्या—**रेखाप्रान्तेषु** – चित्रस्य पर्यन्तभागेषु, **मलिनः** – कृष्णवर्णः, **स्विन्नाङ्गुलिविनिवेशः** – स्वेदयुक्तानाम् अङ्गुलीनां विन्यासः, **दृश्यते** – अवलोक्यते, **वर्णिकोच्छ्वासात्** – रङ्गस्य स्फीतत्वात् , **इदं च** – एतच्च, **कपोलपतितं** – गण्डप्रदेशच्युतम् , **अश्रु** – नेत्रसलिलम् , **दृश्यं** – द्रष्टुं शक्यम् ।

संस्कृत-सरलार्थः—राजा विदूषकं वक्ति यदस्मिन् चित्रे मदीयभावोदयचिह्नमप्यस्ति तद्यथा चित्ररेखाप्रान्तभागेषु कृष्णवर्णः स्वेदयुक्ताङ्गुलिविन्यासो दृश्यते तथा शकुन्तला-कपोलप्रदेशेच्युतमश्रुजालं नयनगोचरतां याति ।

व्याकरण—रेखाप्रान्तेषु – रेखाणां प्रान्तेषु (तत्पु०) । स्विन्नाङ्गुलिविनिवेशः – स्विन्नानाम् अङ्गुलीनां विनिवेशः (तत्पु०) । वर्णिकोच्छ्वासात् – वर्णिकायाः उच्छ्वासात् (तत्पु०) । कपोलपतितम् – कपोलयोः पतितम् (ष०त०) ।

रसभाव—यहाँ श्रृङ्गार के सात्त्विक भावों का वर्णन है ।

अलङ्कार—(१) यहाँ सात्विक स्वेद (पसीना) से युक्त अङ्गुलियों के द्वारा राजा की शकुन्तला के प्रति भावविह्वलता की अनुमति होने से **'अनुमान'** अलङ्कार है । ल०द्र० ५/३१ श्लो० । (२) चित्र की रेखाओं पर पसीने की बूँदों के गिर जाने के कारण निशान की मलिनता तथा आँसूओं के गिरने से रङ्ग का फैल जाना स्वाभाविक है । साथ ही कामविकार के अविर्भाव के कारण सात्त्विक स्वेद तथा सात्त्विक अश्रुओं का होना भी स्वाभाविक है । अतः यहाँ **'स्वाभावोक्ति'** अलङ्कार है । ल०द्र० १/७ श्लो० ।

छन्द—श्लोक में **'आर्या'** छन्द है । ल०द्र० १/२ श्लो० ।

टिप्पणी—(१) सात्त्विक भाव आठ प्रकार के होते हैं—साहित्य-दर्पण के अनुसार वे आठ भाव ये हैं—**स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गश्च वेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ।।**

अर्थात् (१) स्तम्भ, (२) स्वेद, (३) रोमाञ्च, (४) स्वरभङ्ग, (५) वेपथु, (६) वैवर्ण्य, (७) अश्रु, (८) प्रलय ।

विशेष—यहाँ पद्य में 'स्वेद' और 'अश्रु' इन दो सात्त्विक भावों का वर्णन है । (२) अपनी प्रियतमा यक्षिणी का चित्र बनाते समय यक्ष की भी आँखों से आँसू निकले थे । मेघदूत का 'त्वामालिख्यप्रणयकुपिताम् ... सङ्गमं नौ कृतान्तः ॥ श्लोक द्रष्टव्य है ।

चतुरिके, अर्धलिखितमेतद् विनोदस्थानम् । गच्छ, वर्तिकां तावदानय ।

व्या० एवं श०—वर्तिकाम् – तूलिका । विनोदस्थपम् = मनोरञ्जन-साधन ।

चतुरिका, (मेरे) मनोरञ्जन का यह साधन अधूरा (ही) चित्रित है । तो जाओ, (चित्र में रङ्ग भरने के लिये) कूँची (ब्रश) ले आओ ।

चतुरिका—आर्य माधव्य, अवलम्बस्व चित्रफलकं यावदागच्छामि । (अज्ज माढव्व, अवलम्ब चित्तफलअं जाव आअच्छामि ।

चतुरिका—आर्य माधव्य, चित्रपट को पकड़िये, जब तक मैं आती हूँ ।

राजा—अहमेवैतदवलम्बे । (इति यथोक्तं करोति) ।

राजा—मैं ही इसको पकड़ता हूँ । (कहने के अनुसार करता है अर्थात् चित्रपट पकड़ता है) ।

(निष्क्रान्ता चेटी)—(दासी निकल जाती है)

राजा—(निःश्वस्य) **अहं हि**—

राजा—(लम्बी साँस लेकर) मैं तो—

साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रर्पितां पुनरिमां बहु मन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणययान्मृगतृष्णिकायाम् ।। १६ ।।

अन्वय—सखे, पूर्वं साक्षात् उपगतां प्रियाम् अपहाय पुनः चित्रार्पिताम् इमां बहुमन्यमानः पथि निकामजलां स्रोतोवहाम् अतीत्य मृगतृष्णिकायां प्रणयवान् जातः ।

शब्दार्थ—सखे = हे मित्र ! पूर्वम् = पहले । साक्षात् = (स्वयम्) प्रत्यक्ष । उपगताम् = समीप आयी हुयी । प्रियाम् = प्रिया को । अपहाय = छोड़कर । पुनः = अब । चित्रार्पिताम् = चित्रनिर्मित । इमाम् = इसको (शकुन्तला को) । वहुमन्यमानः = बहुत आदर देता हुआ । पथि = मार्ग में । निकामजलाम् = अत्यधिक जल वाली । स्रोतोवहाम् = नदी को । अतीत्य = लाँघकर, छोड़कर । मृगतृष्णिकायाम् = मृगमरीचिका में । प्रणयवान् = प्रेम करने वाला । जातः (अस्मि) = हो गया (हूँ) ।

अनुवाद—हे मित्र, पहले साक्षात् (स्वयम्) समीप में आयी हुयी (प्राप्त हुयी) प्रिया (शकुन्तला) को त्यागकर अब चित्रगत इसको बहुत समझता हुआ (बहुत आदर देता हुआ) मैं मार्ग में अधिक जल वाली नदी को लाँघकर (छोड़कर) मृगतृष्णा (मृगमरीचिका) में प्रेम करने वाला हो गया हूँ ।

संस्कृत व्याख्या—सखे – हे मित्र ! **पूर्वम्** – प्राक् , **साक्षात्** – प्रत्यक्षरूपेण (स्वयमेवेत्यर्थ), **उपगतां** – प्राप्ताम् , **प्रियां** – शकुन्तलाम् , **अपहाय** – परित्यज्य (अवगणय्येत्यर्थः), **पुनः** – मुहुः (अनन्तरम्), **चित्रार्पितां** – चित्रे लिखिताम् , **इमां** – शकुन्तलाम् , **बहुमन्यमानः** – नितान्तमाद्रियमाणः, **पथि** – मार्गे, **निकामजलां** – प्रभूतसलिलाम् , **स्रोतोवहां** – नदीम् , **अतीत्य** – अतिक्रम्य, **मृगतृष्णिकायां** – मृगमरीचिकायाम् , **प्रणयवान्** – प्रेमयुक्तः, **जातः** – अभवम् ।

संस्कृत-सरलार्थः—चित्रगतां शकुन्तलां सादरमवलोकयन् राजा विदूषकं वदति 'मित्र ! यदा मम प्रिया शकुन्तला साक्षान्मम समीपमागता तदा तु सा मया तिरस्कृता, परं साम्प्रतमहं चित्रलिखितां तामत्यादरेण समवलोकयन् तथैव निजप्रेमपिपासामपाकर्त्तुं समुत्सुको जातोऽस्मि यथा कश्चिज्जनो मार्गे जलपरिपूर्णां नदीमुल्लङ्घ्य स्वपिपासाशान्त्येः मृगमरीयिकां समाश्रयितुं यतते। साक्षादुपेतां प्रियामवगणय्य चित्रगतां तां समाद्रियमाणस्य मेऽहो मौढ्यमितिभावः।

व्याकरण—अपहाय – अप+हा+क्त्वा – ल्यप्। चित्रार्पिताम् – चित्रे अर्पिताम् (स०त०)। निकामजलाम् – निकामं जलं यस्यां ताम् (ब०ब्री०)। अतीत्य – अति+इ+क्त्वा – ल्यप्। मृगतृष्णिकायाम् – मृगाणां तृष्णा मृगतृष्णा (त०), सा अस्ति अस्यामिति मृगतृष्णा, मृगतृष्णिका तस्याम्। प्रणयवान् – प्र+नी+अच् करणे प्रत्यः, प्रणयः अस्ति अस्य – प्रणय+मतुप्। **विशेष** – 'प्रणय' शब्द सुखादिगण में पठित होने के कारण उससे मत्वर्थ में 'सुखादिश्यश्च' से 'इनि' प्रत्यय होगा और इनि प्रत्ययान्त रूप प्रणयिन् होगा। इस प्रकार प्रणयवान् अपाणिनीय प्रयोग है। इसको वैदिक प्रयोग मानना ही समीचीन है। कालिदास ने प्रणयिन् (प्रणयी) तथा प्रणयवत् (प्रणयवान्) दोनों का प्रयोग किया है। यथा – (१) अङ्काश्रयप्रणयिनः (शा० ७/१७)। (२) 'प्रणयिनीव नखक्षतमण्डनम्' (रघु० ९/३१)। (३) 'सा हि प्रणयवती' (रघु० ११/५७)।

कोष—'मृगतृष्णा मरीचिका' – इत्यमरः।

अलङ्कार—(१) इस पद्य में असम्भवद् वस्तु सम्बन्ध रूप निदर्शना अलङ्कार है। ल०द्र० १/१७ श्लो०। जिस प्रकार मार्गगत का जलपूर्ण महानदी को छोड़कर जैसे कोई व्यक्ति पिपासा शान्ति के लिये मृगमरीचिका आश्रय लेता है पर उसकी पिपासा शान्त न होकर और बढ़ती ही है, उसी प्रकार स्वयमेव उपस्थित अपनी प्रिया शकुन्तला की अवहेलना कर दुष्यन्त अब चित्रगत उसका सम्मान कर रहा है। इससे उसको मानसिक शान्ति नहीं मिलती उलटे उसकी कामव्यथा ही बढ़ती है। इन दो असम्बद्ध वस्तुओं में सम्बन्ध दिखाकर उनमें सादृश्य (औपम्य) का वर्णन होने से 'निदर्शना' है।

छन्द—वसन्ततिलका है। ल०द्र० १/८ श्लो०।

टिप्पणी—(१) मरुभूमि में ग्रीष्म ऋतु की मध्याह्न-वेला में प्यास से व्याकुल मृग को चमचमाती हुई रेत में जल का भ्रम हो जाता है। फलतः वह इधर-उधर दौड़ता है किन्तु पानी नहीं मिलता। इस प्रकार अन्त में भ्रान्त मृग अपने प्राण खो देता है। यही मृगतृष्णा है। (२) राजा के कथन का तात्पर्य यह है कि यह चित्र मृगतृष्णा के समान है। जिस प्रकार मृगतृष्णा मृग की प्यास को नहीं बुझा सकती, उसी प्रकार यह चित्र भी राजा की विरह-वेदना को शान्त नहीं कर रहा है, अपितु बढ़ा ही रहा है।

विदूषक—(आत्मगतम्) **एषोऽत्रभवान् नदीमतिक्रम्य मृगतृष्णिकां सङ्क्रान्तः।** (प्रकाशम्) **भोः, अपरं किमत्र लेखितव्यम् ?** (एसो अत्तभवं णदि अदिक्कमिअ मिअतिण्हआं संकन्तो। भो, अवरं किं एत्थ लिहिदव्वम् ?)

व्या० एवं श०—अतिक्रम्य – अति+क्रम+क्त्वा – ल्यप् = लाँध कर। सङ्क्रान्तः – सम्+क्रम्+क्त = प्रविष्ट हो गये (हैं)। लेखितव्यम् – लिख्+तव्यत् = लिखना है (चित्र बनाना है)। लिखितव्यम् – यह पाठ अशुद्ध है।

विदूषक—(अपने मन में) ये महानुभाव (महाराज) नदी को लाँघकर मृगतृष्णा में प्रविष्ट हो गये हैं। (प्रकट रूप में) हे (मित्र), यहाँ (इस चित्र में) और क्या लिखना (बनाना) है ?

सानुमती—यो यः प्रदेशः सख्या मेऽभिरूपस्तं तमालेखितुकामो भवेत्। (जो जो पदेसो सहीए मे अहिरूवो तं तं अलिहिदुकामो भवे।)

व्या० एवं श०—आलेखितुकामः - आलेखितुं कामः यस्य सः (बहु०) 'तुंकामनसोरपि' से 'म्' का लोप हुआ है = लिखने (चित्र बनाने) का इच्छुक।

सानुमती—जो-जो स्थान मेरी सखी (शकुन्तला) को प्रिय (अभिरूप) हैं, उन सबको चित्रित करने के इच्छुक होंगे।

राजा—श्रूयताम्—

राजा—सुनो—

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ।। १७ ।।

अन्वय—सैकतलीनहंसमिथुना मालिनी स्रोतोवहा कार्या, ताम् अभितः निषण्णहरिणाः गौरीगुरोः पावनाः पादाः (कार्याः), शाखालम्बितवल्कलस्य तरोः अधः कृष्णमृगस्य शृङ्गे वामनयनं कण्डूयमानां मृगीं च निर्मातुम् इच्छामि।

शब्दार्थ—सैकतलीनहंसमिथुना = जिसके रेतीले तट पर हँसयुगल (हंसों का जोड़ा) बैठा हुआ है ऐसी (रेतीले किनारे पर बैठे हुये हंसयुगल वाली)। मालिनी = मालिनी। स्रोतोवहा = नदी। कार्या = चित्रित करनी है (बनानी है)। ताम् अभितः = उसके दोनों ओर। निषण्णहरिणाः = जिस पर हरिण बैठे हुये हैं ऐसी (बैठे हुये हरिणों वाली)। गौरीगुरोः = पार्वती (गौरी) के पिता (गुरु) अर्थात् हिमालय की। पावनाः = पवित्र। पादाः = पहाड़ियाँ। च = और। शाखालम्बितवल्कलस्य = जिसकी शाखाओं (डालियों) पर वल्कल-वस्त्र लटक रहे हैं ऐसे (शाखाओं पर लटकाये गये वल्कल-वस्त्रों वाले)। तरोः = वृक्ष के। अधः = नीचे। कृष्णमृगस्य = कृष्णमृग के (काले हरिण के)। शृङ्गे = सींग पर। वामनयनम् = बाई आँख को। कण्डूयमानाम् = खुजलाती हुयी। मृगीम् = मृगी को (हरिणी को)। निर्मातुम् इच्छामि = बनाने की इच्छा करता हूँ (बनाना चाहता हूँ)।

अनुवाद—जिसके रेतीले (बालुकामय) तट पर हंसयुगल (हंसों का जोड़ा) बैठा हुआ है ऐसी मालिनी नदी चित्रित करनी (बनानी) है। उसके दोनों ओर (पार्वती के पिता) हिमालय की (ऐसी) पवित्र पहाड़ियाँ (बनानी हैं), जिनपर हरिण बैठे हुये हैं। जिसकी शाखाओं (डालियों) पर (सूखने के लिये) वल्कल-वस्त्र लटक रहे हैं ऐसे वृक्ष के नीचे काले हरिण के सींग पर (अपनी) बाईं आँख को खुजलाती हुयी हरिणी को बनाने की इच्छा करता हूँ (बनाना चाहता हूँ)।

संस्कृत व्याख्या—सैकतलीनहंसमिथुना - बालुकामये पुलिने उपविष्टानि हंसानां द्वन्द्वानि यस्याः सा तादृशी, **मालिनी** - एतदाख्या, **स्रोतोवहा** - नदी, **कार्या** - कर्त्तव्या, चित्रयितव्येत्यर्थः, **ताम्** - मालिनीनदीम् , **अभितः** - उभयतः, **निषण्णहरिणाः** - उपविष्टाः मृगाः येषु तथाविधाः, **गौरीगुरोः** - गौर्याः पार्वत्याः गुरोः जनकस्य हिमालयस्य, **पावनाः** -

पवित्रा, **पादाः** – प्रत्यन्तपर्वतभागाः, कार्या इति शेषः, **शाखालम्बितवल्कलस्य** – शाखासु आलम्बितानि अपसारितानि वल्कलानि यस्य तस्य तादृशस्य, **तरोः** – वृक्षस्य, **अधः** – तलेः, **कृष्णमृगस्य** – कृष्णहरिणस्य, **शृङ्गे** – विषाणे, **वामनयनं** – सव्यनेत्रम्, **कण्डूयमानां** – खर्जनं कुर्वतीम् , **मृगीं च** – हरिणीं च, **निर्भातुम्** – आलेखितुम् , **इच्छामि** – वाञ्छामि ।

संस्कृत-सरलार्थः—राजा दुष्यन्तो विदूषकं ब्रवीति यदस्मिन् चित्रे मया चेद्दशी मालिनी नदी चित्रयितव्यास्ति, यस्या बालुकामयपुलिनप्रदेशेषु हंसयुगलानि समुपविष्टानि सन्ति, तां (मालिनीम्) उभयतो हिमालयस्य पावनाः प्रत्यन्तभागा आलेख्या यत्र हरिणा उपविष्टाः सन्ति तथाऽहं शाखावसक्तवल्कलस्य वृक्षास्याधः कृष्णसाराख्यमृगविशेषस्य विषाणे निजवामनेत्रं घर्षयन्तीं हरिणीमपि चित्रयितुं कामये ।

व्याकरण—सैकतलीनहंसमिथुना – सैकते लीनानि हंसमिथुनानि यस्याः सा (बहु०)। स्रोतोवहा – स्रोतस्+वह्+अच्+टाप् । निषण्णहरिणाः – निषण्णाः हरिणाः येषु ते (बहु०) नि+सद+क्त प्र०ब०व० निषण्णा । शाखालम्बितवल्कलस्य – शाखासु लम्बितानि वल्कलानि यस्य तस्य (बहु०) । कण्डूयमाना – कण्डू+शानच्+टाप् द्वि०ए०व० । कार्या – कृ+ण्यत्+टाप् ।

कोष—'पादा प्रत्यन्तपर्वताः' इत्यमरः । 'तोयोत्थितं नत्पुलिनं सैकतं सिकतामयम्' इत्यमरः ।

रस-भाव—यह श्लोक शृङ्गार 'विप्रलम्भ' का अच्छा उदाहरण है । सम्भोग शृङ्गार से सम्बद्ध वस्तुओं / कार्यों के वर्णन से विप्रलम्भ की पुष्टि होती है ।

विशेष—(१) चित्र में चित्रित 'स्रोतोवहा मालिनी' से रमणीयता, 'गौरीगुरोः' से निर्बाध विचरण, 'निषण्णचमराः' से स्थान की एकान्तता, सुरतक्षमता, मृगी का मृग की सींग में नयन का खुजलाना 'कण्डूयमानां मृगीम् – ये सभी वस्तुयें कामोद्दीपक है । ये सभी आश्रम-निवास के प्रसङ्ग में दुष्यन्त द्वारा देखी गयी थीं । उन्होंने उनका साक्षात् अनुभव किया था । (२) खुजलाती हुयी मृगी 'कण्डूयमानां मृगीम्' यह चित्र कामशास्त्र के अनुसार सम्भोग शृङ्गार का सूचक है । क्योंकि सम्भोग की इच्छा होने पर हरिणी के वामनयन में तथा स्त्रियों के मदनालय में कण्डूति (खुजलाहट) होती है । कहा भी गया है—'रिंसा यत्र जायेत कण्डूतिस्तत्र जायते । मृगीणां वामनयने योषितां मदनालये ।।

अलङ्कार—(१) प्रस्तुत श्लोक में 'कार्या' इस एक क्रिया के अप्रस्तुत 'स्रोतोवहा मालिनी' तथा 'गौरीगुरोः पावनाः' इन पदार्थों के साथ कर्मरूप से सम्बन्ध होने के कारण 'तुल्ययोगिता' अलङ्कार है । यहाँ दो अप्रस्तुत पदार्थों का एक क्रिया रूप धर्म के साथ सम्बन्ध प्रतिपादित है । ल०द्र० ३/१७ श्लो० । (२) वस्तुओं का स्वाभाविक वर्णन होने से **'स्वाभावोक्ति'** अलङ्कार है । ल०द्र० १/७ श्लो० । (३) कुछ लोग 'गौरीगुरोः' में प्रसङ्ग से वर्णन होने के कारण **'उदात्त'** अलङ्कार मानते हैं । उदात्त का लक्षण है—लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते । यद्यपि प्रस्तुस्याङ्गं महतां चरितं भवेत् अर्थात् लोकोत्तर वैभव का वर्णन अथवा महनीय पुरुषों के चरित्र का वर्णन जो प्रस्तुत वर्ण्य वस्तु के अङ्ग या उपकारक के रूप में प्रतीत होता है, 'उदात्तालङ्कार' कहलाता है । (४) लीनलिनी, 'गौरीगुरोः' मृगमृगीम् आदि में **अनुप्रास** है ।

छन्द—श्लोक में **'शार्दूलविक्रिडित'** छन्द है । ल०द्र० १/१४ श्लो० ।

विदूषकः—(आत्मगतम्) **यथाहं पश्यामि पूरितव्यमनेन चित्रफलकं लम्बकूर्चानां तापसानां कदम्बैः ।** (जह अहं देक्खामि पूरिदव्वं णेण चित्तफलअं लम्बकुच्चाणं तावसाणं

कदम्बहि ।)

व्या० एवं श०—पूरितव्यम् - पूरी+तव्यत् = भर दिया जाना। लम्बकूर्चानाम् - लम्बा: दीर्घा: कूर्चा: श्मश्रवो येषां ते (ब०ब्री०) = लम्बी दाढ़ी वाले। कदम्बैः = झुण्डों से।

विदूषक—(अपने मन में) जैसा मैं देख रहा हूँ कि इनके द्वारा यह चित्रपट लम्बी दाढ़ी वाले तपस्वियों के झुण्ड से भर दिया जायेगा।

टिप्पणी—'कूर्चोऽस्त्रीश्मश्रुपीठयो:' इति केशव:।

राजा—वयस्य, अन्यच्च। शकुन्तलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः।

व्या० एवं श०—प्रसाधनम् = सजावट, अलङ्करण। 'आकल्पवेशौ नेपथ्यं प्रतिकर्म प्रसाधनम्' इत्यमर:। अभिप्रेतम् - अभि+प्र+इण्+क्त = इष्ट। विस्मृतम् - वि+स्मृ+क्त = भूल गया।

राजा—हे मित्र, और भी। शकुन्तला की जो सजावट हम करना चाहते थे, वह यहाँ (चित्र में) भूल ही गये हैं ?

विदूषकः—किमिव ? (किं विअ ?)

विदूषक—वह क्या ?

सानुमती—वनवासस्य सौकुमार्यस्य विनयस्य च यत्सदृशं भविष्यति। (वणवासस्स सोउमारस्स विणअस्स अ जं सरिसं भविस्सदि।)

व्या० एवं श०—सौकुमार्यस्य - सुकुमारस्य भाव: सौकुमार्यम् तस्य (ष०त०) = सुकुमारता का।

सानुमती—जो वनवास, सुकुमारता और विनय के अनुकूल होगा।

राजा—

कृतं न कर्णार्पितबन्धनं सखे शिरीषमागण्डविलम्बिकेसरम्।
न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे।। १८।।

अन्वय—सखे, कर्णार्पितबन्धनम्, आगण्डविलम्बिकेसरं शिरीषं न कृतम्, वा स्तनान्तरे शरच्चन्द्रमरीचिकोमलं मृगालसूत्रं न रचितम्।

शब्दार्थ—सखे = हे मित्र! कर्णार्पितबन्धनम् = जिसका डण्ठल कानों में लगाया गया (फँसाया गया) है ऐसा (कानों में लगाये गये डण्ठल वाला)। आगण्डविलम्बिकेसरम् = जिसका केसर (पराग) कपोलों तक लटक रहा है ऐसा (कपोलों तक लटकते हुये केसर वाला)। शिरीषम् = शिरीष का पुष्प। न = नहीं। कृतम् = चित्रित किया गया है। वा = और। स्तनान्तरे = स्तनों के बीच में। शरच्चन्द्रमरीचिकोमलम् = शरद ऋतु के चन्द्रमा की किरणों के समान कोमल। मृणालसूत्रम् = कमल-नाल का हार। न = नहीं। रचितम् = रचा गया है (बनाया गया है)।

अनुवाद—हे मित्र, कानों में संलग्न डण्ठल वाला और कपोलों तक लटकते हुये केसर (पराग) वाला शिरीष (शिरस) का पुष्प नहीं चित्रित किया गया है तथा स्तनों के बीच में शरद् ऋतु के चन्द्रमा की किरणों के समान कोमल कमल-नाल का हार (भी) नहीं रचा गया (बनाया गया) है।

संस्कृत व्याख्या—सखे - हे मित्र, **कर्णार्पितबन्धनं** - कर्णे आरोपितं बन्धनं वृन्तं यस्य तत्, **आगण्डविलम्बिकेसरं** - आगण्डं कपोलपर्यन्तं लम्बमाना: केसरा: किञ्जल्का: यस्य

तत् , **शिरीषं** – शिरीषपुष्पम् , **न** – नहि, **कृतं** – रचितम् , **वा** – तथा, **स्तनान्तरे** – पयोधरयो मध्ये, **शरच्चन्द्रमरीचिकोमलं** – शरच्चन्द्रस्य – मरीचयः किरणाः तद्वत् सुकुमारम् , **मृणालसूत्रं** – मृणालमयो हारः, **न** – नहि, **रचितं** – चित्रितम् ।

संस्कृत-सरलार्थः—राजा चित्रविषये विदूषकं वदति 'मित्र' कर्णनिवेशितबन्धनं कपोलपर्यन्तप्रसृतकिञ्जल्कं शिरीषपुष्पं चित्रे न रचितमस्ति । पयोधरयोर्मध्यभागे शरदिन्दुकिरणकोमलो मृणालमयो हारोऽपि न रचितः ।

व्याकरण—कर्णार्पितबन्धनं – कर्णयोः अर्पितं बन्धनं यस्य तत् (बहु०) । आगण्डविलम्बिकेसरं – आगण्डं बिलम्बिनः केसराः यस्य तत् (बहु०) । स्तनान्तरे – स्तनयोः अन्तरे (तत्पु०) । शरच्चन्द्रमरीचिकोमलं – शरदः चन्द्रः शरच्चन्द्रः, तस्य भरीचिवत् कोमलम् (तत्पु०) ।

अलङ्कार—(१) इस श्लोक में 'कृतम्' तथा 'रचितम्' इन दो क्रियाओं का समुच्चय होने से **'समुच्चय'** अलङ्कार है । ल०द्र० २/५ श्लो० । (२) 'शरच्चन्द्रमरीचिकोमलम्' (शरदिन्दोः मरीचिवत् किरणवत् कोमलम्) में **'उपमा'** (समासगावाचकलुप्तोपमा) अलङ्कार है । ल०द्र० १/५ श्लो० । (३) यहाँ मृणाल सूत्रों से स्तनों के मध्य भाग की तथा स्तनों के मध्य भाग से मृणालसूत्र की शोभा बढ़ने के कारण अन्योन्य शोभाधायक होने से 'अन्योन्य' अलङ्कार है । लक्षण – 'अन्योन्यमुभयोरेकक्रियायाः करणं मिथः' ।

छन्द—यहाँ 'वशंस्थ' छन्द है । ल०द्र० ५/१७ श्लो० ।

विदूषकः—भोः, किं नु तत्रभवती रक्तकुवलयपल्लवशोभिनाऽग्रहस्तेन मुखमावार्य चकितचकितेव स्थिता । (सावधानं निरुप्य दृष्ट्वा) **आः, एष दास्याः पुत्रः कुसुमरसपाटच्चरस्तत्रभवत्या वदनकमलमभिलङ्घते मधुकरः ।** (भो, किं णु तत्तहोदी रत्तकुवलअपल्लवसोहिणा अग्गहत्थेण मुहं आवारिअ चइदचइदा विअट्ठि आ । आ, एसो दासीएपुत्तो कुसुमरसपाडच्चरो ततहोदीए वअणकमलं अहिलङ्घेदि महुअरो ।)

व्या० एवं श०—रक्तकुवलयपल्लवशोभिना – रक्तकुवलयस्य रक्तकमलस्य पत्रम् तद्वत् शाभिना सुन्दरेण = रक्तकमल के नवपल्लव के समान सुशोभित । यह पद 'अग्रहस्तेन' पद का विशेषण है । अग्रहस्तेन – हस्ताग्रेण = हाथ के अगले भाग से । आवार्य – आ+वृ+णिच्+क्त्वा – ल्यप् = ढक कर । चकितचकिता – चकितात् चकिता सह सुपा से समास = अत्यन्त भयभीत । चकितः शङ्कितोभीतः इति त्रिकाण्डकोषः । दास्याः पुत्रः (ष०त०) = नीच । यहाँ निन्दा अर्थ होने से 'पुत्रेऽन्यतरस्याम्' सूत्र से षष्ठी का अलुक है । कुसुमरसपाटच्चरः – कुसुमरसस्य पाटच्चरः (ष०त०) = पुष्प रस को चुराने वाला । पाटयन् छिन्दन् चरति – पाटच्चरः चोरः । 'प्रसूनं कुसुमं समम्' इत्यमरः । अभिलङ्घते = आक्रमण कर रहा है । वार्यताम् – वृ+णिच्+यक् (कर्मवाच्य) लोट्+प्र०पु०ए०व० = रोका (हटाया) जाय ।

विदूषक—हे (मित्र), आदरणीया (शकुन्तला) लाल कमल के नये पत्ते के समान सुशोभित हाथ के अगले भाग (अर्थात् अङ्गुलियों) से मुख को ढककर अत्यन्त भयभीत सी खड़ी हैं । (सावधानी से विचार कर और देखकर) ओह, यह नीच (दासी का बेटा) पुष्प के रस को चुराने वाला भ्रमर मान्या (शकुन्तला) के मुखकमल पर आक्रमण कर रहा (मँडरा रहा) है ।

राजा—ननु वार्यतामेष धृष्टः ।

व्या० एवं श०—वार्यताम् = रोका (हटाया) जाय।

राजा—तो यह ढीठ (भ्रमर) रोका (हटाया) जाय (अर्थात् इस ढीठ भौंरे को हटाओ)।

विदूषकः—भवानेवाविनीतानां शासितास्य वारणे प्रभविष्यति। (भवं एव्व अविणीदाणं सासिदा इमस्स वारणे पहविस्सदि।)

व्या० एवं श०—शासिता – शास्+तृच् = शासक (दण्ड देने वाले)। वारणे – वृ+णिच्+ल्युट् स०ए०व० = निवारण में। प्रभविष्यति = समर्थ होंगे।

विदूषकः—दुष्टों के शासक (दण्ड देने वाले) आप ही इसके निवारण (अर्थात् इसको हटाने) में समर्थ होंगे।

राजा—युज्यते। अयि भोः कुसुमलताप्रियातिथे, किमत्र परिपतनखेदमनुभवसि?

व्या० एवं श०—कुसुलताप्रियातिथे – कुसुमलतायाः प्रियातिथिः तत्सम्बोधने = पुष्पलता के प्रिय अतिथि। परिपतन खेदम् (शकुन्तला के मुख के चारों ओर) चक्कर लगाने का कष्ट।

राजा—ठीक है। अरे हे पुष्पलता के प्रिय अतिथि, तुम क्यों यहाँ (शकुन्तला के मुखमण्डल के चारों ओर) चक्कर काटने (अर्थात् मँडराने) का कष्ट उठा रहे हो?

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति॥ १९॥

अन्वय—(त्वयि) अनुरक्ता एषा मधुकरी तृषिता सती कुसुमनिषण्णा अपि भवन्तं प्रतिपालयति, त्वया विना मधु न खलु पिबति।

शब्दार्थ—(त्वयि) अनुरक्ता = (तुम पर) अनुरक्त, तुमसे प्रणय करने वाली। एषा = यह। मधुकरी = भ्रमरी। तृषिता सती = प्यासी होती हुयी। कुसुमनिषण्णा अपि = पुष्प पर बैठी हुयी भी। भवन्तम् = आप की, तुम्हारी। प्रतिपालयति = प्रतीक्षा कर रही है। त्वया = तुम्हारे। विना = बिना। मधु = पुष्परस को। न खलु = नहीं ही। पिबति = पी रही है।

अनुवाद—(तुम पर) अनुरक्त यह भ्रमरी, प्यासी होकर पुष्प पर बैठी हुयी भी (तुम्हारी) प्रतीक्षा कर रही है। तुम्हारे बिना पुष्परस को (भी) नहीं पी रही है।

संस्कृत व्याख्या—अनुरक्ता – (त्वयि) अनुरागवती, **एषा** – इयम्, **मधुकरी** – भ्रमरी, **तृषिता सती** – पिपासिता सती, **कुसुमनिषण्णा अपि** – कुसुमे पुष्पे निषण्णा स्थिता अपि, **भवन्तं** – प्रेमास्पदं त्वां भ्रमरम्, **प्रतिपालयति** – प्रतीक्षते; **त्वया विना** – भवता प्रियेण विना, **मधु** – पुष्परसम्, **न खलु** – नैव, **पिबति** – गृह्णाति।

संस्कृत-सरलार्थः—प्रेमाभिभूतो राजा विदूषकं सम्बोधयन् कथयति 'भ्रमर! त्व कथं शकुन्तलामुखं परितः भ्रमसि? पुष्पोपरि स्थिता तव प्रणयिनी भ्रमर्येकाकिनी पिपासिता सत्यपि प्रेमभाजनं त्वां प्रतीक्षते। सम्प्रति त्वामन्तरा पुष्परसं नैव पिबति – इति।

व्याकरण—अनुरक्ता – अनु+रञ्ज+क्त+टाप् = अनुरागवती। कुसुमनिषण्णा – कुसुमे निषण्णा (तत्पु०)। प्रतिपालयति – प्रति+पाल्+णिच् (स्वार्थे), लट्, प्र०पु०, एक०। त्वया विना – 'त्वया' में 'विना' के योग में तृतीया।

रस-भाव—शृङ्गार (विप्रलम्भ) रस है। भ्रमरी (मधुकरी) का आलम्बन विभाव भ्रमर (मुधकर) है।

अलङ्कार—(१) इस श्लोक में मधुकर एवं मधुकरी पर क्रमशः नायक तथा नायिका के व्यवहार का आरोप है अतः **'समासोक्ति'** अलङ्कार है। ल०द्र० १/२३ श्लो०।

छन्द—'आर्या' छन्द है। ल०द्र० १/२ श्लो०।

सानुमती—अद्याभिजातं खल्वेषवारितः। (अज्ज अभिजादं क्खु एसो वारिदो।)

व्या० एवं श०—अभिजातम् = श्रेष्ठ कुल के अनुरूप (अत्यन्त शिष्ट) ढंग से। 'न्याये कुलीनबुधयोरभिजातपदं विदुः' इति शाश्वतः। खल्वेष – खलु+एष – यण्। वारितः – वृ+णिच्+क्त = रोका गया।

सानुमती—आज (इस दशा में) (राजा द्वारा) यह (भ्रमर) अत्यन्त शिष्ट ढङ्ग से रोका गया है।

विदूषकः—प्रतिषिद्धाऽपि वामैषा जातिः। (पडिसिद्धा वि वामा एसा जादी।)

व्या० एवं श०—प्रतिषिद्धा – प्रति+सिध्+क्त+टाप् = रोकी (मना की) गयी। वामा = विपरीत (उल्टा) काम करने वाली।

विदूषक—यह (भ्रमर) जाति रोकी जाने पर भी विपरीत (उल्टा) कार्य करने वाली (होती है)।

राजा—एवं भोः, न मे शासने तिष्ठसि ? श्रूयतां तर्हि सम्प्रति—

राजा—क्यों रे, तू मेरे आदेश (शासन) में नहीं है (अर्थात् मेरी आज्ञा नहीं मानता है) ? तो अब तू सुन ले—

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं स्पृशसि चेद् भ्रमर प्रियाया—
स्त्वां कारयामि कमलोदरबन्धनस्थम्॥ २०॥

अन्वय—भ्रमर, अक्लिष्टबालतरुपल्लवलोभनीयं मया रतोत्सवेषु सदयम् एव पीतं प्रियायाः बिम्बाधरं चेत् स्पृशसि, त्वां कमलोदरबन्धनस्थं कारयामि।

शब्दार्थ—भ्रमर = हे भ्रमर ! अक्लिष्टबालतरुपल्लवलोभनीयम् = न मुरझाये हुये (अथवा किसी के द्वारा स्पर्श न किये गये)। अक्लिष्ट – 'बालतरु... लोभनीयम्' नवीन तरु पल्लव के समान लुभावने (मनोहर)। मया = मेरे द्वारा। रतोत्सवेषु = सुरतोत्सव में (रतिकाल में)। सदयम् = दयापूर्वक। एव = ही। पीतम् = पिये गये (चुम्बन किये गये)। प्रियायाः = प्रिया (शकुन्तला) के। बिम्बाधरम् = बिम्बफल के समान (लाल) अधर को। चेत् = यदि। स्पृशसि = स्पर्श करते हो (करोगे तो)। त्वाम् = तुमको। कमलोदरबन्धनस्थम् = कमल के मध्य-भाग (उदर) रूपी कारागार (बन्धन) में स्थित (बन्द)। कारयामि = करा देता हूँ (करा दूँगा)।

अनुवाद—हे भ्रमर, न मुरझाये हुये (अथवा किसी के द्वारा स्पर्श न किये गये) नवीन तरुपल्लव के सामन लुभावने (मनोहर) तथा मेरे द्वारा रतिकाल में (भी) दयापूर्वक पान किये गये (मेरी) प्रिया (शकुन्तला) के बिम्बफल के समान (लाल) अधर को यदि तुम छूओगे (तो) तुमको कमल के मध्य-भाग रूपी कारागार में स्थित (बन्द) करा दूँगा।

संस्कृत व्याख्या—भ्रमर – हे मधुकर ! **अक्लिष्टबालतरुपल्लवलोभनीयं** – आक्लिष्टः अम्लानः यः तरुपल्लवः वृक्षपत्रं तद्वत् मनोहरम् , **मया** – तत्सौन्दर्यवशीभूतेन दुष्यन्तेन, **रतोत्सवेषु** – सुरतोत्सवेषु, **सदयम् एव** – सानुकम्पमेव, **पीतम्** – आस्वादितम् , चुम्बितमित्यर्थः, **प्रियायाः** – शकुन्तलायाः, **बिम्बाधारं** – बिम्बफलसदृशमधरोष्ठम् , **चेत्** – यदि, **स्पृशसि** – स्पर्शं करोषि, **त्वां** – भ्रमरम् , **कमलोदरबन्धनस्थं** – कमलस्य उदरं मध्यभागरूपं यद् बन्धनं कारागृहं तत्र तिष्ठति यः तादृशम्, **कारयामि** – कारयिष्यामि ।

संस्कृत-सरलार्थः—भ्रमरं सम्बोधयन् राजा कथयति – 'भ्रमर ! यदि त्वं मत्प्रियाया (शकुन्तलायाः) अम्लाननूतनतरुपल्लवदाकर्षकं पक्वबिम्बलसदृशारक्तं रतिकालेऽपि मया दुष्यन्तेन सदयं पीतञ्चाधरोष्ठं दशसि तर्हि त्वामहं कमलोदररूपकारागृहं प्रापयामि (प्रापयिष्यामीत्यर्थः) ।

व्याकरण—अक्लिष्टबालतरुपल्लवलोभनीयं – अक्लिष्टश्च बालश्च यः तरुपल्लवः, तद्वत् लोभनीयम् (कर्म०) । कमलोदरबन्धनस्थं – कमलस्य उदररूपं यद् बन्धनं तत्र तिष्ठतीति । बिम्बाधरम् – बिम्बसद्दृमधरम् बिम्बाधरं मध्यमपदलोपी समास । कमलोदरबन्धनस्थम् – कमलस्य उदरम् अभ्यन्तरमेव बन्धनम् कारागारं तत्रस्थं (तत्र निबद्धम्) ।

अलङ्कार—(१) 'अक्लिष्ट... लोभनीयम्' में उपमा (समासगा वाचकलुप्तोपमा) अलङ्कार है क्योंकि यहाँ उपमावाचक पद 'वति' प्रत्यय समास में लुप्त हो गया है । ल०द्र० १/५ श्लो० । इसी प्रकार 'बिम्बाधरम्' (बिम्बसदृशमधरम्) में भी **'समासगावाचकलुप्तोपमा'** है । (२) कमलोदरबन्धनस्थम् – कमल के भीतर भ्रमर का बन्द हो जाना स्वाभाविक है पर राजा के द्वारा अपने प्रयोजन के लिए अध्यवसित कर दिया गया है अतः 'अतिशयोक्ति' अलङ्कार है । ल०द्र० १/२३ श्लो० । (३) 'कमलोदरबन्धनस्थम्' में कमलोदर में बन्धन कारागार का आरोप होने से 'रूपक' है । ल०द्र० २/१६ श्लो० ।

छन्द—यहाँ 'वसन्ततिलका' छन्द है । ल०द्र० १/८ श्लो० ।

टिप्पणी—यहाँ 'व्यवसाय' नामक सन्धि का अङ्ग है । व्यवसाय का लक्षण है – व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतु सम्भव ।

विदूषकः—एवं तीक्ष्णदण्डस्य किं न भेष्यति ? (प्रहस्य । आत्मगतम्) **एष तावदुन्मतः । अहमप्येतस्य सङ्गेनेदृशवर्ण इव संवृत्तः** (प्रकाशम्) **भोः चित्रं खल्वेतत् ।** (एव्वं तिक्खणदण्डसस किं ण भाइस्सदि ? एसो दावं उम्मत्तो । अहं पि एदस्स संगण ईदिसवण्णो विअ संवुत्तो । भो, चित्तं क्खु एद ।)

व्या० एवं श०—तीक्ष्णदण्डस्य – तीक्ष्णः कठोरः दण्डः यस्य = कठोर दण्ड वाले । यहाँ शेषत्वविवक्षा में षष्ठी है । ईदृशः वर्णः यस्य स = इसी प्रकार का (उन्मत्त) ।

विदूषक—इस प्रकार कठोर दण्ड देने वाले (आप) से (यह) क्यों नहीं डरेगा । (हँसकर, अपने मन में) यह (राजा) तो पागल (उन्मत) हो गया है । मैं भी इस (राजा) की सङ्गति के कारण इसी प्रकार का (अर्थात् पागल जैसा) हो गया हूँ । (प्रकट रूप में) हे (मित्र), यह तो चित्र है (वास्तविक दृश्य नहीं है) ।

राजा—कथं चित्रम् ?

राजा—क्या (यह) चित्र है ?

सानुमती—अहमपीदानीमवगतार्था । किं पुनर्यथालिखितानुभाव्येषः । (अहं पि दाणिं अवगदत्था। किं उण जहालिहिदाणुभावी एसो।)

व्या० एवं श०—अवगतार्था – अवगतः ज्ञातः अर्थः (वस्तु) मया तादृशी (ब०ब्री०) = यथार्थ को जानने वाली। यथालिखितानुभावी – यथालिखितम् लिखितानुरूपम् अनुभवति ध्यायति यस्तादृशः = चित्रानुसार अनुभव करने वाले।

सानुमती—मैं भी यथार्थ को अब समझ पायी हूँ (कि यह चित्र है)। फिर चित्र के अनुसार अनुभव करने वाले इस राजा का क्या कहना!

राजा—वयस्य, किमिदमनुष्ठितं पौरोभाग्यम् ?

व्या० एवं श०—पौरोभाग्यम् – पुरोमगिनः दुष्कर्मनिरतस्य कार्यम् – पुरोभागिन्+ष्यञ् अन्त्यलोप वृद्धि = ईर्ष्या, दोषदर्शन, यहाँ दोषदर्शन कराकर धृष्टता से अभिप्राय है। अमरकोष के अनुसार दोषपरक दृष्टि रखने वाले को पुरोभागी कहते हैं—'दोषैकदृक् पुरोभागी'। अनुष्ठितम् – अनु+स्था+क्त = किया।

राजा—हे मित्र, तुमने क्या धृष्टता (ढिठायी) कर दी ?

टिप्पणी—राजा (दुष्यन्त) चित्र में शकुन्तला को साक्षात् मानकर सुख का अनुभव कर रहे थे। पर विदूषक ने चित्र को वास्तविक चित्र बताकर राजा के आनन्द को भग्न कर दिया। यही उसकी पुरोभागिता (दोषदर्षिता) धृष्टता है।

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ।। २१ ।।

अन्वय—तन्मयेन हृदयेन साक्षात् इव दर्शनसुखम् अनुभवतः मे स्मृतिकारिणा त्वया कान्ता पुनः अपि चित्रीकृता।

शब्दार्थ—तन्मयेन = तल्लीन। हृदयेन = हृदय से। साक्षात् इव = मानो साक्षात् (प्रत्यक्ष)। दर्शनसुखम् = दर्शन के सुख का। अनुभवतः = अनुभव करते हुये (अनुभव करने वाले)। मे = मुझको। स्मृतिकारिणा = (यह चित्र है, इस प्रकार) स्मरण करा देने वाले। त्वया = तुम्हारे द्वारा। कान्ता = पत्नी, प्रिया। पुनरपि = फिर से। चित्रीकृता = चित्र बना दी गयी है।

अनुवाद—तन्मय हृदय से मानो (प्रिया के) साक्षात् दर्शन सुख का अनुभव करने वाले मुझको, (यह चित्र है ऐसा) स्मरण करा देने वाले तुम्हारे द्वारा (मेरी) प्रिया (शकुन्तला) फिर से चित्र बना दी गयी है (आँसुओं को बहाता है)।

संस्कृत व्याख्या—तन्मयेन – शकुन्तलामयेन, **हृदयेन** – चित्तेन, **साक्षादिव** – प्रत्यक्षमिव, **दर्शनसुखं** – दर्शनानन्दम्, **अनुभवतः** – विभावयतः, **मे** – मम, **स्मृतिकारिणा** – 'भोः चित्रमेतत्' इति स्मरणं जनयता, **त्वया** – पौरोभाग्यं भजमानेन विदूषकेन, **कान्ता** – प्रिया (शकुन्तला), **पुनरपि** – भूयोऽपि, **चित्रीकृता** – आलेख्यरूपेण परिणमिता।

संस्कृत-सरलार्थः—राजा विदूषकं प्रबीति – यदाऽहं शकुन्तलासंलग्नेन चेतसा साक्षाद्दर्शनसुखमनुभवन्नासम् तदा त्वया 'चित्रमिदं न शकुन्तलेति' स्मृतिं जनयता सा मे प्रिया (शकुन्तला) पुनरपि चित्रगता कृता।

व्याकरण—दर्शनसुखम् – दर्शनस्य सुखम् (तत्पु०)। स्मृतिकारिणा – स्मृतिं करोतीति – स्मृति+कृ+णिनि। चित्रीकृता – चित्र+च्वि+कृ+क्त+टाप्।

अलङ्कार—(१) इस श्लोक में 'साक्षादिव' में 'वाच्योत्प्रेक्षा' अलङ्कार है क्योंकि इसमें 'इव' आदि उत्प्रेक्षावाचक पदों का साक्षात् प्रयोग हुआ है। ल०द्र० १/१८ श्लो०। 'चित्रीकृता' में गम्योत्प्रेक्षा है। इसमें 'इव' आदि उत्प्रेक्षावाचक पदों का प्रयोग नहीं हुआ है।

विशेष—कुछ आयार्य यहाँ 'भ्रान्तिमान्' अलङ्कार मानते हैं। भोजराज ने 'सरस्वतीकण्ठाभरण' में इस श्लोक को 'स्मरण' अलङ्कार के रूप में उद्धृत किया है। 'अनुप्रास' भी है।

छन्द—यहाँ 'पथ्यावक्त्र' छन्द है। ल०द्र० ३/१७ श्लो०।

टिप्पणी—राजा चित्र में चित्रित शकुन्तला को उन्माद के कारण वास्तविक शकुन्तला समझ रहे थे। विदूषक ने राजा को याद दिला दिया कि 'महाराज यह तो चित्र है'। चित्र को समझकर राजा ने वह आनन्द लेना खो दिया जिससे उन्हें कष्ट हो रहा है।

सानुमती—पूर्वापरविरोध्यपूर्व एष विरहमार्गः। (पुव्वावरविरोही अपुव्वो ऐसा विरहमग्गो)।

व्या० एवं श०—पूर्वापरविरोधी – पूर्वस्य – प्रथमावस्थायाः – अपरस्य – अन्यस्य उत्तरार्द्धावस्थायाश्च यो विरोधः वैपरीत्यं तद्वान् = पहले शकुन्तला का प्रत्याख्यान सम्प्रति उसके लिये शोकातिशय से युक्त।

सानुमती—पहली और बाद की घटना का विरोधी यह विरहमार्ग निराला (अपूर्व) है। अर्थात् यह विरह का मार्ग आगे और पीछे की बातों से तालमेल न रखने वाला अपूर्व है।

टिप्पणी—राघवभट्ट के अनुसार सानुमती के इस कथन का अभिप्राय यह है—राजा पहले चित्र को चित्र समझता है। फिर उन्मादवश उसे वास्तविक शकुन्तला समझता है और अब अन्त में उसे पुनः चित्र समझता है। यहीं परस्पर विरोधिता है। जीवानन्द विद्यासागर एवं काले आदि विद्वानों के अनुसार पहले राजा द्वारा शकुन्तला की अवहेलना और अब उसके लिये पश्चात्ताप – यही विरोधिता है।

राजा—वयस्य, कैथमेवमविश्रान्तदुःखमनुभवामि ?

व्या० एवं श०—अविश्रान्तदुःखम् – अविश्रान्तम् अनवरतं दुःखम् = निरन्तर दुःख का।

राजा—हे मित्र, मैं क्यों इस प्रकार निरन्तर (कभी शान्त न होने वाले, अविश्रान्त) दुःख का अनुभव कर रहा हूँ ?

प्रजागरात् खिलीभूतस्तस्याः स्वप्ने समागमः।
वाप्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि॥ २२॥

अन्वय—प्रजागरात् तस्याः स्वप्ने समागमः खिलीभूतः, तु वाष्पः चित्रगताम् अपि एनां द्रष्टुं न ददाति।

शब्दार्थ—प्रजागरात् = जागते रहने के कारण (नींद न आने के कारण)। तस्याः = उसका। स्वप्ने = स्वप्न में। समागमः = मिलन। खिलीभूतः = रुक गया है (असम्भव हो गया है)। तु = और। वाष्पः = आँसू। चित्रगताम् = चित्रस्थित (चित्रलिखित)। अपि = भी। एनाम् = इसको। द्रष्टुम् = देखने। न = नहीं। ददाति = देता है।

अनुवाद—(रात भर) जागते रहने के कारण उस (शकुन्तला) का स्वप्न में समागम (मिलन) अवरुद्ध हो गया है और आँसू चित्रस्थित भी इस (शकुन्तला) को देखने नहीं देता है।

संस्कृत व्याख्या—प्रजागरात् - (रात्रौ) प्रकर्षेण जागरणात् , **तस्याः** - (प्रेयस्याः) शकुन्तलायाः, **स्वप्ने** - निद्रायाम् , **समागमः** - सङ्गमः, **खिलीभूतः** - निरुद्धः, **वाष्पस्तु** - अश्रुप्रवाहस्तु, **चित्रगताम् अपि** - आलेख्यगताम् अपि, **एनां** - शकुन्तलाम् , **द्रष्टुं न ददाति** - दर्शनयोग्यां न करोति।

संस्कृत-सरलार्थः—राजा स्वमित्रं विदूषकं स्वदयनीयदशां प्रकाशयन् वदति - यन्निशायामधिकजागरणात् तस्याः शकुन्तलायाः स्वप्ने सम्मेलनमसम्भवं जातम्। चित्रदर्शनकालेऽनवरताश्रुप्रवाहाच्चित्रगतामपि तां द्रष्टुं न प्रभवामीति मे महती विडम्बना।

व्याकरण—प्रजागरात् - प्र+जागृ+घञ् = हेतु में पञ्चमी = जागने के कारण। खिलीभूतः - खिल+च्वि+भू+क्त = रुक गया है (अवरुद्ध हो गया है) 'खिल' का अर्थ ऊसर भूमि होता है। यहाँ उसका अभिप्राय अवरुद्ध (असम्भव) है।

रस-भाव—'विप्रलम्भ' शृङ्गार है। नूनं वार्यतामेष धृष्टः से लेकर यहाँ तक तन्मयत्व - प्रवास विप्रलम्भ अवस्था दिखायी गयी है उसका लक्षण है—तन्मयं तत्प्रकाशो हि बाह्याभ्यन्तरतस्था। विप्रलम्भ चार प्रकार का होता है—(१) पूर्वरागात्मक, (२) मानात्मक, (३) प्रवासात्मक, (४) करुणात्मक।

अलङ्कार—(१) यहाँ रात्रिजागरण और वाष्प ये दो (हेतु) क्रमशः कार्यभूत अनिद्रा एवं (चित्र में) अदर्शन के कारण रूप से उपन्यस्त है अतः 'हेतु' नामक अलङ्कार है!

छन्द—'पथ्यावक्त्र' छन्द है। ल०द्र० ३/१७ श्लो०।

टिप्पणी—(१) वियोगावस्था में रात्रिजागरण के कारण निद्रा के अभाव में न स्वप्न में शकुन्तला का दर्शन हो पाता है और चित्र दर्शन के समय आँखों में आँसू भर जाने के कारण न चित्र में दर्शन हो पाता है। (२) श्लोक के इसी भाव से सम्बद्ध अन्य सूक्तियाँ भी द्रष्टव्य हैं—(क) 'त्वामालिख्य... आलुप्यते मे' मेघदूत। (ख) 'कथमुपलभे निद्रां स्वप्ने समागमकारिणीम्' (विक्रमो०)। (ग) 'मत्संभोगः कथमुपनयेत् स्वप्नजोऽपीति...' (मेघदूत)। (३) यहाँ 'दर्शनसुखम्' से लेकर यहाँ तक **'विरोधन'** नामक अवमर्श सन्धि का अङ्ग है क्योंकि यहाँ सुखानुभव कार्य के प्रति आ जाने वाले विघ्न को दिखाया गया है। लक्षण है—'कार्यात्ययोपशमनं विरोधनमिति स्मृतम्'।

सानुमती—सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं शकुन्तलायाः। (सव्वहा पमज्जिदं तु ए पच्चादेसदुक्खं सउन्दलाए।)

व्या० एवं श०—प्रमार्जितम् - प्र+मृज्+णिच्+क्त = शुद्ध कर दिया-दूर कर दिया। प्रत्यादेशदुःखम् - प्रत्यादेशस्य-प्रत्यादेशस्य दुःखम् = परित्याग (तिरस्कार) के दुःख को।

सानुमती—तब शकुन्तला के परित्याग का दुःख तुम्हारे द्वारा सब प्रकार से धो दिया (दूर कर दिया) गया है।

(प्रविश्य) चतुरिका—जयतु जयतु भर्ता। वर्तिकाकरण्डकं गृहीत्वेतोमुखं प्रस्थितास्मि। (जेदु जेदु भट्टा। वट्टिआकरण्डअं गेण्हिअं इदोमुहं पत्थिदम्हि।)

व्या० एवं श०—वर्तिकाकरण्डकम् - वर्तिकायाः चित्रलेखनसाधनीभूतायाः तूलिकाया-

करण्डकम् – पेटकम् = कूचियों तूलिकाओं (ब्रशों) की पेटी को। इतोमुखम् – इत: अस्यां दिशि, मुखम् आननम् यस्मिन् कर्मणि यथा तया = इधर की ओर मुख किये। प्रस्थिता – प्र+स्था+क्त+टाप् = चली थी – आ रही थी।

(प्रवेश कर) **चतुरिका**—जय हो, स्वामी की जय हो (चित्र में रङ्ग भरने के लिये) कूचियों की पेटी (वर्तिकाकरण्डक) को लेकर मैं इधर की ओर आ रही थी।

राजा—किं च ?

राजा—फिर क्या हुआ ?

चतुरिका—स मे हस्तादन्तरा तरलिकाद्वितीयया देव्या वसुमत्याऽहमेवार्यपुत्रस्योपनेष्यामीति सबलात्कारं गृहीतः। (सो मे हत्थादो अन्तरा तरलिआदुदीआए देवीए वसुमदीए अहं एव्व अज्जउत्तस्स उवणइस्सं त्ति सबलक्कारं गहीदो।)

व्या० एवं श०—अन्तरा = मार्ग के बीच में। तरलिकाद्वितीयया – तरलिका – तदभिधाना दासी, द्वितीया-सङ्गिनी यस्या: सा तया = तरलिका है साथी (सङ्गिनी) जिसकी ऐसी। यह पद 'देव्या' इस पद का विशेषण है। उपनेष्यामि – उप+नी+लृट्+उ०पु०ए०व० = 'ले जाऊँगी-पहुँचाऊँगी।' सबलात्कारम् – बलात्कारेण सहितम् सबलामित्यर्थ: = बलपूर्वक। गृहीत: – ग्रह्+क्त = ले लिया।

चतुरिका—यह (कूचियों की पेटी) मेरे हाथ से तरलिका जिनका अनुगमन कर रही थी ऐसी (अर्थात् तरलिका के साथ वहाँ उपस्थित) महारानी वसुमती के द्वारा "मैं ही महाराज के पास (इसे) पहुँचाऊँगी" – ऐसा कहकर बलपूर्वक ले ली गयी।

विदूषकः—दिष्ट्या त्वं मुक्ता। (दिट्ठआ तुमं मुक्का।)

विदूषक—भाग्य से तुम छूट गयी हो।

चतुरिका—यावद् देव्या विटपलग्नमुत्तरीयं तरलिका मोचयति तावन्मया निर्वाहित आत्मा। (जाव देवीए विडवलग्गं उत्तरीअं तरलिआ मोचेदि ताव मए णिव्वाहिदो अत्ता।

व्या० एवं श०—यावत् = जब तक। विटपलग्नम् – विटपे लग्नम् (स०त०) = वृक्ष की डाली में फंसे। उत्तरीयम् = दुपट्टे को। मोचयति – मुच्+णिच्+लट् प्र०पु०ए०व० = छुड़ाने लगी। तावत् = तब तक। आत्मा = अपने शरीर को। निर्वाहित: – निर्+वह्+णिच्+क्त = बचा लिया। आत्मा = शरीर।

चतुरिका—जब तक (वृक्ष की) शाखा (डाली) में फंसे महारानी के दुपट्टे को तरलिका छुड़ाने लगी तब तक मेरे द्वारा अपना शरीर बचा लिया गया (अर्थात् मैं अपने को बचा कर भाग आयी)।

राजा—वयस्य, उपस्थिता देवी बहुमानगर्विता च। भवानिमां प्रतिकृतिं रक्षतु।

व्या० एवं श०—बहुमानगर्विता – बहुमानेन – आदरेण, गर्विता-जातगर्वा = अत्यधिक आदर (पाने) के कारण गर्वीली। प्रतिकृतिम् = (शकुन्तला की) प्रतिमूर्ति (चित्र) को।

राजा—हे मित्र, महारानी आने वाली हैं और अत्यधिक मान से गर्वित हैं। आप इस चित्र की रक्षा करें।

विदूषकः—आत्मानमिति भण। (चित्रफलकमादायोत्थाय च) **यदि भवानन्तःपुरकूटवागुरातो मोक्ष्यते तदा मां मेघप्रतिच्छन्दे प्रासादे शब्दायय।** (अत्ताणं त्ति भणाहि। जइ भवं अन्तेउलकूडवागुरादो 'मुञ्चीअदि तदो मं मेहप्पडिच्छन्दे पासादे सद्दावहि।) (इति द्रुतपदं निष्क्रान्तः)।

व्या० एवं श०—अन्तःपुर कूटवागुरातः – कूटस्य वागुरा अन्तःपुरमेव कूटवागुरा – कूटजालम् तस्याः – अन्तःपुर के कूट (छल-प्रपंच) के जाल से। 'वागुरा मृग-बन्धनी' – इत्यमरः। मेघप्रच्छन्दे – मेघप्रतिच्छन्द नामक। यह 'प्रासादे' इस पद का विशेषण है। प्रासादे = राजभवन में। शब्दायय – पुकारना।

विदूषक—यह कहो कि 'अपने को (अर्थात् मुझे)' बचाओ। (चित्रपट को लेकर और उठकर) यदि अन्तःपुर के कूट-जाल से मुक्त हों तब मुझको 'मेघप्रतिच्छन्द' नामक भवन में पुकारना। (तेजी से पैर बढ़ाता हुआ निकल जाता है)।

सानुमती—अन्यसङ्क्रान्तहृदयोऽपि प्रथमसम्भावनामपेक्षते शिथिलसौहार्द इदानीमेषः। (अण्णसंकन्तहिअओ वि पढममंभावणं अवेक्खदि सिढिलसोहदो दाणिं एसो।)

व्या० एवं श०—अन्यसङ्क्रान्तहृदयः – अन्यस्यां सङ्क्रान्तं हृदयं यस्य सः = अन्य (शकुन्तला) में लगे हुये हृदय वाला। प्रथमसम्भावनाम् – प्रथमा प्राक् कृता या सम्भावना – सत्क्रिया, पूर्वं प्रदशिता या वसुमत्यां प्रीतिः इत्यर्थः, ताम् = प्रथम प्रणय की अपेक्षते – अपेक्षा करता है अर्थात् उसका ध्यान रखता है। शिथिलसौहार्दः – शिथिलं-स्वल्पीभूतं सौहार्दं प्रेम यस्य तादृशः = स्वल्प प्रेम युक्त।

टिप्पणी—'त्वन्मतिः केवलाः...' राजा के इस कथन का अभिप्राय है कि प्रजारक्षण में राजा की शक्ति (धनुष आदि पर आधारित) और मंत्री की बुद्धि – इन दोनों का योगदान अपेक्षित होता है। अब तक दोनों के पारस्परिक योग से अर्थात् मन्त्री की बुद्धि और राजा के धनुष से प्रजारक्षण रूप कार्य चलता रहा। परन्तु अब चूँकि वह (राजा) इन्द्र के आदेश के पालन हेतु दानववध रूप कार्य में व्यस्त रहने के कारण अनुपस्थित रहेंगे ऐसी स्थिति में मन्त्री पिशुन को (उनकी अनुपस्थिति में) केवल अपनी बुद्धि (विवेक) के अनुसार प्रजापालन करना चाहिये। भारवि ने किरात में राजा एवं मन्त्री के सहयोग से राज्य की सुख-समृद्धि की बात कही है—'सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः। किरात।

विदूषकः—यद् भवनाज्ञापयति। (जं भवं आणवेदि।) (इति निष्क्रान्तः)।

विदूषक—आप जो आज्ञा देते हैं। (निकल जाता है)।

मातलिः—आयुष्मान् रथमारोहतु।

मातलि—चिरञ्जीवी (आप रथ पर चढ़ें)।

(राजा रथाधिरोहणं नाटयति)

(राजा रथ पर चढ़ने का अभिनय करते हैं)।

(इति निष्क्रान्ताः सर्वे)

(सभी निकल जाते हैं)।

।। इति षष्ठोऽङ्कः ।।

॥ षष्ठ अङ्क समाप्त ॥

सप्तमोऽङ्कः

(ततः प्रविशत्याकाशयानेनरथाधिरूढो राजा मातलिश्च)

व्या० एवं श०—आकाशयानेन+आकाशस्य यानम् ; यान्त्यनेन या+करणे ल्युट् = आकाशमार्ग से। 'यानं स्याद्वाहने गतौ' इस मेदिनी कोष के मतानुसार 'यान' के दो अर्थ वाहन तथा गति होते हैं। 'गति' का अर्थ मार्ग भी होता है। यहाँ मार्ग (पथ) अर्थ अभिप्रेत है।

(तत्पश्चात् आकाशमार्ग से रथ पर बैठे हुये राजा और मातलि प्रवेश करते हैं)।

राजा—मातले, अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये।

व्या० एवं श०—अनुष्ठितनिदेशः – अनुष्ठितः निदेशः (आदेशः) येन सः (ब०ब्री०) = आदेश का परिपालन कर लिया है जिसने ऐसा। निदेशः – नि+दिश्+घञ्। 'प्रैष्यादेशाज्ञानियोगः शासनं तथा – इति धनञ्जयः'। सत्क्रियाविशेषात् – सत्क्रिया सम्माननाः तस्याः विशेषः अतिशयः तस्मात् = विशेष सत्कार के कारण। मघवतः = इन्द्र के ('मघवान्' के षष्ठी ए०व० का रूप)। अनुपयुक्तमिव – उपयुक्तम् – उप+युज्+क्त – न उपयुक्तम् अनुपयुक्तम् = अयोग्य (अपात्र) सा।

राजा—हे मातलि, (इन्द्र के दुर्जय दैत्यों के वध रूप) आदेश का परिपालन कर देने पर भी इन्द्र के द्वारा किये गये विशेष सत्कार के कारण मैं अपने को (उस प्रकार के) सत्कार के लिये अयोग्य-सा समझ रहा हूँ।

विशेष—(१) राजा दुष्यन्त दुर्जय गण – राक्षसों का वध कर ही लौटते हैं। नाट्यशास्त्र के विधानानुसार रङ्गमञ्च पर दूर आह्वान, वध, युद्ध आदि के दृश्य नहीं दिखाये जाते —'दूराह्वानं वधं युद्धम् ...।' इसीलिये यहाँ उसका प्रदर्शन नहीं किया गया है और युद्ध के पश्चात् दुष्यन्त मातलि आदि का प्रवेश दिखाया गया है। (२) **अनुपयुक्तम्** – इसके दो अर्थ हो सकते हैं – (१) इन्द्र के सत्कार विशेष की तुलना में मेरा कार्य (वधरूप) नगण्य सा है। (२) इन्द्र के सत्कार को पाने की मेरी योग्यता (पात्रता) नहीं है। साथ ही राजा का प्रत्युपकारित्व, विनय और गुणग्राहिता सूचित होती है एवं इन्द्र द्वारा प्रदत्त सम्मान उनके सौभाग्यशाली होने का सूचक है।

मातलिः—(सस्मितम्) आयुष्मन् , उभयमप्यपरितोषं समर्थये।

व्या० एवं श०—उभयमप्यपरितोषम् – मातलि के इस कथन का अभिप्राय यह है कि असन्तोष दोनों ओर है अर्थात् राजा एवं इन्द्र दोनों तरफ है। राजा, इन्द्र द्वारा सम्मान को बड़ा एवं अपने कार्य – (अथवा योग्यता) आदि को छोटा मानकर असन्तुष्ट हैं तथा इन्द्र राजा के कार्य को बड़ा तथा अपने द्वारा दिये गये सम्मान को छोटा मानकर असन्तुष्ट हैं।

मातलि—(मुस्कराकर) चिरञ्जीवी, मैं (इन्द्र और आप राजा दुष्यन्त) दोनों को ही असन्तुष्ट समझ रहा हूँ।

प्रथमोकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यवदानविस्मितो भवतः सोऽपि न सत्क्रियागुणान् ।। १ ।।

अन्वय—भवान् मरुत्वतः प्रतिपत्त्या प्रथमोपकृतं लघु मन्यते, सः अपि भवतः अवदानविस्मितः सत्क्रियागुणान् न गणयति ।

शब्दार्थ—भवान् = आप । मरुत्वतः = इन्द्र के द्वारा । प्रतिपत्त्या = (किये गये) सत्कार से । प्रथमोपकृतम् = पहले किये गये उपकार को । लघु = छोटा, तुच्छ । मन्यते = मानते हैं (समझते हैं) । सः = वह । अपि = भी । भवतः = आप के । अवदानविस्मितः = पराक्रम (शौर्यकर्म) से आश्चर्ययुक्त, विशिष्ट वीरता से आश्चर्य चकित हुये । सत्क्रियागुणान् = सत्कार के महत्त्व को । न = नहीं । गणयति = गिनते हैं (समझते हैं) ।

अनुवाद—आप इन्द्र के द्वारा किये गये सत्कार से (इन्द्र के प्रति अपने द्वारा) पहले किये गये उपकार को छोटा (तुच्छ) मानते (समझते) हैं । वह (इन्द्र) भी आप के पराक्रम (विशिष्ट वीरता) से आश्चर्यचकित होकर (आप के प्रति अपने द्वारा दिये गये) सत्कार के महत्त्व को (कुछ भी) नहीं गिनते (समझते) हैं ।

संस्कृत व्याख्या—भवान् – दुष्यन्तः, **मरुत्वतः** – इन्द्रस्य, **प्रतिपत्त्या** – गौरवेण, इन्द्रकृतया पूजया इत्यर्थः, **प्रथमोपकृतम्** – पूर्वकृतम् उपकारम् , स्वकृतमुपकारमिति यावत् , **लघु** – स्वल्पम् , **मन्यते** – स्वीकुरुते, **सः अपि** – इन्द्र अपि, **भवतः** – दुष्यन्तस्य, **अवदानविस्मितः** – भवतः पराक्रमेण आश्चर्यान्वितः, **सत्क्रियागुणान्** – सत्कारस्य महत्त्वम् , **न गणयति** – न बहुमन्यते ।

संस्कृत-सरलार्थः—मातलिः राजानं वदति – 'यद् इन्द्रकृतं सत्कारं वीक्ष्य यथा भवान् स्वकृतं वधरूपमुपकारं स्वल्पं मन्यते, तथैवेन्द्रोऽपि भवत्पराक्रमातिशयं विलोक्य भवन्तं प्रति प्रदर्शितं स्वसत्कारं नितान्तमल्पं मनुतेऽतस्तुल्य एवासन्तोष उभयपक्षयोरिति भावः ।

व्याकरण—प्रतिपत्त्या – प्रति+पद्+क्तिन् , तृ०ए० । प्रथमोकृतम् – प्रथमं च यत् उपकृतं च (कर्म०) । अवदानविस्मितः – अवदानेन विस्मितः (तत्पु०) अवदानम् – अव+दा+ल्युट् । सत्क्रियागुणान् – सत्क्रियायाः गुणान् (तत्पु०) ।

कोष—'इन्द्रो मरुत्वान् मघवा विडौजाः पाकशासनः' इत्यमरः । 'अवदानं कर्मवृत्तम्' इत्यमरः । 'पराक्रमोऽवदानम् स्यात्' इति भागुरिः – रघुवंश ११/२१ मल्लिनाथ टीका द्रष्टव्य ।

अलङ्कार—(१) सत्काररूपी कारण के होने पर गणनारूपी कार्य के न होने से **'विशेषोक्ति'** अलङ्कार है । (२) गुण-गणना रूप कार्य के अभाव का कारण न होने से **'विभावना'** अलङ्कार है । दोनों का लक्षण क्रमशः द्र० ३/२२ तथा १/१८ ।

छन्द—यहाँ **'सुन्दरी'** छन्द है । ल०द्र० ६/१ श्लो० ।

टिप्पणी—यहाँ से लेकर अङ्क की समाप्ति तक **'निर्बहण'** सन्धि है । निर्वहण का लक्षण है—'बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् । एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्' सा०द० । आचार्य विश्वनाथ शकुन्तला के अभिज्ञान (पहचान) से लेकर अङ्क की समाप्ति तक 'निर्वहण' सन्धि मानते हैं ।

राजा—मातले, मा मैवम् । स खलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः । मम हि दिवौकसां समक्षमर्धासनोपवेशितस्य—

व्या० एवं श०—मनोरथानाम् = (कल्पनाओं) अभिलाषाओं का। अभूमि: न भूमि: अभूमि: – अस्थान (अविषय)। विसर्जनावसरसत्कार: – विसर्जनावसरे सत्कार: = विदायी के अवसर पर किया गया सत्कार। दिवौकसाम् – द्यौ: स्वर्ग: ओक: वासस्थानं येषां ते (ब०व्री०) दिवौकस: तेषाम् = देवताओं का। 'अमरा निर्जरा देवास्त्रिदशा विबुधा: सुरा:। सुपर्वाण: सुमनसस्त्रिदिवेशा दिवौकस: ॥ इत्यमर:। अर्धासनोपवेशितस्य – अर्धसने उपवेशितस्य (उप+विश्+णिच्+क्त ष०ए०व० = आधे आसन पर बिठाये गये।

राजा—हे मातलि, नहीं, ऐसा न (कहो)। विदायी के अवसर पर (इन्द्र के द्वारा) किया गया वह सत्कार तो निश्चय ही मेरे कल्पनाओं का भी विषय नहीं है (अर्थात् कल्पनाओं से भी परे की वस्तु है)। क्योंकि देवताओं के सामने (अपने) आधे आसन पर बैठाकर मुझको—

अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन।
आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा ॥ २ ॥

अन्वय—अन्तिकस्थम् अन्तर्गतप्रार्थनं जयन्तम् उद्वीक्ष्य कृतस्मितेन हरिणा आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला पिनद्धा।

शब्दार्थ—अन्तिकस्थम् = समीप में स्थित (खड़े हुये)। अन्तर्गतप्रार्थनम् = भीतर ही भीतर (अर्थात् मन में) है इच्छा (प्रार्थना) जिसके ऐसे, मन ही मन (मन्दरमाला के लिये) इच्छुक। जयन्तम् = जयन्त को। उद्वीक्ष्य = देखकर। कृतस्मितेन = मुस्कराते हुये। हरिणा = इन्द्र के द्वारा। आमृष्टवक्षोहरिचन्दनाङ्का = वक्ष:स्थल पर लगे हुये हरिचन्दन से चिह्नित। मन्दारमाला = मन्दारपुष्पों की माला। पिनद्धा = पहना दी गयी।

अनुवाद—समीप में खड़े हुये भीतर ही भीतर (मन ही मन) (माला पहनने) के इच्छुक (अपने पुत्र) जयन्त को देखकर मुस्कराते हुये इन्द्र ने (अपने) वक्ष:स्थल पर लगे हुये हरिचन्दन से चिह्नित मन्दार-पुष्पों की माला (मुझे) पहना दी।

संस्कृत व्याख्या—**अन्तिकस्थं** – समीपस्थम्, **अन्तर्गतप्रार्थनं** – हृदयस्थितमन्दारमालाभिलाषम्, **जयन्तम्** – एतदाख्यं स्वपुत्रम्, **उद्वीक्ष्य** – विलोक्य, **कृतस्मितेन** – विहितमन्दहासेन, **हरिणा** – इन्द्रेण, **आमृष्टवक्षोहरिचन्दनाङ्का** – स्पृष्टं यत् वक्ष:स्थं हरिचन्दनं तस्य चिह्नं यस्या: सा, **मन्दारमाला** – मन्दारप्रसूनानां माला देवतरुविशेषसुमनोमौलिका, **पिनद्धा** – मम कण्ठे परिधापिता।

संस्कृत-सरलार्थः—दुष्यन्तो वदति मातलिम् – स्वसमीपवर्तिनं मनोगतमन्दारमालाभिलाषशालिनं निजसुतं जयन्तमवलोक्य विहितमन्दहासेनेन्द्रेण, लिप्तवक्षोहरिचन्दनचिह्निता मन्दाराख्यसुरतरुपुष्पमालिका (अर्धासनोपवेशितस्य) ममोरसि स्वहस्ताभ्यामेव परिधापिता। नूनं तत्कृतोऽयं सत्कार: कल्पनातीत:।

व्याकरण—अन्तर्गतप्रार्थनम् – अन्तर्गता प्रार्थना यस्य तम् (बहु०)। उद्वीक्ष्य – उत्+वि+ईक्ष्+ल्यप्। आमृष्टवक्षोहरिचन्दनाङ्का – आमृष्टस्य वक्षोहरिचन्दनस्य अङ्क: यस्या: सा (बहु०)। पिनद्धा – अपि+नह्+क्त+टाप्; 'वष्टि भागुरिरल्लोपम्०' से अपि के अकार का लोप। कृतस्मितेन – कृतं स्मितं येन स: तेन (ब०व्री०)।

कोष—'पञ्चैते देवतरवो मन्दार: पारिजातक:। सन्तान: कल्पवृक्षश्च पुंसि वा हरिचन्दनम्', 'जयन्त: पाकशासनि'।

अलङ्कार—(१) इस श्लोक में राजा के गौरवाधिक्य का वर्णन होने से **'उदात्त'** अलङ्कार है। लक्षण – 'लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते'। (२) 'अन्तर्गतप्रार्थनम्' 'आमृष्ट... आदि विशेषणों के साभिप्राय होने से **'परिकर'** अलङ्कार है। ल०द्र० १/२६ श्लो०।

छन्द—**'उपजाति'** छन्द है। ल०द्र० ५/५ श्लो०।

टिप्पणी—(१) इस श्लोक से इन्द्र द्वारा किये गये दुष्यन्त के सत्कारातिशय का प्रकाशन होता है। (२) **आमृष्टवक्षोहरिचन्दनाङ्का** – इस पद से कई अर्थों की प्रतीति होती है – (१) उस समय इन्द्र के वक्षःस्थल पर हरिचन्दन लेप किया गया था। (२) इन्द्र ने उस समय उस माला को अपने वक्षःस्थल पर धारण कर रखा था। (३) माला ताजा, सुगन्धित और सुन्दर थी, जिसके लिये जयन्त ललचा रहे थे। (३) हरिचन्दन – यह पाँच देववृक्षों में परिगणित है। पद्मपुराण के अनुसार हरिचन्दन एक प्रकार का लेप है। स्वर्ग का चन्दन हरिचन्दन कहलाता है। (४) **पिनद्धा** – माला को इन्द्र ने दिया नहीं, अपितु पहनाया।

मातलिः—किमिव नामायुष्मानमरेश्वरान्नार्हति ? पश्य—

व्या० एवं श०—अमरेश्वरान्नार्हति – अमरेश्वरात्+न+अर्हति = देवों के स्वामी से नहीं प्राप्त कर सकते हैं अर्थात् देवराज से सभी वस्तुयें प्राप्त कर सकते हैं।

मातलि—चिरञ्जीवी, आप कौन सी वस्तु देवेन्द्र से नहीं प्राप्त कर सकते ? देखिये—

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम्।
तव शरैरधुना नतपर्वभिः पुरुषकेसरिणश्च पुरा नखैः॥ ३॥

अन्वय—अधुना नतपर्वभिः तव शरैः पुरा च नतपर्वभिः पुरुषकेसरिणः नखैः उभयैः सुखपरस्य हरेः त्रिदिवम् उद्धृतदानवकण्टकं कृतम्।

शब्दार्थ—अधुना = अब। नतपर्वभिः = झुकी हुयी हैं गाठें जिनकी ऐसे, झुकी हुयी गाठों वाले। तव = तुम्हारे (आप के)। शरैः = बाणों के द्वारा। पुरा च = और प्राचीन काल में। नतपर्वभिः = अङ्गुलियों के जोड़ पर मुड़े हुये। पुरुषकेसरिणः = नरसिंह (भगवान्) के। नखैः = नाखूनों के द्वारा। उभयैः = इन दोनों के द्वारा। सुखपरस्य = भोगों में लिप्त हुये। हरेः = इन्द्र के। त्रिदिवम् = स्वर्ग को। उद्धृतदानवकण्टकम् = दानवरूपी काँटे जिससे निकाल दिये गये हैं ऐसा, (दानवरूपी काँटो से रहित)। कृतम् = कर दिया गया है।

अनुवाद—इस समय (अर्थात् वर्तमान काल में) झुकी हुयी गाँठों वाले आप के बाणों और प्राचीन काल में अङ्गुलियों के जोड़ पर मुड़े हुये नरसिंह (भगवान्) के नाखूनों के द्वारा, (इस प्रकार) इन (बाणों और नाखूनों) दोनों के द्वारा सुखोपभोगासक्त इन्द्र के स्वर्ग को दावनवरूपी काँटों से रहित कर दिया गया।

संस्कृत व्याख्या—अधुना – सम्प्रति, **नतपर्वभिः** – आकुञ्चितानि ग्रन्थयः येषां तैः, **तव** – दुष्यन्तस्य, **शरैः** – बाणैः, **पुरा च** – कृतयुगे च, **नतपर्वभिः** – नतग्रन्थिभिः, **पुरुषकेसरिणः** – भगवतः नृसिंहस्य, **नखैः** – नखरैः, **उभयैः** – शरैः, **सुखपरस्य** – सुखोपभोगासक्तस्य, **हरेः** – इन्द्रस्य, **त्रिदिवं** – स्वर्गः, **उद्धृतदानवकण्टकं** – विनाशिताः दानवरूपाः कण्टकाः यस्मात् तादृशम्, **कृतं** – विहितम्।

संस्कृत-सरलार्थः—मातलिः दुष्यन्तं कथयति – सुखोपभोगासक्तस्येन्द्रस्य स्वर्गोऽधुना तव बाणैरसुरान् निहत्य तथा पुरा भगवतो नृसिंहस्य नखैर्हिरण्यकशिपुं हत्वा च राक्षसकण्टकविरहितो

विहित: । इन्द्रस्य स्वर्ग: पुरा नृसिंहेणाधुना च भवता रक्षित इत्यर्थ: ।

व्याकरण—नतपर्वभि: – नतानि पर्वाणि येषां तै: (बहु०)। सुखपरस्य – सुखे पर: तस्य (तत्पु०)। उद्धृतदानवकण्टकम् – उद्धृता: दानवरूपा: कण्टका: यस्मात् तत् (बहु०)। त्रिदिवम् – यह दो प्रकार से व्युत्पन्न होता है (१) त्रिविधं दीव्यति इति – त्रि+दिव्+क (अ) 'इगुपध' से 'क'। (२) तृतीयं दिवम्। यह पुँल्लिङ्ग एवं नपुंसक दोनों में होता है।

कोष—'त्रिदिवं तु खे। स्वर्गे च त्रिदिवा नद्याम्' – इति हैम:। 'स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालया:। सुरलोको द्यो-दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्'। 'त्रिदिव' शब्द अमरकोष के अनुसार पुँल्लिङ्ग तथा 'हैम' कोष के अनुसार नपुंसकलिङ्ग है। श्लोक में 'त्रिदिव' नपुसकलिङ्ग में है।

अलङ्कार—(१) 'उद्धृतदानवकण्टकम्' में 'दानवा: कण्टका इव, ऐसा विग्रह करने पर 'समासगावाचकलुप्तोपमा' अलङ्कार है। ल०द्र० १/५ श्लो०। (२) यहाँ प्रस्तुत दुष्यन्त तथा अनेक बाण एवं अप्रस्तुत पुरुषकेसरी तथा उनके नखों – इन दोनों प्रस्तुत अप्रस्तुतों का एक क्रिया 'कृतम्' के साथ सम्बन्ध होने के कारण **'दीपक'** अलङ्कार है। ल०द्र० २/१५ श्लो०। (३) कुछ विद्वान् यहाँ **'तुल्ययोगिता'** अलङ्कार भी मानते हैं। ल०द्र० ३/१७ श्लो०।

छन्द—इस श्लोक में **'द्रुतविलम्बित'** छन्द है। ल०द्र० २/११ श्लो०।

टिप्पणी—(१) **पुरुषकेसरिण:** – प्राचीन काल में हिरण्यकशिपु ने इन्द्र को पदच्युत कर तीनों लोकों में त्राहि-त्राहि मचा दी थी। भगवान् विष्णु ने नृसिंह का अवतार धारण कर अपने नखों से उसका (हिरण्यकशिपु नामक राक्षस का) वध किया। वर्तमान काल में राजा दुष्यन्त ने कालनेमि की सन्तान दुर्जय नामक दानव-गण को परास्त कर स्वर्ग के राज्य को निष्कण्टक बनाया है। (२) नृसिंह या नरसिंह ये नाम अधिक प्रसिद्ध हैं। यह विष्णु का चौथा अवतार है।

राजा—अत्र खलु शतक्रतोरेव महिमा स्तुत्य:।

व्या० एवं श०—शतक्रतो: शतं क्रतव: यागा: यस्य (ब०ब्री०) तस्य = सौ यज्ञों वाले अर्थात् इन्द्र के। महिमा – महतो भाव: – महत्+इमनिच् = महत्ता, बड़प्पन, माहात्म्य। स्तुत्य: – स्तु+क्यप् – तुक् का आगम = प्रशंसनीय।

राजा—यहाँ (इस विषय में) तो इन्द्र की महत्ता प्रशंसनीय है।

> **सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्या:**
> **सम्भावनागुणमवेहि तमीश्वराणाम् ।**
> **किं वाऽभविष्यदरुणस्तमसां विभेत्ता**
> **तं चेत् सहस्रकिरणो धुरि नाकरिष्यत् ।। ४ ।।**

अन्वय—महत्सु अपि कर्मसु नियोज्या: यत् सिध्यन्ति तम् ईश्वराणां सम्भावनागुणम् अवेहि, किं वा अरुण: तमसां विभेत्ता अभविष्यत् चेत् सहस्रकिरण: तं धुरि न अकरिष्यत्।

शब्दार्थ—महत्सु = महान् (बड़े-बड़े)। अपि = भी। कर्मसु = कार्यों में। नियोज्या: = नियुक्त किये गये (आज्ञाकारी सेवक)। यत् = जो। सिध्यन्ति = सफल हो जाते हैं। तम् = उसको। ईश्वराणाम् = स्वामियों के। सम्भावनागुणम् = गौरव का गुण। अवेहि = समझो, (समझिये)। किं वा = क्या। अरुण: = (सूर्य का सारथि) अरुण। तमसाम् = अन्धकार का। विभेत्ता = विनाशक। अभविष्यत् = हो जाता (हो पाता)। चेत् = यदि। सहस्रकिरण: = असङ्ख्य

किरणों वाले अर्थात् सूर्य। तम् = उसको। धुरि = धुरा के अग्रभाग में। न = नहीं। अकरिष्यत् = किये होते (लगाये होते)।

अनुवाद—महान् (बड़े-बड़े) भी कार्यों में नियुक्त किये गये (सेवक) जो सफल हो जाते हैं, उसे स्वामियों के गौरव का गुण (ही) समझना चाहिये। क्या (सूर्य का सारथि) अरुण अन्धकार का विनाशक हो पाता (अर्थात् नहीं हो पाता) यदि सूर्य उस (अरुण) को (अपने रथ के) धुरा में (अग्रभाग में) न किये होते।

संस्कृत व्याख्या—**यत् महत्सु अपि** – गुरुतरेषु अपि, **कर्मसु** – कार्येषु, **नियोज्याः** – अधीनस्थाः सेवकाः, **सिध्यन्ति** – कार्यनिष्पादका भवन्ति, (सफलाः जायन्ते, इति), **तम् ईश्वराणां** – प्रभूणाम् , **सम्भावनागुणं** – गौरवविशेषम् , **अवेहि** – अवगच्छ; **किं वा** – किमुत, **अरुणः** – सूर्यसारथिः, **तमसाम्** – अन्धकाराणाम् , **विभेत्ता** – भेदकः (नाशकः), **अभविष्यत्** – स्यात् ; नैवाभविष्यदित्यर्थः, **चेत्** – यदि, **सहस्रकिरणः** – सूर्यः, **तम्** – अरुणम् , **धुरि** – अग्रभागे, **न** – नहि, **अकरिष्यत्** – अस्थापयिष्यत्।

संस्कृत-सरलार्थः—राजा मातलिं वदति – सेवका दुःसाध्वेष्वपि कार्येषु यत् सफला जायन्ते, नहि तेषां कश्चिद् गुणविशेषः कारणम् , अपितु तत्र स्वामिप्रदत्तगौरवमेव कारणम् अर्थात् स्वामिप्रसादेनैव ते सफला जायन्ते। सूर्यसारथेरुऽणस्यान्धकारविच्छेदे न काचित् सहजा शक्तिरपितु सस्वस्वामिनः सूर्यस्य प्रसादमवाप्यैवान्धकारविच्छेदरूपकर्मणि सफलो भवति। राज्ञः कथनस्यायं संक्षेपो यद् दानवगणविनाशे स (दुष्यन्तः) इन्द्रकृतसम्भावनयैव सफलो न स्वकृतपराक्रमेणात इन्द्रस्यैव महिमा प्रशस्ये न तस्य।

व्याकरण—नियोज्याः – नि+युज्+ण्यत् (कर्मणि) प्र०पु०ब०व०। सम्भावनागुणम् – सम्भावनायाः गुणम् (तत्पु०)। सहस्रकिरणः – सहस्रं किरणाः यस्य सः (बहु०)। विभेत्ता – वि+भिद्+तृच्।

कोष—'भृत्यो दासेयदासेरदासगोप्यकचेटकाः। नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः' – इत्यमरः। 'सूरसूतोऽरुणोऽनूरुःकाश्यपिर्गरुडाग्रजः' – इत्यमरः।

अलङ्कार—(१) श्लोक में प्रस्तुत इन्द्र और दुष्यन्त के स्थान पर अप्रस्तुत प्रभु एवं नियोज्य का कथन होने के कारण **'अप्रस्तुतप्रशंसा'** अलङ्कार है। ल०द्र० १/१७ श्लो०। (२) पूर्वार्द्धगत सामान्य से उत्तरार्द्धगत विशेष का समर्थन होने से **'अर्थान्तरन्यास'** अलङ्कार है। ल०द्र० १/२ श्लो०।

छन्द—यहाँ **'वसन्ततिलका'** छन्द है। ल०द्र० १/८ श्लो०।

टिप्पणी—(१) श्लोक में राजा के कथन का अभिप्राय यह है कि महान् स्वामी के प्रताप से सम्पूर्ण कार्य सम्पन्न हो सकता है, न कि सेवक के पुरुषार्थ से। सूर्य-सारथि विकलाङ्ग अरुण में स्वयं अन्धकार को दूर करने की शक्ति नहीं है, फिर भी असङ्ख्य तेज किरणों वाले सूर्य की शक्ति से वह अन्धकार को दूर कर देता है। उसी प्रकार असमर्थ मेरे द्वारा असुर परास्त नहीं हुये हैं अपितु इन्द्र के प्रताप के कारण (राक्षस) परास्त हुये हैं। मुझको तो यश वैसे ही मिल गया है।

मातलिः—सदृशमेवैतत्। (स्तोकमन्तरमतीत्य) **आयुष्मन् , इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः।**

व्या० एवं श०—नाकपृष्ठप्रतिष्ठितस्य – नाकपृष्ठे स्वर्गतले प्रतिष्ठितस्य = स्वर्गलोक

में प्रतिष्ठित (आपका)। आत्मयशसः – आत्मनः स्वस्य, यशसः कीर्तेः = अपने यश का।

मातलि—यह (कथन आप के) अनुरूप ही है। (कुछ दूर आगे जाकर) चिरञ्जीविन्, स्वर्ग लोक में प्रतिष्ठित अपने यश के सौभाग्य को इधर देखिये।

विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु।
विचिन्त्य गीतक्षममर्थजातं दिवौकसस्त्वच्चरितं लिखन्ति।। ५।।

अन्वय—अमी दिवौकसः गीतक्षमम् अर्थजातं विचिन्त्य सुरसुन्दरीणां विच्छित्तिशेषैः वर्णैः कल्पलतांशुकेषु त्वच्चरितं लिखन्ति।

शब्दार्थ—अमी = ये। दिवौकसः = देवता लोग। गीतक्षमं = गाये जाने योग्य। अर्थजातम् = अर्थ समूह को (भावों को)। विचिन्त्य = सोचकर। सुरसुन्दरीणाम् = देवाङ्गनाओं के। विच्छित्तिशेषैः = अङ्गराग (प्रसाधन) से अवशिष्ट। वर्णैः = रङ्गों से। कल्पलतांशुकेषु = कल्पलता (कल्पवृक्ष) के रेशमी वस्त्रों पर। त्वच्चरितम् = तुम्हारे (आप के) चरित को। लिखन्ति = लिख रहे हैं।

अनुवाद—(आयुष्मान्) ये (स्वर्ग-निवासी) देवता गेय अर्थसमूह (भावों) को सोचकर (गेयपद्यों को बनाकर) देवाङ्गनाओं के अङ्गराग (प्रसाधन) से अवशिष्ट रङ्गों से कल्पलता (कल्पवृक्ष) के रेशमी वस्त्रों पर आप के चरित को लिख रहे हैं।

संस्कृत व्याख्या—अमी – एते (दूरे दृश्यमानाः), **दिवौकसः** – देवाः, **गीतक्षमं** – गीतयोग्यं (गेयम्), **अर्थजातं** – पदार्थसमूहम् (पदावलिम्), **विचिन्त्य** – विचार्य, **सुरसुन्दरीणां** – देवाङ्गनानाम्, **विच्छित्तिशेषैः** – अङ्गरागावशिष्टैः, **वर्णैः** – रञ्जनसाधनैः, **कल्पलतांशुकेषु** – कल्पवृक्षसमुद्भववसनेषु, **त्वच्चरितं** – तव दुष्यन्तस्य चरितम्, **लिखन्ति** – लिपिबद्धं कुर्वन्ति।

संस्कृत-सरलार्थः—एते (दूरदृश्यमानाः) स्वर्गवासिनो देवा गेयपदावलिं विचार्य (निर्माय) देवाङ्गनानाम् अङ्गरागावशिष्टैर्वर्णैः कल्पलतोत्पन्नवसनेषु तव (भवतः दुष्यन्तस्य परोपकारादिरूपं) चरितं लिखन्ति।

व्याकरण—सुरसुन्दीराणाम् – सुराणां सुन्दरीणाम् (तत्पु०)। विच्छित्तिशेषैः – विच्छित्त्या शेषैः (तत्पु०)। विच्छित्तिः – वि+क्षिद्+क्तिन्। कल्पलतांशुकेषु – कल्पलतानाम् अंशुकेषु (तत्पु०)। विचिन्त्य – वि+चिन्त्+क्त्वा – ल्यप्।

कोष—'स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः' – इत्यमरः।

रस-भाव—यहाँ देवताओं की भृंङ्गारसोपभोगयोग्यं स्थिति आपके (दुष्यन्त के) कारण है, यह वस्तु अलङ्कार से ध्वनित होती है। अतः यहाँ अलङ्कार से वस्तुध्वनि है।

अलङ्कार—(१) इस पद्य में दुष्यन्त के चरित को लिखने वाले (देवता) साधनभूत अङ्गराग (स्याही रूप) तथा कल्पवृक्ष के लतारूप पत्र (कागज) – सभी विशिष्ट हैं अतः सभी के विशिष्ट होने से यहाँ **'उदात्त'** अलङ्कार है। ल०द्र० ७/२ श्लो०। (२) विच्छित्ति (प्रसाधन-साधन) से अवशिष्ट अङ्गरागादि का वर्ण (रङ्ग) के रूप में वर्णन किया गया है तथा उसका दुष्यन्त के चरित-लेखन में उपयोग किया गया है अतः **'परिणाम'** अलङ्कार है। ल०द्र० ३/३ श्लो०। **विशेष** – इस अलङ्कार में उपमेय-उपमान का अभेदारोप अर्थ प्रकृत में उपयोगी होता है। (३) 'कल्पलतांशुकेषु' में लता पर अंशुक का आरोप होने से **'रूपक'** अलङ्कार है। ल०द्र० २/१६ श्लो०।

छन्द—श्लोक में **'उपजाति'** छन्द है। ल०द्र० २/७ श्लो०।

टिप्पणी—(१) 'विच्छित्ति' शब्द का प्रयोग यहाँ अपने शरीर को सजाने के लिये विभिन्न रङ्गों के द्वारा बनाये गये डिजाइन, फूल तथा बेल-बूटे आदि के लिये किया गया है। स्वर्ग की सुन्दरियों के इसी प्रसाधन से बचे हुये रङ्ग से देवता लोग दुष्यन्त के शौर्यपूर्ण चरित को लिख रहे हैं। (२) इस श्लोक में 'सुरसुन्दरीणाम्' 'विच्छित्तिशेषैः' आदि पदों के प्रयोग से दुष्यन्त की चरित-गरिमा बढ़ी है।

राजा—मातले, असुरसम्प्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता मया न लक्षितः स्वर्गमार्गः। कतमस्मिन् मरुतां पथि वर्तामहे ?

व्या० एवं श०—असुरसम्प्रहारोत्सुकेन – असुराणां सम्प्रहारे उत्सुकेन (त०) = असुरों पर प्रहार हेतु उत्कण्ठित। सम्प्रहारः – सम्प्रहरन्ते अस्मिन् इति सम्प्रहारः सम्+प्र+हृ+घञ् (अधिकरणे)। पूर्वेद्युः – पूर्वस्मिन् अहनि इति पूर्वेद्युः – इस अर्थ में यह शब्द निपातन से सिद्ध है = पहले दिन। वर्तामहे – वृत्+उ०पु०ब०व०।

राजा—हे मातलि, असुरों पर आक्रमण करने के लिये उत्कण्ठित मैंने पहले दिन स्वर्ग की ओर चढ़ते समय, स्वर्ग का मार्ग (ध्यानपूर्वक) नहीं देखा था। (बताइये) हम लोग वायु के किस मार्ग पर चल रहे हैं ?

टिप्पणी—मरुतां पथि – भारतीय मान्यता के अनुसार आकाश सात भागों में विभक्त है, जिनमें सात मरुतों (पवनों) की स्थिति है। ब्रह्माण्डपुराण में सात पवनों (वायुस्कन्धों) का उल्लेख इस प्रकार है – 'आवहः प्रवहश्चैव संवहश्चोद्वहस्तथा। विवहाख्यः परिवहः परीवाह इति क्रमात्। सप्तैते मारुतस्कन्धा महर्षिभिरुदीरिताः ॥ – (१) आवह, (२) प्रवह, (३) संवह, (४) उद्वह, (५) विवह, (६) परिवह, (७) परीवाह। (१) पृथिवी से बादलों तक **'आवह'** वायु (२) 'प्रवह' में सूर्य, (३) 'संवह' में चन्द्रमा, (४) 'उद्वह' में नक्षत्र, (५) 'विवह' में ग्रह, (६) 'परिवह' में सप्तर्षि, (७) 'परीवाह' में ध्रुव है। दुष्यन्त के पूछने का अभिप्राय यही है कि इन सातों में से किस वायु के पथ (मारुतस्कन्ध) से हम लोग चल रहे हैं ?

मातलिः—

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां ज्योतींषि वर्तयति च प्रविभक्तरश्मिः।
तस्य द्वितीयहरिविक्रमनिस्तमस्कं वायोरिमं परिवहस्य वदन्ति मार्गम् ॥ ६ ॥

अन्वय—यः गगनप्रतिष्ठां त्रिस्रोतसं वहति, प्रविभक्तरश्मिः च ज्योतींषि वर्तयति। तस्य परिवहस्य वायोः द्वितीयहरिविक्रमनिस्तमस्कम् इमं (मार्गम्) तस्य परिवहस्य वायोः मार्गं (विज्ञाः) वदन्ति।

शब्दार्थ—यः = जो। ('परिवह' नामक वायु)। गगनप्रतिष्ठाम् = आकाश में प्रतिष्ठित (स्थित)। त्रिस्रोतसम् = तीन धारायें हैं जिसकी अर्थात् आकाश गङ्गा को। वहति = धारण करता है। प्रविभक्तरश्मिः = जिसके द्वारा वायु रूपी किरणें फैला दी गयी हैं ऐसा (अपनी वायुकिरणों को फैलाकर। च = और। ज्योतींषि = ग्रह-नक्षत्रों (सप्तर्षि-मण्डल) को। वर्तयति = चलाता है (घुमाता है)। द्वितीयहरिविक्रमनिस्तमस्कम् = (वामन रूप धारण करने वाले) विष्णु (हरि) के द्वितीय चरण विन्यास से अन्धकार-रहित (पवित्र)। इमम् = इसे, तस्य = उस। परिवहस्य = परिवह नामक। वायोः = वायु का। मार्गम् = मार्ग। वदन्ति = कहते हैं।

अनुवाद—जो (परिवह नामक वायु) आकाश में प्रतिष्ठित (स्थित) आकाश गङ्गा को

धारण करता है और (जो वायु रूप) किरणों को फैलाकर ग्रह-नक्षत्रों (सप्तर्षि-मण्डल) को (ठीक-ठीक) चलाता (घुमाता) है। (वामन रूप धारण करने वाले) विष्णु के द्वितीय चरण-विन्यास से अन्धकार-रहित (पवित्र) इसे 'परिवह' नामक वायु का मार्ग कहते हैं।

संस्कृत व्याख्या—यः गगनप्रतिष्ठां – गगने आकाशे प्रतिष्ठा स्थितिः यस्याः तादृशीम्, **त्रिस्रोतसं** – त्रिमार्गगामाकाशगङ्गाम्, **वहति** – धारयति (यश्च), **प्रविभक्तरश्मिः** – प्रविभक्ताः प्रसृताः रश्मयः किरणाः येन सः (वायुकिरणान् प्रसार्य), **ज्योतींषि** – ग्रहनक्षत्राणि, **वर्तयति** – चालयति। **द्वितीयहरिविक्रमनिस्तमस्कम्** – वामनरूपिणं विष्णोः द्वितीयेन पादन्यासेन अन्धकाररहितम्, **इमम्** – एतं मार्गम्, **तस्य परिवहस्य** – तन्नामकस्य, **वायोः** – पवनस्य, **मार्गं** – पन्थानम्, **वदन्ति** – कथयन्ति।

संस्कृत-सरलार्थः—राज्ञो जिज्ञासां समाधातुं मातलिस्तं वदति एतं मार्गं विज्ञा जनाः परिवहनामकवायोर्मार्गं वदन्ति। अयमाकाशं धारयति तथा स्ववायुकिरणान् प्रसार्य नक्षत्राणि यथास्थानं चालयति। अयञ्च वामनरूपधारिणोर्विष्णोर्द्वितीयचरणविन्यासेन पवित्रीकृतोऽस्ति।

व्याकरण एवं शब्दार्थ—द्वितीयहरिविक्रमनिस्तमस्कम् – द्वितीयेन हरेः विक्रमेण निस्तमस्कम् (तत्पु०)। गगनप्रतिष्ठाम् – गगने प्रतिष्ठा यस्याः ताम् (बहु०)। त्रिस्रोतसम् – त्रीणि स्रोतांसि यस्याः ताम् (बहु०)। प्रविभक्तरश्मिः – प्रविभक्ताः रश्मयः येन सः (बहु०)। प्रतिष्ठाम् – प्र+स्था+अङ्+शप् – द्वि०ए०व०। विक्रमः – वि+क्रम+घञ् या अच्।

कोष—'गङ्गा विष्णुनदी जह्नुतनया सुरनिम्नगा। भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥'– इत्यमरः।

अलङ्कार—(१) यहाँ महाचरित्र भगवान् विष्णु का वर्णन वायुवर्णन के अङ्गरूप में उपन्यस्त है अतः **'उदात्त'** अलङ्कार है। ल०द्र० ७/२ श्लो०।

छन्द—इस पद्य में **'वसन्ततिलका'** छन्द है। ल०द्र० १/८ श्लो०।

टिप्पणी—(१) **द्वितीयहरिविक्रम** – इससे विष्णु के वामनावतार का निर्देश है। हिरण्यकशिपु के वंशज 'बलि' नामक दैत्य को मारने के लिए विष्णु ने वामनरूप में अवतार लिया। उन्होंने बलि से तीन पग पृथ्वी मांगी। बलि की स्वीकृति मिलने पर उन्होंने (वामनावतार विष्णु ने) विराट रूप धारण कर एक पग से पृथ्वी नाप ली, दूसरे पग से आकाश एवं तीसरा पग बलि के सिर पर रखकर उसे पाताल पहुँचा दिया। द्वितीय पग से आकाश के नापने को 'परिवह' नामक वायु के पवित्र होने की बात कही गयी है। (२) **त्रिस्रोतसम्** – गङ्गा की तीन धारायें मानी जाती हैं। जो आकाश, पृथिवी और पाताल में स्थित हैं—(१) आकाश गङ्गा – जिसे **मंदाकिनी** कहते हैं। (२) पृथ्वी स्थित गङ्गा – जिसे **भागीरथी** कहते हैं। (३) पाताल में स्थित गङ्गा – जिसे **भोगवती** कहते हैं। आकाश गङ्गा 'परिवह' नामक वायु में स्थित है, सप्तर्षि नक्षत्र भी उसी में है। ब्रह्माण्डपुराण में कहा गया है—'सप्तर्षिचक्रं स्वर्गङ्गाषष्ठः परिवहस्तथा।' वायुपुराण का कथन है कि **'परिवह'** नाम का वायु श्रेष्ठ है, जो आकाशगङ्गा को धारण करता है – श्रेष्ठः परिवहो नाम तेषां वायुरपाश्रयः। योऽसौ विभर्ति भगवान् गङ्गामाकाशगोचराम्।

राजा—मातले, अतः खलु सबाह्यान्तःकरणो ममान्तरात्मा प्रसीदति। (रथाङ्गमवलोक्य) **मेघपदवीमवतीर्णौ स्वः।**

व्या० एवं श०—सबाह्यान्तःकरणः – बाह्यानि करणानि अन्तःकरणानि च तैः सह,

(बहुव्रीहि) = बाह्येन्द्रिय तथा अन्तःकरणों के साथ। मेघपदवीम् – मेघानाम् पदवीम् (ष०त०) = मेघों के मार्ग पर। अवतीर्णौ – अ+तृ+क्त प्र०द्वि०व० = उतर आये। स्वः – अस्+वस् उ०पु०द्वि०व० = हैं।

राजा—हे मातलि, इसीलिये (नेत्रादि) बाहरी और (मन आदि) भीतरी इन्द्रियों के सहित मेरी अन्तरात्मा प्रसन्न हो रही है (रथ के पहिये को देखकर) हम दोनों बादलों के मार्ग से उतर रहे हैं।

टिप्पणी—(१) करण का अर्थ इन्द्रिय होता है। इन्द्रिय दस प्रकार की होती है। पाँच ज्ञानेन्द्रिय, और पाँच कर्मेन्द्रिय। पाँच ज्ञानेन्द्रियाँ हैं—आँख, नाक, कान, त्वचा और जिह्वा। पाँच कर्मेन्द्रियाँ हैं—हाथ, पैर, वाणी, मलेन्द्रिय और मूत्रेन्द्रिय। अन्तःकरण में ये चार परिगणित हैं—मन, बुद्धि, चित्त तथा अहङ्कार। (२) **मेघपदवीम्** – बादलों के मार्ग पर। पृथ्वी से बादलों तक 'भूवायु' या 'आवह' वायु है। रथ उसी में स्थित मार्ग पर आ चुका है।

मातलिः—कथमवगयम्यते ?

व्या० एवं श०—अवगम्यते – अव्+गम्+यक् (कर्मणि) = जानते हैं।

मातलि—कैसे मालूम हो रहा है ?

राजा—

अयमरविवरेभ्यश्चातकैर्निष्पतद्भि—
र्हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः ।। ७ ।।

अन्वय—शीकरक्लिन्ननेमिः अयं ते रथः अरविवरेभ्यः निष्पतद्भिः चातकैः अचिरभासां तेजसा अनुलिप्तैः हरिभिः च वारिगर्भोदराणां घनानां उपरिगतं पिशुनयति।

शब्दार्थ—शीकरक्लिन्ननेमिः = जिस रथ के चक्र का प्रान्त भाग (परिधि, नेमि) जल-कणों से भींग गया है ऐसा। अयम् = यह। ते = तुम्हारा (आपका)। रथः = रथ। अरविवरेभ्यः = अरों (तीलियों) के छिद्रों से। निष्पतद्भिः = निकलते हुये (निकलकर जाते हुये)। चातकैः = चातकों द्वारा। च = तथा। अचिरभासाम् = बिजली के। तेजसा = तेज से (प्रभा से)। अनुलिप्तैः = अनुलिप्त (रञ्जित)। हरिभिः = घोड़ों के द्वारा। वारिगर्भोदराणाम् = जल से परिपूर्ण। घनानाम् = बांदलों के। उपरि = ऊपर। गतम् = गगन को। पिशुनयति = सूचित कर रहा है।

अनुवाद—जिसके चक्र का प्रान्तभाग (परिधि) जल-कणों से भींगे प्रान्त भाग वाला गीला हो गया है – ऐसा यह आपका रथ (अपने) अरों (तिलियों) के छिद्रों से निकल कर जाते हुये चातकों के द्वारा तथा बिजली के तेज से अनुलिप्त (रञ्जित) घोड़ों के द्वारा, जल से परिपूर्ण बादलों के ऊपर चलने को सूचित कर रहा है।

संस्कृत व्याख्या—शीकरक्लिन्ननेमिः – शीकरैः जलकणैः क्लिन्ना नेमयः चक्रप्रान्त-भागाः यस्य तादृशः, **अयम्** – एषः, **ते** – तव मातलेः, **रथः** – स्यन्दनम्, **अरविवरेभ्यः** – चक्राङ्गाणां छिद्रेभ्यः, **निष्पतद्भिः** – निर्गच्छद्भिः, **चातकैः** – चातकपक्षिभिः, **अचिरभासां** – अचिरा क्षणिका भाः दीप्तिः यासां तासाम् विद्युतामित्यर्थः, **तेजसा** – प्रभया, **अनुलिप्तैः** – रञ्जितैः, **हरिभिः च** – रथाश्वैश्च, **वारिगर्भोदराणां** – जलपरिपूर्णाभ्यन्तराणाम्, **घनानां** – मेघानाम्,

उपरि – ऊर्ध्वम् , **गतं** – गमनम् , **पिशुनयति** – सूचयति।

संस्कृत-सरलार्थः—राजा मातलिं वदति – यदधुनाऽऽवां जलपूरितमेघपदवीमवतीर्णौ स्वः, यतो हि तव रथस्य चक्रप्रान्तभागा जलेनार्द्राः सन्ति। चातकाख्याः पक्षिणश्च रथारछिद्रेभ्यो निष्पतन्ति। रथाश्वाश्च विद्युत्कान्त्या रञ्जिताः सन्ति। एतैर्लक्षणैर्ज्ञायते यदावामिदानीं जलपूर्ण- मेघमार्गेण गच्छावः।

व्याकरण—शीकरक्लिन्ननेमिः – शीकरैः क्लिन्नाः नेमयः यस्य सः (बहु०)। अरविवरेभ्यः – अराणां विवरेभ्यः (तत्पु०)। अचिरभासां – न चिरा अचिरा; अचिरा भाः यासां तासाम् (बहु०)। वारिगर्भोदराणां – वारि गर्भे येषां तानि वारिगर्भाणि तादृशानि उदराणि येषां तेषां (बहु०)। पिशुनयति – पिशुन णिच् प्र०पु०ए०व०।

कोष—(१) 'तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ वञ्जुलश्चित्रकृच्च' इत्यमरः। (२) 'पिशुनौ खलसूचकौ' इत्यमरः। (३) ' अरमशीघ्रे च चक्राङ्गे'। इति विश्वः।

अलङ्कार—(१) रथ के मेघ-मार्ग पर चलने की सूचना देने में 'शीकरक्लिन्ननेमि' इस पद का अर्थ हेतु रूप से उपन्यस्त है, अतः **'काव्यलिङ्ग'** (पदार्थहेतुक) अलङ्कार है। ल०द्र० १/४ श्लो०। (२) रथ के मेघ-मार्ग गमन के साक्ष्य हेतु 'अरविवरेभ्यो निष्पतद्भिः चातकैः' तथा 'अचिरभासां... हरिभिः' इन कई हेतुओं का उल्लेख किया गया है, अतः **'अनुमान'** अलङ्कार है। ल०द्र० ५/३१ श्लो०। (३) इन हेतुओं का उल्लेख होने के कारण 'समुच्चय' अलङ्कार भी है। ल०द्र० २/१० श्लो०।

छन्द—इस श्लोक में **'मालिनी'** छन्द है। ल०द्र० १/१० श्लो०।

टिप्पणी—चातकैः – हिन्दी में इसे पपीहा कहते हैं। ऐसी मान्यता है कि यह बादलों के जल को ही पीता है, पृथ्वी के जल को नहीं पीता।

मातलिः—क्षणादायुष्मान् स्वाधिकारभूमौ वर्तिष्यते।

व्या० एवं श०—स्वाधिकारभूमौ – स्वस्य अधिकारो यस्याम् सा स्वाधिकारा सा चासौ भूमिश्च तस्याम् – स्वाधिकारे भूतले इत्यर्थः। अर्थात् अपने राज्य मर्त्यलोक में। वर्तिष्यते – वृत्+लृट्+प्र०पु०ए०व० = रहेंगे–पहुँच जायेंगे।

मातलि—क्षरभर में चिरञ्जीवी (आप) अपने अधिकार वाली भूमि पर रहेंगे (अर्थात् अपने राज्य में पहुँच जायेंगे)।

राजा—(अधोऽवलोक्य) **वेगावतरणादाश्चर्यदर्शनः संलक्ष्यते मनुष्यलोकः। तथा हि—**

व्या० एवं श०—वेगावतारणात् – वेगेन अवतरणम् (अव+तृ+ल्युट्) वेगावतरणंम् तस्मात् = वेग से उतरने के कारण। आश्चर्यदर्शनः – आश्चर्यं दर्शनं यस्य सः (ब०व्री०) = आश्चर्यजनक।

राजा—(नीचे देखकर) वेग से उतरने के कारण मनुष्य-लोक आश्चर्यजनक दृश्य वाला दिखायी पड़ रहा है। क्योंकि—

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः।
सन्तानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते॥ ८॥

अन्वय—मेदिनी उन्मज्जतां शैलानां शिखरात् अवरोहति इव, पादपाः स्कन्धोदयात् पर्णाभ्यन्तरलीनतां विजहति, तनुभावनष्टसलिलाः आपगाः सन्तानैः व्यक्तिं भजन्ति, पश्य उत्क्षिपता केनापि भुवनं मत्पार्श्वम् आनीयते इव।

शब्दार्थ—मेदिनी = पृथ्वी। उन्मज्जताम् = उभरते हुये, प्रकट होते हुये। शैलानाम् = पर्वतों के। शिखरात् = शिखर से। अवरोहति इव = मानों नीचे उतर रही है। पादपाः = वृक्ष। स्कन्धोदयात् = तनों के प्रकट होने (दिखायी पड़ने) के कारण। पर्णाभ्यन्तरलीनताम् = पत्तों के भीतर छिपने को (पत्तों के भीतर छिपे हुये (रूप) को)। विजहति = छोड़ रहे हैं। तनुभावनष्टसलिलाः = कृशता (क्षीणता) के कारण जिनका जल दिखायी नहीं दे रहा था ऐसी (क्षीणता के कारण जलविहीन सी दिखायी देने वाली)। आपगाः = नदियाँ। सन्तानैः = विस्तार के कारण। व्यक्तिम् भजन्ति = प्रकटता को धारण कर रहीं है अर्थात् दृष्टिगोचर हो रही है। पश्य = देखिये। उत्क्षिपता = ऊपर फेंकने वाले। केनापि = किसी के द्वारा। भुवनम् = भूमण्डल। मत्पार्श्वम् = मेरे समीप। आनीयते इव = मानो लाया जा रहा है।

अनुवाद—पृथ्वी ऊपर की ओर उठते हुये (उभरते हुये) पर्वतों के शिखर से मानो नीचे उतर रही है। वृक्ष तनों के प्रकट होने (दिखायी पड़ने) के कारण (मानो) पत्तों के भीतर छिपना छोड़ रहे हैं। कृशता (क्षीणता) के कारण जलविहीन सी दिखायी पड़ने वाली नदियाँ विस्तार के कारण (मानो) प्रकट हो रही हैं। देखिये, ऐसा मालूम पड़ता है कि भूमण्डल मानो किसी के द्वारा उछालकर मेरे पास लाया जा रहा है।

संस्कृत व्याख्या—**मेदिनी** – पृथ्वी, **उन्मज्जतां** – प्रकटीभवताम् , **शैलानां** – पर्वतानाम् , **शिखरात्** – शृङ्गात् , **अवरोहति इव** – अधोयाति इव, **पादपाः** – वृक्षाः, **स्कन्धोदयात्** – प्रकाण्डानां प्राकट्यात् , **पर्णाभ्यन्तरलीनतां** – पर्णानां पत्राणां मध्ये लीनतां (तदाकारतामित्यर्थः) गुप्तताम् , **विजहति** – त्यजन्ति, **तनुभावनष्टसलिलाः** – तनुभावेन कृशतया अदृश्यं जलं यासां तादृश्यः, **आपगाः** – नद्यः, **सन्तानैः** – विस्तारैः, (दृष्टौ), **व्यक्तिं भजन्ति** – प्राकट्यं व्रजन्ति प्रकटीभवन्ति, **पश्य** – अवलोकय, **उत्क्षिपता** – कन्दुकवदूर्ध्वं निक्षिपता, **केनापि** – जनेन, **भुवनं** – भूमण्डलम् , **मत्पार्श्वम्** – मम समीपे, **आनीयते इव** – प्राप्यते इव।

संस्कृत-सरलार्थः—भूमण्डलसमीपमागच्छन् राजा मातलिं वक्ति – 'भवान् पश्यतु यदधोदृश्यमानेयं पृथ्वी प्रकटीभवतां पर्वतानामग्रभागेभ्योऽवतरतीव परिलक्ष्यते। अधो लक्ष्यमाणा इमे वृक्षाः सम्प्रति स्वपत्राभ्यन्तरगुप्ततां परित्यजन्ति – अर्थात् स्पष्टतो दृश्यन्ते दूरादवलोकनात् क्षीणतया सलिलविहीना इव दृश्यमाना नद्य इदानीं पूर्णजलाः सत्यो नयनगोचरत्वं यान्ति। अवलोकय, साम्प्रतमेवं प्रतीयते यत् केनापि समुत्क्षिप्येदं भूमण्डलं मत्समीपं प्राप्यते इव।

व्याकरण—स्कन्धोदयात् – स्कन्धानां उदयात् (तत्पु०)। पर्णाभ्यन्तरलीनतां – पर्णानाम् अभ्यन्तरे लीनताम् (तत्पु०)। तनुभावनष्टसलिलाः – तनुभावेन नष्टानि सलिलानि यासां ताः (बहु०)। उत्क्षिपता – उत्+क्षिप+शतृ, तृ०एक०। विजहति – वि+हा+लट् प्र०पु०ए०व०। व्यक्तिम् – वि+अञ्ज+क्तिन्। उन्मज्जताम् – उत्+मज्ज+शतृ – षष्ठी बहुवचन।

कोष—'अस्त्री प्रकाण्डः स्कन्धः स्यात्' – इत्यमरः। 'सलिलं कमलं जलम्' इति धरणिः।

अलङ्कार—(१) इस श्लोक में 'अवरोहतीव' तथा 'उत्क्षिपतेव' में इव सम्भावना के अर्थ में प्रयुक्त है अतः **'उत्प्रेक्षा'** अलङ्कार है। ल०द्र० १/१८ श्लो०। 'मत्पार्श्वमानीयते' – यहाँ

उत्प्रेक्षावाचक 'इवादि' शब्दों का प्रयोग नहीं हुआ है पर 'अनीयते इव' इस प्रकार व्याख्या करने पर **'गम्योत्प्रेक्षा'** है। (२) सम्पूर्ण पद्य में आकाश से उतरते हुये रथ के समय सभी वस्तुओं का स्वाभाविक वर्णन होने से **'स्वभावोक्ति'** अलङ्कार है। ल०द्र० १/७ श्लो०। (३) चतुर्थ चरण के वाक्यार्थ के प्रति प्रथम तीन चरणों के वाक्यार्थ हेतु हैं, अतः **'काव्यलिङ्ग'** अलङ्कार है। ल०द्र० १/४ श्लो०।

छन्द—इस पद्य में **'शार्दूलविक्रीडित'** छन्द है। ल०द्र० १/१४ श्लो०।

टिप्पणी—(१) **मेदिनी** – पुराणें के अनुसार विष्णु ने मधु और कैटभ नामक राक्षसों को मारा था जिससे पृथ्वी उनकी चर्बी (मेदस्) से व्याप्त हो गयी। अतः पृथ्वी को मेदिनी कहा जाता है – मधुकैटभयोरासीन्मेदसैव परिप्लुता। तेनेयं मेदिनी ख्याता प्रोच्यते ब्रह्मवादिभिः॥ देवीभागवत में भी कहा गया है—'मधुकैटभयोर्मेदःसंयोगान्मेदिनी स्मृता। धारणाच्च धरा प्रोक्ता पृथिवी विस्तरयोगतः'॥ (२) आकाश में काफी ऊँचाई पर उड़ते हुये वायुयान से नीचे पृथ्वी पर उतरते हुये नीचे जैसा दिखायी पड़ता है, उसी का वर्णन इस श्लोक में किया गया है। पहले तो पृथ्वी और पर्वतों का भेद प्रतीत नहीं होता, किन्तु ज्यों-ज्यों नीचे की ओर आते हैं त्यों-त्यों पृथ्वी पर्वत की चोटियों से नीचे सरकती हुयी सी दिखायी पड़ती है। दूर से पत्तों में छिपे पेड़ निकट आने पर दिखायी पड़ने लगते हैं। दूर से (ऊँचाई से) नदियों का जल नहीं दिखायी देता, किन्तु नीचे आने पर वे जलयुक्त दिखायी पड़ने लगती हैं। (३) रेल वायुयान इत्यादि से यात्रा करते समय ऐसा प्रतीत होता है कि पृथ्वी और वृक्षादि चल रहे हैं। आकाश मार्ग से पृथ्वी की ओर रथ से आते हुये राजा दुष्यन्त को ऐसा प्रतीत हो रहा है कि कोई व्यक्ति पृथ्वी को उछाल कर उनकी ओर ले जा रहा है।

मातलिः—साधु दृष्टम्। (सबहुमानमवलोक्य) **अहो, उदाररमणीया पृथ्वी।**

व्या० एवं श०—उदाररमणीया – उदारा चासौ रमणीया = विशाल और रमणीय। सबहुमानम् – बहुमानेन सहितम् = अत्यधिक आदरपूर्वक।

मातलि—(आप ने) ठीक देखा। (अत्यधिक आदरपूर्वक देखकर) अहो, यह पृथ्वी (कितनी) विशाल और रमणीय (चित्ताकर्षक) है।

राजा—मातले, कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिस्यन्दी सान्ध्य इव मेघपरिघः सानुमानवलोक्यते?

व्या० एवं श०—कतमः – किम्+उतमच् (तम) = बहुतों में कौन। पूर्वापरसमुद्रावगाढः – पूर्वम् अपरं च समुद्रम् अवगाढः – तत्पु० = पूर्व और पश्चिम समुद्र तक प्रविष्ट (फैला हुआ)। कनकरसनिस्यन्दी – कनकरसस्य निस्यन्दः सः अस्यास्तीति मत्वर्थ में 'इनि' (इन्) = स्वर्ण-रस को बहाने वाला। निस्यन्द की ये दोनों व्युत्पत्तियाँ ठीक हैं – निष्यन्द तथा निस्यन्द। यहाँ 'अनुविपर्य...' (८-३-७२) से 'स्' को वैकल्पिक 'ष्' होता है। सान्ध्यः – सन्ध्यायाः अयम् (सन्ध्या+अण्) सान्ध्यः = सन्ध्याकालीन। मेघपरिघः – मेघानां-जलदानां परिघः – अर्गलः इव = मेघ की अर्गला के समान। यह पद 'सानुमान्' इस पद का विशेषण है। यहाँ 'परिघ' 'अर्गला' से औपम्यविधान पर्वत की दीर्घाकारता को प्रदर्शित करने के लिये है। सानुमान् – सानुः अस्यास्तीति – सानु+मतुप् = चोटी वाला अर्थात् पर्वत।

राजा—मातलि, यह पूर्व और पश्चिम समुद्र में प्रविष्ट, सुवर्ण के रस को बहाने वाला

सायंकालीन मेघों की अर्गला (परिधि) के समान यह कौन पर्वत दिखायी पड़ रहा है ?

मातलिः—**आयुष्मन् , एष खलु हेमकूटो नाम किंपुरुषपर्वतस्तपःसंसिद्धिक्षेत्रम् । पश्य**—

व्या० एवं श०—हेमकूटः – हेम्नः काञ्चनस्य कूटानि शृंङ्गाणि यस्य सः = सोने की चोटी वाला पर्वत । किंपुरुषपर्वतः – किन्नरों का पर्वत । तपःसंसिद्धिक्षेत्रम् – तपसः संसिद्धेः क्षेत्रम् = तपस्या की सिद्धि का क्षेत्र ।

मातलि—चिरञ्जीविन् , यह तपस्या का सिद्धि-क्षेत्र किन्नरों का हेमकूट नामक पर्वत है । देखिये—

टिप्पणी—**'हेमकूटो नाम किंपुरुषपर्वतः'** – किंपुरुष का अर्थ किन्नर होता है । इनका शरीर मनुष्य का होता है और सिर घोड़े का। अमरकोष में कहा गया है—'स्यात्किन्नरः किम्पुरुषसस्तुरङ्गवदनः' । इन्हें कुबेर का सेवक कहा जाता है । इन किंपुरुषों (किन्नरों) का निवास स्थानभूत पर्वत 'हेमकूट' है । 'हेमकूट' का यह नाम अन्वर्थक है क्योंकि वह सोने की चोटी वाला है । किंपुरुषपर्वत को किंपुरुषवर्षपर्वत भी कहा जाता है । प्राचीन भारतीय साहित्य में नौ 'वर्ष' माने गये हैं । उनके नाम हैं—(१) कुरु, (२) हिरण्मय, (३) रम्यक, (४) इलावृत, (५) हरि, (६) केतुमाल, (७) भद्राश्व, (८) किंपुरुष-किन्नर, (९) भारत । किंपुरुषवर्ष भारत के उत्तर में स्थित माना गया है । 'हेमकूट' इस वर्ष का प्रधान पर्वत है । यह पर्वत हिमालय के उत्तर कैलास के समीप माना जाता है ।

'हेमकूट' का उल्लेख विष्णु पुराण में आया है—'हिमवान् हेमकूटश्च निषधस्तस्य दक्षिणे । नीलश्वेतश्च भृङ्गी च उत्तरे वर्षपर्वताः ।। लक्ष्यमाणौ द्वौ मध्यौ इति । किंपुरुषपर्वत का उल्लेख भी मिलता है—'भारतं प्रथमं वर्षं ततः किंपुरुषः स्मृतम् । हरिवर्षं तथैवान्यन्मेरो- र्दक्षिणतो द्विज ।। – इति ।

स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति ।। ९ ।।

अन्वय—स्वायम्भुवात् मरीचेः यः प्रजापतिः प्रबभूव, सुरासुरगुरुः सः सपत्नीकः अत्र तपस्यति ।

शब्दार्थ—स्वायम्भुवात् = ब्रह्मा के पुत्र । मरीचेः = मरीचि से । यः = जो । प्रजापतिः = प्रजापति । प्रबभूव = उत्पन्न हुये हैं । सुरासुरगुरुः = देवताओं और राक्षसों के पिता (गुरु) । सः = वे । सपत्नीकः = पत्नी के साथ । अत्र = यहाँ । तपस्यति = तपस्या कर रहे हैं ।

अनुवाद—ब्रह्मा के पुत्र मरीचि से जो प्रजापति (कश्यप) उत्पन्न हुये हैं, देवताओं और राक्षसों के पिता वे (प्रजापति) (अपनी) पत्नी के साथ यहाँ तपस्या कर रहे हैं ।

संस्कृत व्याख्या—**स्वायम्भुवात्** – स्वयम्भूः ब्रह्मा तस्य मानसपुत्रात् , **मरीचेः** – तन्नामकात् , **यः प्रजापतिः** – जगत्स्रष्टा, **प्रबभूव** – जज्ञे, **सुरासुरगुरुः** – देवदानवपिता, **सः** – प्रजापतिः, **सपत्नीकः** – पत्न्या सहितः, **अत्र** – अस्मिन् पर्वते, **तपस्यति** – तपश्चरति ।

संस्कृत-सरलार्थः—मातलिस्तपःसंसिद्धिक्षेत्रं हेमकूटं वर्णयन् राजानं वदति यत् पर्वतेऽस्मिन् स्वायम्भुवान्मरीचेर्यः प्रजापतिरभूत्, सुरासुरजनकः स स्वधर्मपत्न्या सहितः पर्वतेऽस्मिन् तपस्याञ्चरति ।

व्याकरण—स्वायम्भुवान् – स्वयम् आत्मना भवतीति स्वयम्भूः ब्रह्मा तस्य अपत्यम्

इति स्वायम्भुवः (स्वयम्+भू+अण्) तस्मात् = ब्रह्मा पुत्र से। सुरासुरगुरुः – सुराणामसुराणाञ्च गुरुः। तपस्यति – तपः चरति – 'कर्मणो रोमन्थ... (३-१-१५) से क्यङ् (य) और 'तपसः परस्मैपदं च' वार्तिक से रस्मैपद – लट्+प्र०पु०ए०व०।

अलङ्कार—प्रस्तुत श्लोक में 'अनुप्रास' अलङ्कार है।

छन्द—पद्य में **'पथ्यावक्त्र'** छन्द है। ल०द्र० १/५ श्लो०।

टिप्पणी—प्रजापतिः – प्रजापति का अभिप्राय कश्यप से है। मरीचि के पुत्र होने के कारण उन्हें 'मारीच' भी कहते हैं। इनकी अनेक पत्नियों (दक्ष की चौदह कन्याओं) में दो मुख्य थीं १. दिति, २. अदिति। 'दिति' से दैत्य 'दितेरपत्यं पुमान् दैत्यः' और 'अदिति' से देवता 'अदितेरपत्यं पुमान् आदित्यः – देवता' उत्पन्न हुये। इस प्रकार ये देवों तथा दैत्यों – दोनों के पिता (जनक) कहे जाते हैं। इसीलिये इन्हें 'सुरासुराणां गुरुः' कहा गया है। महाभारत के सात प्रजापतियों और विष्णु पुराण के नौ प्रजापतियों में इनका नाम परिगणित नहीं है। महाभारत में कश्यप को मरीचि का पुत्र कहा गया है—'मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः। प्रजज्ञिरे महाभागा दक्षकन्याश्चतुर्दश' ॥

राजा—तेन ह्यनतिक्रमणीयानि श्रेयांसि। प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि।

व्या० एवं श०—अनतिक्रमणीयानि – अति+क्रम+अनीयर अतिक्रमणीयम् तानि अतिक्रमणीयानि; न अतिक्रमणीयानि अनतिक्रमणीयानि = अनुल्लङ्घनीय। यह पद श्रेयांसि का विशेषण है। दोनों का सम्मिलित भाव है कि कल्याणकर वस्तुओं का उल्लङ्घन (अनादर-उपेक्षा) नहीं करनी चाहिये। इसका वास्तविक अभिप्राय यह है कि कल्याणकर मङ्गलप्रद व्यक्ति या वस्तु यदि उपस्थित हो तो उसको प्रणाम-प्रदक्षिणा आदि करके कहीं जाना चाहिये। इस आचारसंहिता का उल्लङ्घन करने वाला व्यक्ति सुखी नहीं होता। इसीलिये दुष्यन्त कश्यप मुनि को प्रणाम आदि करते हुये आगे जाना चाहते हैं। रघुवंश में इसी प्रकार का भाव व्यक्त किया गया है—प्रतिबध्नातिहि श्रेयः पूज्यपूजाव्यतिक्रमः। रघु० १/७९। **प्रदक्षिणीकृत्य** – प्रगतं दक्षिणं प्रदक्षिणमिति (प्रा०स०) न प्रदक्षिणम् प्रदक्षिणमप्रदक्षिणं प्रदक्षिणं कृत्वा इति प्रदक्षिण+च्वि+कृ+क्त्वा – ल्यप् = प्रदक्षिणा कर। प्रदक्षिण शब्द की व्युत्पत्ति इस प्रकार भी की जा सकती है—'प्रकृष्टं दक्षिणमस्य इति प्रदक्षिणम् (अव्ययी०) तत् अस्ति अस्य इति प्रदिक्षण+अच् (मत्वर्थे) प्रदक्षिणः। मनु के अनुसार ये वस्तुयें अथवा प्राणी प्रदक्षिणा के योग्य हैं—'मृदङ्गं दैवतं विप्रं घृतं मधु चतुष्पदम्। प्रदक्षिणानि कुर्वीत प्रख्यातं च वनस्पतिम्' ॥ मनु०।

राजा—तो कल्याण करने वाली वस्तुयें अनुलङ्घनीय होती हैं। मैं भगवान् (कश्यप) की प्रदक्षिणा करके ही (यहाँ से) जाना चाहता हूँ।

मातलि—प्रथमः कल्पः। (नाट्येनावतीर्णौ)

व्या० एवं श०—प्रथमः कल्पः = उत्तम विचार।

मातलि—यह विचार ठीक है। (अभिनयपूर्वक दोनों उतर गये)।

राजा—(सविस्मयम्)—

राजा—(आश्चर्यपूर्वक)—

उपोढशब्दा न रथाङ्गनेमयः प्रवर्तमानं न च दृश्यते रजः।
अभूतलस्पर्शतयाऽनिरुद्धतस्तवावतीर्णोऽपि रथो न लक्ष्यते ॥ १० ॥

अन्वय—अभूतलस्पर्शतया रथाङ्गनेमयः उपोढशब्दाः न, रजः च प्रवर्तमानं न दृश्यते, अनिरुद्धतः तव रथः अवतीर्णः अपि न लक्ष्यते।

शब्दार्थ—अभूतलस्पर्शतया = पृथ्वी का स्पर्श न होने के कारण। रथाङ्गनेमयः = रथ के पहियों की नेमियाँ (प्रान्तभाग)। उपोढशब्दाः न = जिनके द्वारा शब्द उत्पन्न किया गया है ऐसा नहीं (जिसने शब्द (आवाज) नहीं किया है। रजः = धूलि। च = और। प्रवर्तमानम् = उठती (उड़ती) हुयी। न = नहीं। दृश्यते = दिखायी पड़ रही हैं। अनिरुद्धतः = ऊपर-नीचे न होने के कारण, (उद्घात (झटका) न लगने के कारण)। तव = तुम्हारा। रथः = रथ। अवतीर्णः = उतरा हुआ। अपि = भी। न लक्ष्यते = नहीं दिखायी दे रहा है (नहीं प्रतीत हो रहा है)।

अनुवाद—पृथ्वी का स्पर्श न होने के कारण रथ के पहियों की नेमियों (प्रान्तभागों) ने शब्द नहीं किया है और (कहीं) धूल भी उठती (उड़ती) हुयी नहीं दिखायी पड़ रही है। (झटका उद्घात) न लगने के कारण (ऊपर-नीचे न होने के कारण) तुम्हारा (आपका) रथ (पृथ्वी पर) उतरा हुआ भी (उतर गया है ऐसा) प्रतीत नहीं हो रहा है।

संस्कृत व्याख्या—**अभूतलस्पर्शतया** – पृथिवीतलस्पर्शाभावेन, **रथाङ्गनेमयः** – रथाङ्गानां रथचक्राणां नेमयः चक्रप्रान्तभागाः, **उपोढशब्दाः न** – धृताः शब्दाः याभिः तादृश्यो भवन्ति, निःशब्दाः भवन्तीत्यर्थः, **रजः च** – धूलि च, **प्रवर्तमानम्** – तुरगखुरैः उद्गच्छत् , **न दृश्यते** – नावलोक्यते, **अनिरुद्धतः** – उद्घताभावात् अश्वप्रग्रहानिदाधात् , **तव** – मातलेः, **रथः** – स्यन्दनः, **अवतीर्णः अपि** – भूतले समागतः अपि, **न** – दृश्यते अवतीर्ण इति न प्रतीयते।

संस्कृत-सरलार्थ—रथचालनकौशलविषये राजा मातलिं सविस्मयं वदति – मातले ! पृथिवीस्पर्शाभावेन रथचक्रप्रान्तभागा ध्वनिं कुर्वाणा न सन्ति। उड्डीयमाना धूलिरपि क्वचिन्न दृश्यते। उद्घाताभावात्तव मातले रथः पृथिवीतलमागतोऽपि 'समवतीर्ण' इति न लक्ष्यते।

व्याकरण—रथाङ्गनेमयः – रथाङ्गानां नेमयः (तत्पु०)। उपोढशब्दाः – उपोढाः शब्दाः यैः ते (बहु०)। अभूतलस्पर्शतया – नास्ति भूतलस्पर्शः यस्य तथाभूततया। अनिरुद्धतः न निरुद्धम् अनिरुद्धम् (न०त०) तस्मात् हेतो पञ्चमी। उपोढः – उप+वह+क्त। अवतीर्ण – अव+तॄ+क्त।

कोष—'चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यादित्यमरः'।

अलङ्कार—(१) इस पद्य में रथावतरण रूप कारण के होने पर भी 'रथाङ्गनेमय उपोढशब्दो न' तथा 'प्रवर्तमानं रजो न दृश्यते' इन दो कार्यो के न होने के कारण यहाँ उक्तनिमित्ता **'विशेषोक्ति'** नामक अलङ्कार है। ल०द्र० ३/२३ श्लो०। (२) श्लोकगत पहले के वाक्य रथावतरण के ज्ञान के अभाव के प्रति हेतुरूप से कथित हैं अतः **'काव्यलिङ्ग'** अलङ्कार है। ल०द्र० १/४ श्लो०। (३) कुछ विद्वान् यहाँ 'अवतीर्णोऽपिं न लक्ष्यते' यहाँ पर **'विरोधाभास'** मानते हैं। ल०द्र० २/११ श्लो०।

छन्द—यहाँ **'वंशस्थ'** छन्द है। ल०द्र० ५/१७ श्लो०।

टिप्पणी—(१) जब पहिये की परिधि (रिम) की रगड़ पृथ्वी पर होती है तब आवाज (खड़खड़ाहट) होती है, धूलि उड़ती है और उद्घात (हचक) के कारण उसका रुकना भी मालूम हो जाता है। देवताओं का रथ भी देवताओं की भाँति पृथ्वी का स्पर्श नहीं करता—ऊपर ही रहता है। अतः रथ में खड़खड़ाहट नही हो रही है, धूल नहीं उड़ रही है और रथ का पृथ्वी पर उतरना भी नहीं मालूम हो रहा है।

मातलिः—एतावानेव शतक्रतोरायुष्मतश्च विशेषः ।

मातलि—इतनी ही इन्द्र (के रथ) की आप (के रथ) से विशेषता (अन्तर) है।

राजा—मातले, कतमस्मिन् प्रदेशे मारीचाश्रमः ?

राजा—हे मातलि, मरीचि के पुत्र (कश्यप, मारीचि) का आश्रम किस प्रदेश में (स्थान पर) है ?

मातलिः—(हस्तेन दर्शयन्)—

मातलि—(हाथ से दिखाता हुआ)—

वल्मीकार्धनिमग्नमूर्तिरुरसा सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसम्पीडितः ।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ।। ११ ।।

अन्वय—वल्मीकार्धनिमग्नमूर्तिः सन्दष्टसर्पत्वचा उरसा जीर्णलताप्रतानवलयेन कण्ठे अत्यर्थसम्पीडितः अंसव्यापि शकुन्तनीडनिचितं जटामण्डलं बिभ्रत् स्थाणुः इव अचलः असौ मुनिः यत्र अर्कबिम्बम् अभिस्थितः ।

शब्दार्थ—वल्मीकार्धनिमग्नमूर्तिः = जिनका आधा शरीर वल्मीक (बिमोट-बांबी) में निमग्न (अर्थात् उससे आच्छादित-ढका हुआ) है ऐसे (वल्मीकसे आच्छादित हुये आधे शरीर वाले)। सन्दष्टसर्पत्वचा = जिस पर साँप की केंचुल लिपटी हुयी है ऐसी (लिपटी हुयी साँप की केंचुल वाली)। उरसा = छाती से युक्त। जीर्णलताप्रतानवलयेन = पुरानी लताओं के तन्तुओं के समूह (के लिपट जाने) के कारण। कण्ठे = गले में। अत्यर्थसम्पीडितः = अत्यधिक पीड़ित। अंसव्यापि = कन्धों तक फैले हुये (व्याप्त)। शकुन्तनीडनिचितं = पक्षियों के घोसलों से व्याप्त (परिपूर्ण)। जटामण्डलम् = जटाओं के समूह को। बिभ्रत् = धारण करते हुये। स्थाणुः इव = ठूँठ की भाँति। अचलः = निश्चल। असौ = ये। मुनिः = मुनि। यत्र = जहाँ। अर्कबिम्बम् अभि = सूर्यमण्डल को लक्षित कर (सूर्य मण्डल की ओर मुख कर)। स्थितः = स्थित है।

अनुवाद—बिमोट-बांबी से आच्छादित (ढके हुये) आधे शरीर वाले, लिपटी हुयी साँप की केंचुल वाली छाती से युक्त, पुरानी लताओं के तन्तुओं के समूह (के लिपट जाने) के कारण गले में अत्यधिक पीड़ित और कन्धे तक फैले हुये तथा पक्षियों के घोंसले से व्याप्त (परिपूर्ण) जटाओं के समूह को धारण करते हुये ठूँठ की भाँति निश्चल ये मुनि जहाँ पर सूर्य-मण्डल की ओर (मुख कर) स्थित हैं। (वहीं कश्यप ऋषि का आश्रम है)।

संस्कृत व्याख्या—वल्मीकार्धनिमग्नमूर्तिः – पिपीलिकाकृतस्तूपे अर्धं निमग्ना निविष्टा मूर्तिः शरीरं यस्य तथाभूतः सः, **सन्दष्टसर्पत्वचा** – संसक्ता नागानां कञ्चुकाः यत्र तेन, **उरसा** – वक्षसा युक्तः, **जीर्णलताप्रतानवलयेन** – जीर्णानां प्राचीनानां (शुष्काणां) वल्लरीतन्तूनां वलयेन वेष्टनेन, **कण्ठे** – ग्रीवायाम्, **अत्यर्थसम्पीडितः** – अत्यधिकं क्लेशितः, **अंसव्यापि** – स्कन्धव्यापि, **शकुन्तनीडनिचितं** – शकुन्तानां पक्षिणां कुलायैः व्याप्तम्, **जटामण्डलं** – जटानां समूहम्, **बिभ्रत्** – धारयन्, **स्थाणुः इव** – शुष्कवृक्षकाण्डः इव, **अचलः** – निश्चलः, **असौ मुनिः** – अयम् ऋषिः, **यत्र** – यस्मिन् स्थाने, **अर्कबिम्बम् अभि** – सूर्यमण्डलं लक्ष्यीकृत्य, **स्थितः** – तिष्ठति।

संस्कृत-सरलार्थः—मारीचाश्रमं हस्तेन निर्दिशन् मातलिर्वदति राजानम् – यत्र

स्थाणुरिवाचलो मुनिर्मारीचः सूर्यमण्डलं लक्ष्यीकृत्य तिष्ठति स एव मारीचाश्रमोऽस्ति। तपश्चरतोऽस्यमुनेरर्धशरीरं वल्मीकेनाच्छादितमस्ति। अस्य वक्षःस्थले सर्पत्वचः संलग्नाः सन्ति। शुष्कलतातन्तुवेष्टनेनायं मुनिः कण्ठस्थले भृशं पीडितोऽस्ति तथा चायं स्कन्धव्याप्तं पक्षिनीडभरितं जटामण्डलं धारयन् राजते।

व्याकरण—वल्मीकार्धनिमग्नमूर्तिः – वल्मीके अर्धं निमग्ना (नि+मस्ज+क्त) मूर्तिः यस्य सः (बहु०)। सन्दष्टसर्पत्वचा – सन्दष्टा (सम्+दश+क्त+टाप्) सर्पाणां त्वचः यत्र तेन (बहु०)। जीर्णलताप्रतानवलयेन – जृ+क्त+टाप् – जीर्णा तासाम् जीर्णानां लताप्रतानानां वलयेन (बहु०)। अंसव्यापि – अंसौ व्याप्नोति इति तत्। शकुन्तनीडनिचितं – शकुन्तानां नीडैः निचितम् (तत्पु०) नि+चि+क्त। बिभ्रत् – वि+भृ+शत्। अभ्यर्कबिम्बम् – यहाँ 'अभिरभागे' सूत्र से 'अभि' की कर्मप्रवचनीय संज्ञा और 'कर्मप्रव' सूत्र से 'अर्क' में द्वितीया हुई है।

कोष—'वल्ली तु व्रततिर्लता' – इत्यमरः। 'कुलायो नीडमस्त्रियाम्'– इत्यमरः।

अलङ्कार—(१) 'स्थाणुरिवाचलः' में श्रौती **'पूर्णोपमा'** अलङ्कार है। ल०द्र० १/५। (२) पूर्वोक्त सभी विशेषण 'मारीच' की भाँति 'स्थाणु' के पक्ष में भी लगते हैं अतः द्व्यर्थक होने के कारण **'श्लेष'** अलङ्कार है। ल०द्र० २/७ श्लो०। (३) सभी विशेषणों के साभिप्राय होने से **'परिकर'** अलङ्कार है। ल०द्र० १/२३ श्लो०।

छन्द—यहाँ **'शार्दूलविक्रीडित'** छन्द है। ल०द्र० १/१४ श्लो०।

टिप्पणी—(१) प्रायः सूखे वृक्ष अथवा ठूँठ पर दीमक मिट्टी का ऊँचा ढेर बना देते हैं उसे वल्मीक या बांबी कहते हैं। ठूँठ समझकर समाधि लगाये हुये मुनि के चारों ओर दीमकों ने बामी बना ली है। मुनि की छाती में केंचुले लिपटी हुयी है और पक्षियों ने मुनि को सूखा वृक्ष और जटाओं को झाड़ी समझकर उनमें अपना घोसला बना लिया है। मुनि को इनका पता नहीं है। इसमें निर्विकल्पक समाधि की पूर्ण अवस्था और उनकी कठोर तपस्या की अभिव्यक्ति हो रही है।

राजा—नमस्ते कष्टतपसे।

व्या० एवं श०—कष्टतपसे – कष्टं कृच्छ्रं तपः यस्य तस्यैः, कठोर तप वाले। 'नमः स्वस्ति' से 'चतुर्थी'।

राजा—कठोर तपस्या करने वाले (मुनि) को (मेरा) प्रणाम है।

मातलिः—(संयतप्रग्रहं रथं कृत्वा) **एतावदितिपरिवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः।**

व्या० एवं श०—संयतप्रग्रहं – संयतः कराभ्यां धृतः प्रग्रहः यस्य सः तम् = लगाम खींचकर। अदितिपरिवर्धितमन्दारवृक्षम् – अदित्या कश्यपपत्न्या परिवर्धित जलसेकादिना वृद्धिं प्रापितः मन्दारवृक्षः यस्मिन् तम् (ब०व्री०) = अदिति के द्वारा परिवर्धित मन्दारवृक्ष वाले।

मातलि—(रथ के घोड़ों की लगाम खींचकर) अदिति के द्वारा (जल सेचनादि द्वारा) परिवर्धित मन्दार वृक्ष वाले, प्रजापति (कश्यप) के आश्रम में हम लोग प्रविष्ट हो गये हैं।

राजा—स्वर्गादधिकतरं निर्वृतिस्थानम्। अमृतह्रदमिवावगाढोऽस्मि।

व्या० एवं श०—निर्वृतिस्थानम् – निर्वृतिः – निर्+वृ+क्तिन् निर्वृतिः तस्याः स्थानम् (ष०त०) = सुख-शान्ति का स्थान। 'निर्वृतिः सुस्थित्यां स्यादस्तंगमनसौख्ययोः' इति विश्वप्रकाशकोषः। अमृत ह्रदम् – अमृतस्य ह्रदः तम् – (ष०त०)। 'पीयूषममृतं सुधा' इत्यमरः।

राजा—स्वर्ग से भी अधिक शान्तिप्रद (सुखप्रद) स्थान है। (इस स्थान में आकर) मानो मैं अमृत के सरोवर में डुबकी लगा रहा हूँ।

मातलिः—(रथं स्थापयित्वा) **अवतरत्वायुष्मान्।**

व्या० एवं श०—अवतरतु - अव+तृ+लोट्+प्र०पु०ए०व० = उतरें।

मातलि—(रथ को रोककर) चिरञ्जीवी (आप) उतरें।

राजा—(अवतीर्य) **मातले, भवान् कथमिदानीम् ?**

राजा—(उतरकर) हे मातलि, अब आप क्या (करेंगे) ?

मातलिः—**संयन्त्रितो मया रथः। वयमप्यवतरामः।** (तथा कृत्वा) **इत आयुष्मान्,** (परिक्रम्य) **दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः।**

व्या० एवं श०—संयन्त्रितः - सम्+यत्रि+क्त = अच्छी प्रकार रोका गया।

मातलि—मेरे द्वारा रथ अच्छी प्रकार रोक दिया गया है। हम लोग भी (अब) उतरते हैं। (वैसा कर अर्थात् उतरकर) चिरञ्जीविन्, इधर से (आइये)। (घूमकर) ऋषियों के तपोवन के स्थानों को (आप) देखें।

राजा—**ननु विस्मयादवलोकयामि।**

राजा—वस्तुतः मैं (स्थानों को) आश्चर्य से देख रहा हूँ।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी।। १२।।

अन्वय—सत्कल्पवृक्षे वने अनिलेन प्राणानां वृत्तिः उचिता, काञ्चनपद्मरेणुकपिशे तोये धर्माभिषेकक्रिया, रत्नशिलातलेषु ध्यानम्, विबुधस्त्रीसन्निधौ संयमः, अन्यमुनयः तपोभिः यत् काङ्क्षन्ति तस्मिन् अमी तपस्यन्ति।

शब्दार्थ—सत्कल्पवृक्षे = विद्यमान हैं कल्पवृक्ष जिसमें। वने = वन में। अनिलेन = वायु के द्वारा (वायु पीकर)। प्राणानाम् = प्राणों का (जीवन का)। वृत्तिः = व्यापार (यापन)। उचिता = अभ्यस्त अर्थात् वायु पीकर जीवन यापन के अभ्यस्त हैं। 'अभ्यस्तेऽप्युचितं न्याय्यम्' इतियादवः। काञ्चनपद्मरेणुकपिशे = स्वर्ण-कमलों के पराग से पीले। तोये = जल में। धर्माभिषेकक्रिया = धार्मिक स्नान-कार्य। रत्नशिलातलेषु = रत्नों के शिलाखण्डों पर। ध्यानम् = ध्यान। विबुधस्त्रीसन्निधौ = देवाङ्गनाओं के समीप में। संयमः = संयम (इन्द्रिय-निग्रह)। अन्यमुनयः = दूसरे मुनि। तपोभिः = तपस्याओं के द्वारा। यत् = जिन (वस्तुओं को)। काङ्क्षन्ति = चाहते हैं, इच्छा करते हैं। तस्मिन् = उनमें उनके सानिध्य में। अमी = ये। तपस्यन्ति = तपस्या करते हैं।

अनुवाद—कल्पवृक्षों वाले (इस) वन में (ये मुनि) वायु भक्षण के द्वारा (अपना) जीवन-यापन करने के अभ्यस्त हैं, स्वर्ण-कमलों के पराग से पीले जल में धार्मिक स्नान-कार्य करते हैं, रत्नों के शिलाखण्डों पर (बैठकर) ध्यान लगाते हैं तथा देवाङ्गनाओं के समीप में रहकर संयम (इन्द्रिय-निग्रह) करते हैं। दूसरे मुनि (अपनी) तपस्याओं के द्वारा जिन (वस्तुओं) को चाहते हैं, उन्हीं (वस्तुओं के बीच) में ये रहकर (मुनि) तपस्या करते हैं।

संस्कृत व्याख्या—सत्कल्पवृक्षे – विद्यमानाः कल्पवृक्षाः यस्मिन् , **तस्मिन् वने** – अरण्ये, **अनिलेन** – वायुना, **प्राणानां** – जीवनानाम् , **वृत्तिः** – धारणक्रिया, **उचिता** – अभ्यस्ता भवति वायुभक्षणेनैवैभिजीवनयात्रा क्रियते नतु कल्पवृक्षप्रदत्तस्वादुफलादिभिरित्यर्थः । **काञ्चनपद्मरेणुकपिशे** – सुवर्णकमलानां परागैः पिङ्गले, **तोये** – जले, **एषां धर्माभिषेकक्रिया** – धर्मिकस्नानकर्म, न तु विलासार्थं जलक्रीडायै जलावगाहनमित्यर्थः भवतीति शेषः, **रत्नशिलातलेषु** – मणिमयशिलापट्टेषु, **ध्यानम्** – ईश्वरचिन्तनम् , विधीयते इति शेषः, **विबुधस्त्रीसन्निधौ** – देवानां युवतीनां समीपे, **संयमः** – इन्द्रियनिग्रहः, क्रियते इति शेषः, **अन्यमुनयः** – अन्यतपस्विनः, **तपोभिः** – तपस्याभिः, **यत्** – वस्तु (यानि वस्तूनि), **काङ्क्षन्ति** – इच्छन्ति, **तस्मिन्** – तादृशभोगयुक्तवस्तुनि सति तादृशभोग्यवस्तुषु प्राप्तेष्वपीत्यर्थः । **अमी** – मुनयः, **तपस्यन्ति** – तपश्चरन्ति ।

संस्कृत-सरलार्थः—अभीष्टवस्तुदायकेषु कल्पवृक्षेषु विद्यमानेष्वपि – इमे मुनयः केवलं वायुभक्षणद्वारा स्वजीवन धारयन्ति । एते जलविहारतोयेष्वपि स्वर्णकमलपरागपिङ्गलेषु धार्मिकस्नानं कुर्वन्ति, न तु जलक्रीडां विदधतीत्यर्थः । मणिमयशिलाखण्डेषु स्थित्वा ध्यानं तथा देवाङ्गना-समीपे – इन्द्रियनिग्रहं कुर्वन्ति । अपरे मुनयो यानि वस्तूनि कामयन्ते स्वतपोभिस्तेषु प्राप्तेष्वपीमे तपश्चरन्ति ।

व्याकरण—काञ्चनपद्मरेणुकपिशे – काञ्चनपद्मानां रेणुभिः कपिशे त० । वृत्तिः – वृत्+क्तिन् । रत्नशिलातलेषु – रत्नशिलानां तलेषु – त० । ध्यानम् – ध्यै+ल्युट् । विबुधस्त्रीसन्निधौ – विबुधस्त्रीणां सन्निधौ – त० । काङ्क्षन्ति – काङ्क्ष+लट् प्र०पु०ब०व० ।

कोष—'अभ्यस्तेऽप्युचितं न्याय्यम्' इति यादवः । 'पञ्चैते देवतरवो मन्दारः पारिजातकः । संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ – इत्यमरः ।

अलङ्कार—(१) यहाँ कल्पवृक्ष कमलपद्मपुरेणुकपिश जल, रत्नशिला, देवाङ्गना आदि कारणों के विद्यमान रहने पर भी वायुभक्षण से प्राणधारण, स्नान ध्यान आदि विरुद्ध कार्यों का कथन होने से—कारण के रहने पर कार्याभाव रूप – उक्तनिमित्ता **'विशेषोक्ति'** अलङ्कार है । ल०द्र० ३/२२ । (२) चतुर्थ चरण में वर्णित वाक्यार्थ के प्रति प्रथम तीन चरण के वाक्यार्थ कारण रूप से उपन्यस्त हैं अतः **'काव्यलिङ्ग'** अलङ्कार है । ल०द्र० १/४ । (३) सामान्य मुनियों की अपेक्षा यहाँ के मुनियों के आधिक्य का वर्णन है अतः 'व्यतिरेक' अलङ्कार है । ल०द्र० १/२० ।

छन्द—'शार्दूलविक्रीडित' छन्द है । ल०द्र० १/१४ ।

टिप्पणी—(१) यह श्लोक मुनियों के कठोर संयम का आदर्श प्रस्तुत करता है । उपभोग के साधनों के न होने पर तो सभी लोग संयमी होते हैं । उनके रहने पर भी जो संयमी बन सके, वही वास्तविक संयमी है । इस आश्रम में कल्पवृक्ष, स्वर्ण-कमल, रत्नों के शिलाखण्ड और देवाङ्गनाओं (अप्सराओं) के विद्यमान रहने पर भी मुनिजन तपस्याकर रहे हैं, जबकि अन्य मुनिगण तपस्याओं द्वारा इन वस्तुओं को पाने की अभिलाषा रखते हैं ।

मातलिः—उत्सर्पिणी खलु महतां प्रार्थना । (परिक्रम्य । आकाशे) **अये वृद्धशाकल्य, किमनुतिष्ठति भगवान् मारीचः ? किं ब्रवीषि । दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयतीति ।**

व्याकरण एवं शब्दार्थ—उत्सर्पिणी – उत् ऊर्ध्वम् उपरि सर्पति गच्छति या सा तथोक्ता = ऊर्ध्वगामिनी – ऊपर की ओर जाने वाली – ऊँची । उत्सर्पिणी – उत्+सृप्+णिनि+ङीप् । प्रार्थना = अभिलाषा । दाक्षायिण्या – दक्षस्य अपत्यं स्त्री दाक्षायणी दक्ष+फक्+आयन+ङीप् तया =

अदिति के द्वारा। दाक्षायणी दक्ष प्रजापति की पुत्री थी। अधिकृत्य – अधि+कृ+क्त्वा–ल्यप् = आश्रित कर, के विषय में। मारीचः – मरीचेरपत्यं पुमान् मारीचः = कश्यप। महर्षिपत्नीसहितायै – महर्षीणां पत्न्यः ताभिः सहिता तस्यै = (अन्य) महर्षि-पत्नियों के साथ।

मातलि—बड़े लोगों (महात्माओं) की अभिलाषा सदा ऊर्ध्वगामिनी होती है। (घूमकर। आकाश में) हे वृद्ध शाकल्य, भगवान् मारीच (कश्यप) क्या कर रहे हैं ? क्या कह रहे हैं आप ? कि दाक्षायणी (अदिति) के द्वारा पूछे गये पतिव्रता धर्म के विषय में वे (अन्य) महर्षियों की पत्नियों के साथ उस (दाक्षायणी) को उपदेश दे रहे हैं।

राजा—(कर्णं दत्त्वा) **अये, प्रतिपाल्यावसरः खलु प्रस्तावः।**

व्या० एवं श०—प्रतिपाल्यावसरः – प्रतिपाल्यः प्रतीक्ष्यः अवसरः यस्य तादृशः (ब०ब्री०) = प्रस्ताव (प्रसङ्ग की समाप्ति के) अवसर की प्रतीक्षा करने योग्य। यह पद 'प्रस्तावः' इस पद का विशेषण है। प्रस्तावः – विषयान्तर प्रसङ्ग।

राजा—(कान लगाकर) अरे, (पतिव्रता धर्म का) प्रसङ्ग (प्रस्ताव) ऐसा है कि हमें (उसकी समाप्ति के) अवसर की प्रतीक्षा करनी चाहिये।

मातलिः—(राजानमवलोक्य) **अस्मिन्नशोकवृक्षमूले तावदास्तामायुष्मान् , यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि।**

व्या० एवं श०—इन्द्रगुरवे – इन्द्रस्य गुरुः (त०) = इन्द्र के गुरु (पिता) (कश्यप) से। अन्तरान्वेषी = अवसर की खोज करने वाला – अवसर को ढूँढ़ने वाला।

मातलि—(राजा को देखकर) तब तक चिरञ्जीवी (आप) इस अशोक वृक्ष के नीचे बैठें जब तक मैं इन्द्र के पिता (मारीच) से (आप के आगमन की सूचना देने के लिये) उचित अवसर खोजता हूँ।

राजा—यथा भवान् मन्यते। (इति स्थितः)।

राजा—जैसा आप (ठीक) समझें। (बैठता है)।

मातलिः—आयुष्मन् , साधयाम्यहम्। (इति निष्क्रान्तः)।

व्या० एवं श०—साधयामि = जाता हूँ। इस पद का जाने के अर्थ में प्रायः प्रयोग हुआ है।

मातलि—चिरञ्जीवी, मैं जा रहा हूँ। (निकल जाता है)।

राजा—(निमित्तं सूचयित्वा)—

राजा—(शकुन को सूचित करके)—

मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते॥ १३॥

अन्वय—मनोरथाय न आशंसे, बाहो ! वृथा किं स्पन्दसे, हि पूर्वावधीरितं श्रेयः दुःखं परिवर्तते।

शब्दार्थ—मनोरथाय = अभीष्ट (की प्राप्ति) के लिये। न = नहीं। आशंसे = आशा करता हूँ। बाहो ! = हे भुजा ! वृथा = व्यर्थ। किम् = क्यों। स्पन्दसे = फड़क रही हो। हि = क्योंकि। पूर्वावधीरितम् = पहले तिरस्कृत। श्रेयः = कल्याण। दुःखं परिवर्तते = दुःख में

बदल जाता है। अर्थात् वह (कल्याण) पुनः वापस नहीं आता।

अनुवाद—मैं (शकुन्तला रूप) अभीष्ट वस्तु (की प्राप्ति) की आशा नहीं करता हूँ। हे (मेरी दाहिनी) भुजा, तुम व्यर्थ (ही) क्यों फड़क रही हो। क्योंकि पहले तिरस्कृत किया गया कल्याण दुःख के रूप में बदल जाता है अर्थात् तिरस्कृत कल्याण की परिणति दुःख में ही होती है। वस्तुतः वह वापस नहीं आता।

संस्कृत व्याख्या—मनोरथाय – शकुन्तलासङ्गमरूपाभीष्टप्राप्तये, **न** – नहि, **आशंसे** – आशां करोमि, **बाहो !** – हे दक्षिणभुज, **वृथा** – व्यर्थमेव, **किं स्पन्दसे** – किं स्फुरसि; **हि** – यतः, **पूर्वावधीरितं** – पूर्वतिरस्कृतम् , **श्रेयः** – कल्याणम् , **दुःखं** – कष्टम् यथा स्यात्तथा, **परिवर्तते** – परिणमति।

संस्कृत-सरलार्थः—स्वदक्षिणभुजस्पन्दनं वरस्त्रीलाभसूचकं विज्ञाय राजा मनसि चिन्तयति – शुभशंसिना दक्षिणभुजस्पन्दनेन न कोऽपि लाभः। ममाभिलाषभूताया शकुन्तलायाः प्राप्तिरसम्भवैव। यतोहि तिरस्कृतं कल्याणं यथा दुःखरूपेणैव परिणमति। नूनं मया तिरस्कृता सा शकुन्तला न कथमपि लब्धुं शक्येति।

व्याकरण—अवधीरितम् – अव+धीर+क्त। वृथा – वृ+थाल्+किच्च।

अलङ्कार—(१) उत्तरार्द्धगत सामान्य से पूर्वार्द्धगत विशेष का समर्थन होने से **'अर्थान्तरन्यास'** अलङ्कार है। (२) इस श्लोक में प्रकृत (उपमेय) शकुन्तला का अप्रकृत (उपमान) से पूर्णनिगरण हो गया है अतः 'अतिशयोक्ति' अलङ्कार है। ल०द्र० ३/१७ श्लोक।

छन्द—'अनुष्टुप्' छन्द है। ल०द्र० १/५ श्लो०।

टिप्पणी—(१) **'किं बाहो। स्पन्दसे मुधा'** – गर्ग के मत में दक्षिण बाहु के फड़कने का फल इस प्रकार कहा गया है – दक्षिणबाहुस्पन्दनमर्थलाभं बन्धुदर्शनं तथा॥ (२) **'पूर्वावधीरितं...परिवर्तते'** इस वाक्य का अर्थ कई प्रकार से किया जा सकता है – जिस कल्याण कर वस्तु या प्राणी का तिरस्कार कर दिया जाता है वह दुःखद ही होता है। उसकी पुनः प्राप्ति असम्भव है। प्रस्तुत सन्दर्भ में दुष्यन्त के सोचने का अभिप्राय यह है कि उसके द्वारा प्रिय प्राणी शकुन्तला चूँकि पहले तिरस्कृत हो चुकी है अतः न उसकी प्राप्ति, नहीं सुख की प्राप्ति सम्भव है।

(नेपथ्ये) **मा खलु चापलं कुरु। कथं गत एवात्मनः प्रकृतिम् ?** (मा क्खु चावलं करेहि। कहं गदो एव्व अत्तणो पकिदिं ?)

व्या० एवं श०—प्रकृतिम् = (क्षत्रिय) स्वभाव को। गतः = प्राप्त।

(नेपथ्ये में) चञ्चलता मत करो। क्यों अपने (क्षत्रिय) स्वभाव को ही प्राप्त हो गया है ?

राजा—(कर्णं दत्त्वा) **अभूमिरियमविनयस्य। को नु खल्वेष निषिध्यते ?** (शब्दानुसारेणावलोक्य। सविस्मयम्) **अये, को नु खल्वयमनुबध्यमानस्तपस्विनीभ्यामबालसत्त्वो बालः ?**

व्या० एवं श०—अभूमिः = अस्थान। अविनयस्य = धृष्टता/उदण्डता को। निषिध्यते – नि+सिध्+यक् (कर्मणि) लट् प्र०पु०ए०व० = मना किया जा रहा है, रोका जा रहा है। सविस्मयम् – विस्मयेन सहितम् – (सहसुपा समास) = आश्चर्यसहित–आश्चर्यपूर्वक। अबालसत्त्वः – न बालः अबालः युवा तस्य सत्त्वमिव बलमिव सत्त्वं बलं (पराक्रमः) यस्य सः = युवक के समान बलशाली। सत्त्व का अर्थ बल और पराक्रम आदि होता है – 'सत्त्वोऽस्त्री जन्तुषु क्लीबे

व्यवसाये पराक्रमे' इति केशवः । सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः' इति विश्वः । अनुबध्यमानः – अनु+बध्+यक्+शानच् ।

राजा—(कान लगाकर) यह धृष्टता (उद्दण्डता) का स्थान नहीं है तो फिर यह कौन रोका जा रहा है ? (आवाज की ओर देखकर आश्चर्य पूर्वक) अरे, दो तपस्विनियों द्वारा अनुगमन किया जाता हुआ (असाधारण शक्तिशाली) युवा के समान बलशाली यह बालक कौन है ?

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ।। १४ ।।

अन्वय—मातुः अर्धपीतस्तनम् आमर्दक्लिष्टकेसरं सिंहशिशुं प्रक्रीडितुं बलात्कारेण कर्षति ।

शब्दार्थ—मातुः = माता के । अर्धपीतस्तनम् = स्तनों (के दूध) को जिसके द्वारा आधा ही पिया गया है ऐसे (स्तनों के दूध को आधा ही पिये हुये) । आमर्दक्लिष्टकेसरम् = रगड़ से (अथवा खींचने से) जिसके केसर (गले के बाल) बिखर गये हैं (खींचने से बिखरे हुये बालों वाले) । सिंहशिशुम् = सिंहशावक को । प्रक्रीडितुम् = खेलने के लिये । बलात्कारेण = बलपूर्वक (जबरदस्ती) । कर्षति = खींच रहा है ।

अनुवाद—जिसने माता के स्तनों के दूध को आधा ही पिया है तथा रगड़ने से (खींचने से) जिसके बाल (केसर) बिगड़ (बिखर) गये हैं ऐसे सिंहशावक (सिंह के बच्चे) को खेलने के लिये बलपूर्वक (हठपूर्वक) खींच रहा है (यह बालक कौन है ?)

संस्कृत व्याख्या—(कोऽयं बालः) **मातुः** – जनन्याः, **अर्धपीतस्तनम्** – अर्धम् असम्पूर्णं पीतः स्तनः येन तादृशम् , आमर्दक्लिष्टकेसरम् – आकर्षणेन विक्षिप्ताः केसराः यस्य तादृशम् , **सिंहशिशुं** – केशरिशावकम् , **प्रक्रीडितुं** – क्रीडां कर्तुम् , **बलात्कारेण** – प्रसह्य, **कर्षति** – आकर्षति ।

संस्कृत-सरलार्थः—द्वाभ्यां तपस्विनीभ्यामनु गम्यमानमपूर्वशक्तिसम्पन्नं सिंहशावकं कर्षन्तं बालमवलोक्य राजा कथयति यद् बालोऽयमपूर्वपराक्रमशाली वर्तते, यतो ह्यसौ विकीर्ण-क्लिष्टकेसरमर्धपीतस्तनं सिंहशावकं क्रीडनाय हठात् कर्षति । आश्चर्यकरोऽस्य पराक्रमः ।

व्याकरण—अर्धपीतस्तनम् – अर्धं पीतः स्तनः येन तम् (बहु०) । आमर्दक्लिष्टकेसरं – आमर्देन क्लिष्टाः केसराः यस्य तम् (बहु०) । सिंहशिशुं – सिंहस्य शिशुम् (तत्पु०) । प्रक्रीडितुम् – प्र+क्रीड्+तुमुन् । प्रसह्य – प्र+सह्+क्त्वा – ल्यप् । कर्षति – कृष्+लट्+प्र०पु०ए०व० ।

कोष—'सिंहसटासु पन्नागो बकुले नागकेशरे, केशरः पुंसि' इति त्रिकाण्डशेषः ।

अलङ्कार—(१) इस पद्य में बाल-चेष्टाओं का स्वाभाविक वर्णन होने से **'स्वभावोक्ति'** अलङ्कार है । ल०द्र० १/७ । (२) बालक के उदात्त चरित्र का वर्णन होने से **'उदात्त'** अलङ्कार भी है । ल०द्र० ७/२ ।

छन्द—यहाँ **'अनुष्टुप्'** छन्द है । ल०द्र० १/५ ।

टिप्पणी—(१) इस श्लोक से जहाँ बाल स्वभाव का जीता जागता चित्र प्रतिबिम्बित होता है वहीं बालक सर्वदमन के अतुलित पराक्रम एवं शक्ति का भी प्रकाशन होता है । (२) काव्य में इसी प्रकार का वर्णन अन्यत्र भी हुआ है जैसे—(१) बुद्धचरित का यह श्लोक – बालोऽबालप्रतिभो बभूव धृत्या च शौचेन धिया श्रिया च (२) कुमारसम्भव का यह श्लोक – गृह्णन् विषाणे हरवाहनस्य स्पृशन्नुमाकेसरिणः सटालीः'' प्रमदाय पित्रोः ।

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां सह बालः) ।

(तत्पश्चात् पूर्वोक्त कार्य करता हुआ दो तपस्विनियों के साथ बालक प्रवेश करता है)।

बालः—जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये । (जिम्भ सिंघ, दन्ताइं दे गणइस्सं ।)

व्या० एवं श०—यथानिर्दिष्टकर्मा – यथानिर्दिष्टम् निर्देशानुरूपम् सिंहशावककर्षणरूपं कर्म यस्य सः = पूर्वोक्त कार्य करता हुआ। यह पद 'बाल' इस पद का विशेषण है । जृम्भस्व – जृम्भ्+लोट् प्र०पु०ए०व० = मुख खोलो ।

बालक—हे सिंह, तुम जँभाई लो (अथवा मुँह खोलो), मैं तुम्हारे दाँतों को गिनूँगा।

प्रथमा—अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि ? हन्त, वर्धते ते संरम्भः । स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि । (अविणीद, किं णो अपच्चणिव्विसेसाणि सत्ताणि विप्पअरेसि ? हन्त वड्ढइ दे संरम्भो। ठाणे क्खु इसिणेण सव्वदमणो त्ति किदणामहओ सि।)

व्या० एवं श०—अपत्यनिर्विशेषाणि – अपत्येभ्यः सन्तानेभ्यः निर्विशेषाणि अभिमानि (सन्तानतुल्यानि) = सन्तान के समान। यह पद 'सत्त्वानि' इस पद का विशेषण है । सत्त्वानि – प्राणियों को। विप्रकरोषि – वि+प्र+कृ+लट् म०पु०ए०व० = उत्पीड़ित (परेशान) कर रहे हो ? संरम्भः = क्रोध। स्थाने – यह अव्यय है। इसका अर्थ ठीक, समीचीन होता है। कृतनामधेयः – कृतं नामधेयं नाम यस्य तादृशः। पूर्वपद 'सर्वदमन इति' के साथ जुड़कर इसका अर्थ होगा = सर्वदमन नाम वाले – जिसका 'सर्वदमन' यह नाम रखा है ऐसे 'नाम' पद से स्वार्थ में 'धेय' प्रत्यय के योग से 'नामधेय' बनता है। 'स्थाने... नामधेयोऽसि' इस वाक्य का अर्थ होगा कि तुम्हारा 'सर्वदमन' यह नाम ठीक ही (अन्वर्थक) है क्योंकि **सर्वदमन** – इस पद की व्युत्पत्ति ही है जो सब का दमन कर दे—'सर्वं दमयति – इति सर्वदमनः' (सर्व+दम्+ल्यु)।

पहली—हे अशिष्ट, हमारे सन्तान के समान (इन) प्राणियों को क्यों उत्पीड़ित (परेशान) कर रहे हो। ओह, तुम्हारा क्रोध बढ़ता ही जा रहा है। ऋषियों के द्वारा तुम ठीक ही रखे गये 'सर्वदमन' नाम वाले हो। (अर्थात् ऋषियों ने ठीक ही तुम्हारा 'सर्वदमन' यह नाम रखा है)।

राजा—किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः ? नूनमनपत्या मां वत्सलयति ।

व्या० एवं श०—औरसे – उरसः जात औरसः तस्मिन् पुत्रे इव = सगे पुत्र की भाँति। स्निह्यति = स्नेह कर रहा है। अनपत्यता = सन्तानहीनता। वत्सलयति – वत्सलं सस्नेहं करोति, तत्करोतीत्यर्थे णिच् – प्र०पु०ए०व० = पुत्रवत् स्नेह करा रही है।

राजा—न जाने क्यों इस बालक पर मेरा मन औरस पुत्र (सगे बेटे) की भाँति स्नेह कर रहा है ? निश्चित ही सन्तानहीनता मुझे (इस भाँति) स्नेह करा रही है।

द्वितीया—एषा खलु केसरिणी त्वां लङ्घयति यद्यस्याः पुत्रकं न मुञ्चसि । (एसा क्खु केसरिणी तुमं लंघेदि जइ से पुत्तणं ण मुंचेसि।)

व्या० एवं श०—केसरिणी – केसरः अस्याः अस्ति – केसर+णिनि+ङीप् = सिंहनी। लङ्घयति = आक्रमण करेगी। त्वाम् = तुम्हारे ऊपर। पुत्रकम् (पुत्र+कन्) = बच्चे को। न मुञ्चसि – मुचि+ल०म०पु०ए०व० = नहीं छोड़ते।

दूसरी—यह सिंहनी तुम पर अवश्य आक्रमण करेगी यदि तुम इसके बच्चे को नहीं छोड़ते हो।

बालः—(सस्मितम्) **अहो, बलीयः खलु भीतोऽस्मि।** (अम्हहे, वलिअं क्खु भीदो म्हि। (इत्यधरं दर्शयति)।

व्या० एवं श०—बलीयः खलु = अत्यन्त। भीतः - भी+क्त = भयभीत।

टिप्पणी—(१) **औरसे-पुत्र इव**—मनुस्मृति में १२ प्रकार के पुत्रों का वर्णन है—औरस, क्षेत्रज, दत्त आदि। पत्नी में उसके पति के संसर्ग से उत्पन्न पुत्र 'औरस' कहलाता है—स्वक्षेत्रे संस्कृतायां नु स्वयमुत्पादयेद्धियम्। तमौरसं विजानीयात् पुत्रं प्रथम कल्पितम्॥ मनु०॥ (२) अहो! बलीयः खलु भीतोऽस्मि—सर्वदमन का यह व्यङ्ग्यार्थपूर्ण वाक्य है। द्वितीया तपस्विनी के 'एषा खलु केसरिणी त्वां लङ्घयति... न मुञ्चसि' इस कथन को सुनकर वह (सर्वदमन) मुस्कराते हुये कह रहा है। उसके उक्त वाक्य का निहितार्थ है कि 'मैं स्वल्प भी डरा नहीं हूँ'।

बालक—(मुस्कराकर) ओह, मैं अत्यधिक डर गया हूँ। (अपना निचला ओंठ दिखाता है)।

राजा—

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः॥ १५॥

अन्वय—महतः तेजसः बीजम् अयं बालः स्फुलिङ्गावस्थया स्थितः एधापेक्षः वह्निः इव मे प्रतिभाति।

शब्दार्थ—महतः = महान्। तेजसः = तेज का। बीजम् = बीजस्वरूप। अयम् = यह। बालः = बालक। स्फुलिङ्गावस्थया = चिनगारी की अवस्था में। स्थितः = स्थित, (विद्यमान)। एधापेक्षः = इन्धन की अपेक्षा करने वाली। वह्निः इव = अग्नि की भाँति। मे = मुझको। प्रतिभाति = प्रतीत हो रहा है।

अनुवाद—महान् तेज का बीजस्वरूप यह बालक, चिनगारी की अवस्था में विद्यमान और इन्धन की अपेक्षा करते हुये अग्नि की भाँति मुझको प्रतीत हो रहा है।

संस्कृत व्याख्या—महतः - प्रबलस्य, **तेजसः** - वीर्यस्य; प्रतापस्य, **बीजं** - कारणम्, **अयम्** - एषः, **बालः** - बालकः, **स्फुलिङ्गावस्थया** - स्फुलिङ्गस्य अग्निकणस्य या अवस्था-रूपम् तया - अग्निकणस्यावस्थया, **स्थितः** - वर्तमानः, **एधापेक्षः** - काष्ठापेक्षः, **वह्निः इव** - अग्नि इव, **मे** - मम, **प्रतिभाति** - प्रतीयते।

संस्कृत-सरलार्थः—सर्वदमनस्यापूर्वं तेजो विलोक्य राज वदति - यथा स्वल्पोऽपि स्फुलिङ्गः काष्ठसंयोगमवाप्य प्रज्चलितो जायते, तथैवायमपूर्वशक्तिशाल्ययं बालकोऽपि यौवनशिक्षादिकं प्राप्य महतीं तेजस्वितां भजिष्यतीति।

व्याकरण—स्फुलिङ्गावस्थया - स्फुलिङ्गस्य अवस्था तया (तत्पु०)। एधापेक्षः - एधं काष्ठमिन्धनमिति यावत् - अपेक्षते इति एधापेक्षः - इन्धन (काष्ठ) की अपेक्षा करते हुये। एध शब्द सकारान्त 'एधस्' तथा अकारान्त 'एध' दोनों है। यहाँ अकारान्त का प्रयोग है।

कोष—'हेतुर्ना कारणं बीजं निदानं त्वादिकारणम्' - इत्यमरः। 'काष्ठे दार्विन्धनं त्वेधः' इत्यमरः।

अलङ्कार—'वह्निरिव' यहाँ पर **'उपमा'** अलङ्कार है। यहाँ 'बाल' उपमेय, वह्नि उपमान 'इव' वाचक शब्द तथा बीजम् – आदि साधारण धर्म हैं। ल०द्र० १/५।

छन्द—यहाँ **'अनुष्टुप्'** छन्द है। ल०द्र० १/५।

टिप्पणी—'स्फुलिङ्ग... आग इन्धन की अपेक्षा रखती है। इन्धन मिलते ही उसका छोटा सा कण भी महान् लपटों के रूप में परिणत होकर असह्य हो जाता है, उसी प्रकार तेज का बीजभूत यह बालक भी भविष्य में यौवन आदि को पाकर महान् (असह्य) प्रतापी बनेगा।

प्रथमा—वत्स, एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि। (वच्छ, एवं बालमिइन्दअं मुञ्च। अवरं दे कीलणअं दाइस्सं।)

व्या० एवं श०—बालमृगेन्द्रम् – मृगानां पशूनामिन्द्रः मृगेन्द्रः बालश्चासौ मृगेन्द्रः बालमृगेन्द्र (कर्मधारय) तम् = बालक सिंह को (सिंह के बच्चे को)। क्रीडनकम् = खिलौना। क्रीड्यतेऽनेनेति – क्रीडनकम् – क्रीड्+ल्युट्+करणे स्वार्थे कन्।

पहली—बेटा, इस सिंह के बच्चे को छोड़ दो मैं तुमको दूसरा खिलौना दूँगी।

टिप्पणी—'पशवोऽपि मृगाः, सिंहो मृगेन्द्रः पञ्चास्यः' – इत्यमरः।

बालः—कुत्र ? देह्येतत्। (कहिं ? देहि णं।) (इति हस्तं प्रसारयति)।

व्व० एवं श०—देह्येतत् – देहि+एतत् = यण सन्धि।

बालक—कहाँ है ? (खिलौना मुझको) दो। (हाथ फैलाता है)।

राजा—(बालस्य हस्तमवलोक्य) **कथं चक्रवर्तिलक्षणमप्यनेन धार्यते। तथा ह्यस्य—**

व्या० एवं श०—चक्रवर्तिलक्षणम् – चक्रवर्तिनः लक्षणम् = चक्रवर्ती का लक्षण। धार्यते – धृ+णिच्+यक् (कर्मणि) = धारण कर रहा है।

राजा—(बालक के हाथ को देखकर) क्या यह चक्रवर्ती के लक्षणों को धारण कर रहा है ? क्योंकि इसका—

टिप्पणी—चक्रवर्ती – शास्त्रों में चक्रवर्ती राजा, सम्राट के लक्षण दिये गये हैं। लक्षण के अनुसार जिसके हाथ की अँगुलियाँ घनी होती हैं और जिसका हाथ मृदुल धनुष अङ्कुश आदि से चिह्नित होता है, वह चक्रवर्ती राजा होता है। इसी प्रकार जिसके पैर के तल में पद्म, चक्र, तोरण, अङ्कुश, कुलिश आदि अङ्कित रहता है, वह सम्राट होता है—अतिरिक्तः करो यस्य ग्रथिताङ्गुलको मृदुः। चापाङ्कुशाङ्कितः सोऽपि चक्रवर्ती भवेद् ध्रुवम्॥ यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम्। अङ्कुशं कुलिशं चापि स सम्राट् भवति ध्रुवम्॥

प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिः करः।
अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपङ्कजम्॥ १६॥

अन्वय—प्रलोभ्यवस्तुप्रणयप्रसारितः जालग्रथिताङ्गुलिः अस्य करः इद्धरागया नवोषसा भिन्नम् अलक्ष्यपत्रान्तरम् एकपङ्कजम् इव विभाति।

शब्दार्थ—प्रलोभ्यवस्तुप्रणयप्रसारितः = लुभावनी (ललचाने वाली) वस्तु के प्रेम (अथवा अभिलाषा) के कारण फैलाया गया। जालग्रथिताङ्गुलिः = जिसमें अङ्गुलियाँ जाल के समान गूंथी हुयी (मिली हुयी) हैं (जाल के समान गुँथी हुयी अङ्गुलियों वाला)। अस्य = इसका। करः = हाथ। इद्धरागया = जिसकी लालिमा बढ़ी हुयी है ऐसी (बढ़ी हुयी लालिमा वाली)। नवोषसा =

नवीन उषा के द्वारा। भिन्नम् = विकसित किये गये। अलक्ष्यपत्रान्तरम् = जिसमें पङ्खुड़ियों का मध्यभाग नहीं दिखायी पड़ रहा है ऐसे। एकपङ्कजम् इव = अद्वितीय कमल की भाँति। विभाति = सुशोभित हो रहा है।

अनुवाद—लुभावनी वस्तु (खिलौने) के लिये प्रेम (अथवा अभिलाषा) के कारण फैलाया गया और जाल के समान गुँथी हुयी अङ्गुलियों वाला इस (बालक) का हाथ, ऐसा सुशोभित हो रहा है, जैसे बढ़ी हुयी लालिमा से युक्त नवीन उषा के द्वारा विकसित किये गये और अदृष्टिगोचर पङ्खुड़ियों के मध्यभाग से युक्त (अर्थात् जिसकी पङ्खुड़ियों का मध्यभाग नहीं दिखायी पड़ रहा है ऐसा) अद्वितीय कमल हो।

संस्कृत व्याख्या—**प्रलोभ्यवस्तुप्रणयप्रसारितः** – लोभकारके क्रीडनकरूपे वस्तुनि – यः प्रणयः तेन प्रसारितः विस्तारितः, **जालग्रथिताङ्गुलिः** – जालवत् ग्रथिताः संश्लिष्टा अङ्गुलयः यस्मिन् सः, **अस्य** – बालकस्य, **करः** – हस्तः, **इद्धरागया** – इद्धं समृद्धं लौहित्यं यस्याः तया, **नवोषसा** – नूतनप्रभातसन्ध्यया, **भिन्नं** – प्रस्फुटितम् , **अलक्ष्यपत्रान्तरम्** – अदृश्याः पत्राणां दलानाम् अवकाशाः यस्मिन् तत् , **एकपङ्कजम् इव** – अद्वितीयं कमलम् इव, **विभाति** – शोभते।

संस्कृत-सरलार्थः—क्रीडनकरूपलोभनीयवस्तुप्रेम्णाऽभिलाषेण वा प्रसारितोः जालवत् संश्लिष्टाङ्गुलिरस्य बालकस्य हस्तः समृद्धलौहित्येन नवप्रभातसन्ध्यया भिन्नं विकसितम् अद्वितीयकमलमिव शोभते। तथा च यथा नवप्रभातसन्ध्यायामेवेषद्विकासभावं प्राप्नुवतोऽपि कस्यचित् कमलस्य कतिपयदलमात्रं विकसितं परिदृश्यते न तु दलान्तर्देशस्तथैव क्रीडनकमादातुं हस्तप्रसारसमये बालस्यास्य कतिपयाङ्गुलिमात्रं परिलक्ष्यते न त्वङ्गुलिसन्धिभाग इति।

व्याकरण—प्रलोभ्यवस्तुप्रणयप्रसारितः – प्रलोभ्ये वस्तुनि प्रणयेन प्रेम्णाऽभिलाषेण वा प्रसारितः (तत्पु०)। जालग्रथिताङ्गुलिः – जालवत् ग्रथिताः अङ्गुलयः यस्मिन् सः (बहु०)। इद्धरागया – इद्धः रागः यस्याः सा तया (बहु०)। अलक्ष्यपत्रान्तरम् – अलक्ष्याणि पत्राणाम् अन्तराणि यस्मिन् तत् (बहु०)। भिन्नम् – भिद्+क्त।

कोष—'उषा रात्रौ तदन्ते स्यादत्रानव्ययमप्युषा' इति विश्वः। 'उषः प्रत्युषसी अपि' – इत्यमरः।

अलङ्कार—(१) 'जालग्रथिताङ्गुलिः' इस पद का 'जालवत् ग्रथिता अङ्गुलयो यस्य सः' इस प्रकार विग्रह होने से यहाँ 'इव' के अर्थ में प्रयुक्त 'वत्' प्रत्यय का लोप हो गया है। अतः यहाँ 'लुप्तोपमा' (समासगा वाचकलुप्ता) तथा 'एकपङ्कजमिव' में श्रौती **'पूर्णोपमा'** अलङ्कार है। ल०द्र० १/५ श्लो०। (२) 'अलक्षा पत्रान्तरम्' का हेतु 'इद्धरागया नवोषसा भिन्नम्' है अतः **'काव्यलिङ्ग'** अलङ्कार है। ल०द्र० १/४।

छन्द—इस श्लोक में **'वशंस्थ'** छन्द है। ल०द्र० १/८ श्लो०।

टिप्पणी—(१) 'उषस्' शब्द नपुंसक और स्त्री लिङ्ग दोनों में प्रयुक्त होता है। (२) 'अलक्ष्यपत्रान्तरम्' उषः काल में सूर्य के पूर्ण प्रकाश न होने से कमल पूर्णतः विकसित नहीं हो पाता इसीलिये उसका भीतरी दलों के बीच का अवकाश (अन्तर) दिखायी नहीं देता। इसी प्रकार उस बालक का हाथ ऐसा था कि उसकी अंगुलियाँ सुग्रथित थीं अतः उसके बीच का अन्तर अलक्ष्य था – 'जालग्रथिताङ्गुलिः करः'। भाव यह है कि उसके हाथ की अङ्गुलियाँ घनी थीं। पङ्कज के

समान बालक का हाथ स्वाभाविक रूप से लाल (रक्तवर्ण) था। 'एकपङ्कजमिव' में प्रयुक्त एक शब्द का दो अभिप्राय हो सकता है—१. एक संख्या, २. अद्वितीय अनुपम। बालक ने खिलौना लेने के लिये एक ही हाथ फैलाया है। बालक का हाथ अद्वितीय (अनुपम) कमल के समान था। इस वर्णन से उपमा का चारुत्व एवं बालक के हाथ का सौन्दर्य - दोनों व्यञ्जित होते हैं।

द्वितीया—सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम्। मदीये उटजे मार्कण्डेयस्यर्षिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति तमस्योपहर। (सुव्वदे, ण सक्को एसो वाआमेत्तेण विरमाविदुं। गच्द तुमं। ममकेरए उडए मक्कंडेअस्स इसिकुमार अस्स वण्णचित्तिदो मित्तिआमोरआ चिट्ठदि। तं से उवहर।)

व्या० एवं श०—शक्यः - शक्+यत् = सम्भव, होने या करने योग्य। वाचामात्रेण = केवल कथन (कहने) से। विरमयितुम् - वि+रम्+णिच्+तुमुन् = रोकना। उटजे = कुटीर (कुटिया) में। मार्कण्डेयस्यर्षिकुमारस्य - मार्कण्डेयस्य+ऋषिकुमारस्य - गुण सन्धि = अ+ऋ = अर्। वर्णचित्रितः - वर्णैः विचित्रैः रङ्गैः चित्रितः आलेखितः = रङ्गो से चित्रित (रंगा हुआ)। मृत्तिकामयूरः - मृत्तिकया मृदा निर्मितः मयूरः (मध्यमपद लोपी समास) = मिट्टी का मोर। तमस्योपहर - तम्+अस्य+उपहर - गुण सन्धि उपहर - उप+हृ+लोट् म०पु०ए०व० = लाओ। अस्य (कृते) = इसके लिये।

दूसरी—हे सुव्रता, कहने मात्र से यह नहीं रोका जा सकता। तुम जाओ मेरी कुटिया में रङ्गों से रँगा हुआ ऋषिकुमार मार्कण्डेय का मिट्टी का मोर रखा हुआ है। उसे इसके लिए लाओ।

टिप्पणी—मृत्तिका मयूरम् - इससे यह प्रतीत होता है कि कालिदास के समय में मिट्टी के खिलौने बनते थे।

प्रथमा—तथा (तह।) (इति निष्क्रान्ता)।

पहली—(जैसा तुम कहती हो) वैसा (ही करती हूँ)। (निकल जाती है)।

बालः—अनेनैव तावत् क्रीडिष्यामि। (इमिणा एव्व कीलिस्सं।) (इति तापसीं विलोक्य हसति)।

व्या० एवं श०—क्रीडिष्यामि - क्रीड् लट्+उ०पु०ए०व० = खेलूँगा।

बालक—तब तक इसी से खेलता हूँ। (तापसी को देखकर हँसता है)।

राजा—स्पृहयामि खलु दुर्ललितायास्मै।

व्या० एवं श०—स्पृहयामि - स्पृह+लट् उ०पु०ए०व० = स्पृहा कर रहा हूँ अर्थात् चाह रहा हूँ। यहाँ 'स्पृहेरीप्सितः' सूत्र से **'स्पृह'** धातु (स्पृहयामि) के योग में सम्प्रदान संज्ञा होने से **'दुर्ललितायास्मैने'** चतुर्थी हुई है। दुर्ललिताय - दुष्टं ललितं यस्य सः तस्मै = हठी-नटखट के लिये।

राजा—वस्तुतः इस हठी (नटखट) बालक (को प्यार करने) के लिये मैं ललक रहा हूँ।

आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति॥ १७॥

अन्वय—अनिमित्तहासैः आलक्ष्यदन्तमुकुलान् अव्यक्तवर्णरमणीयवचःप्रवृत्तीन् अङ्काश्रयप्रणयिनः तनयान् वहन्तः धन्याः तदङ्गरजसा मलिनीभवन्ति।

शब्दार्थ—अनिमित्तहासैः = अकारण हँसी से। आलक्ष्यदन्तमुकुलान् = जिनका दाँतरूपी अङ्कुर (मुकुल) कुछ-कुछ दिखायी पड़ रहा है ऐसे। अव्यक्तवर्णरमणीयवचःप्रवृत्तीन् = अस्पष्ट वर्णों के (उच्चारण के) कारण जिनका बोलना (तोतली बोली) रमणीय (प्रिय) लग रहा है ऐसे। अङ्काश्रयप्रणयिनः = जो गोद में रहने (चढ़ने) के लिये लालायित (इच्छुक) रहते हैं ऐसे। तनयान् = पुत्रों को। वहन्तः = लिये हुये। धन्याः = भाग्यशाली लोग (ही)। तदङ्गरजसा = उनके अङ्गों की धूल से। मलिनीभवन्ति = मलिन (धूसरित) होते हैं।

अनुवाद—अकारण (अर्थात् बिना किसी कारण के) हँसी से जिनका दाँतरूपी अङ्कुर कुछ-कुछ दिखायी पड़ रहा है, अस्पष्ट वर्णों के (उच्चारण के) कारण (अर्थात् तोतली बोली से) जिनका बोलना रमणीय (प्रिय) लग रहा है, जो गोद में रहने (चढ़ने) के लिये लालायित (इच्छुक) रहते हैं, ऐसे पुत्रों को (गोद में) लिये हुये भाग्यशाली लोग (ही) उन (बच्चों) के (शरीर के) अङ्गों (में लगी हुयी) धूल से मलिन (धूसरित) होते हैं।

संस्कृत व्याख्या—**अनिमित्तहासैः** – अकारणहासैः, **आलक्ष्यदन्तमुकुलान्** – ईषद्दृश्यदन्तकुड्मलान्, **अव्यक्तवर्णरमणीयवचःप्रवृत्तीन्** – अव्यक्ताः अस्पष्टाः वर्णाः अक्षराणि यास् ताः अत एव रमणीयाः वचसां प्रवृत्तयः वाग्व्यवहारः येषां तान् अस्पष्टाक्षरमनोहरवाक्यविन्यासान्, **अङ्काश्रयप्रणयिनः** – क्रोडनिवासप्रणयिनः, **तनयान्** – पुत्रान्, **वहन्तः** – धारयतः, **धन्याः** – भाग्यवन्तः, **तदङ्गरजसा** – तेषां बालानामवयवधूल्या, **मलिनीभवन्ति** – कलुषीभवन्ति।

संस्कृत-सरलार्थः—राजकथनस्यायं संक्षेपः – वस्तुतस्त एव सौभाग्यशालिनो धन्या ये तादृशान् स्वपुत्रान् निजक्रोडे धारयन्तस्तच्छरीरावयवधूल्याऽऽत्मशरीरं कलुषीकुर्वन्ति येऽकारणमेव स्वसहजहास्यैः किञ्चिल्लक्ष्यदन्तमुकुलास्तथाऽस्पष्टवर्णोच्चारणरमणीयवाग्व्यापाराः पित्रादिक्रोडाश्रयाभिलाषिणश्च सन्ति।

व्याकरण—अनिमित्तपरिहासैः – अनिमित्ताः ये परिहासाः तैः। आलक्ष्यदन्तमुकुलान् – आलक्ष्याः दन्तमुकुलाः येषां तान् (बहु०)। अव्यक्तवर्णरमणीयवचःप्रवृत्तीन् – अव्यक्तैः वर्णैः रमणीयाः वचः प्रवृत्तयः येषां तान् (बहु०)। अङ्काश्रयप्रणयिनः – अङ्के आश्रयः तस्मिन् प्रणयिनः (तत्पु०)। तदङ्गरजसा – तेषाम् अङ्गरजसा (तत्पु०)। मलिनीभवन्ति – मलिन+च्वि+भू+लट्। वहन्तः – वह्+शतृ +प्र०ब०व०। प्रणयिनः – प्रणय+णिनि – प्र०ब०व०।

कोष—'उत्सङ्गचिह्नयोरङ्कः' – इत्यमरः। 'कुट् (ड्) मलोमुकुलोऽस्त्रियामित्यमरः'।

रस-भाव—इस श्लोक में वात्सल्य प्रेम की अतिसुन्दर व्यञ्जना है।

अलङ्कार—(१) बाल-स्वभाव का अति स्वाभाविक वर्णन होने से **'स्वभावोक्ति'** अलङ्कार है। ल०द्र० १/७। (२) बालक सर्वदमनरूप विशेष के कार्यों का वर्णन न कर सामान्य बालकों के कार्यों का वर्णन किया गया है अतः **'अप्रस्तुतप्रशंसा'** अलङ्कार है। ल०द्र० १/१७। (३) 'आलक्ष्यदन्तमुकुलानिव' 'दन्ताः मुकुलानीव' इस प्रकार विग्रह कर उपमित समास करने पर समासगा **'लुप्तोपमा'** अलङ्कार है। ल०द्र० १/५। (४) 'धन्यास्तदङ्गरजसा मलिनी-भवन्ति' से 'तादृशा जना धन्या मादृशाः अधन्याः' इस प्रकार के अर्थ की प्रतीति होने से **'परिसंख्या'** अलङ्कार है। लक्षण—'प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत्। तादृगन्यव्यपोह- श्चेच्छाब्द आर्थोऽथवा तदा परिसंख्या॥

छन्द—**'वसन्ततिलका'** छन्द है। ल०द्र० १/८ श्लो०।

तापसी—**भवतु । न मामयं गणयति ।** (पार्श्वमवलोक्य) **कोऽत्र ऋषिकुमाराणाम् ?** (राजानमवलोक्य) **भद्रमुख, एहि तावत् । मोचयानेन दुर्मोचहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम् ।** (होदु ण मं अअं गणेदि । को एत्थ इसिकुमाराणं ? भद्दमुह, एहि दाव । मोएहि इमिणा दुम्मोअहत्थग्गहेणं डिम्भलीलाए बाहीअमाणं बालमिइन्दअं ।)

व्या० एवं श०—भद्रमुखः – भद्रं सुन्दरं यस्य सः तत्सम्बुद्धौ = सुन्दर मुख वाले । 'भद्र', 'सौम्य' आदि शब्द माननीय व्यक्ति (राजसुत) के लिये भी प्रयुक्त होते हैं—'सौम्य भद्र मुखेत्येवं मान्यो राजसुतो भवेत्' इति । दुर्मोचहस्तग्रहेण – हस्तेन ग्रहः हस्तग्रहः दुर्मोचः हस्तग्रहः यस्य सः तेन (ब०ब्री०) = कठिनता से छुड़ाने योग्य है हाथ की पकड़ जिसकी, ऐसे । दुर्मोचः – दुर्+मुच्+खल् । डिम्भलीलया – डिम्भस्य लीला डिम्भलीला तया = बाल क्रीडा से । बाध्यमानम् – बाध+यक्+शानच् द्वि०पु०ए०व० = पीड़ित (परेशान) किये जाते हुये । मोचय – मुच्+णिच् – लो०म०पु०ए०व० = छुड़ा दो ।

तपस्विनी—अच्छा, यह मुझे (कुछ) नहीं गिन रहा (समझ रहा) है । (अगल बगल देखकर) यहाँ ऋषि-कुमारों में कौन (उपस्थित) है ? (राजा को देखकर) हे महाशय, यहाँ आइये । जिसके हाथ की पकड़ (हस्तग्रहण) छुड़ाना बड़ा कठिन (दुर्मोच) है ऐसे बालक के द्वारा बालक्रीड़ा के साथ पीड़ित (परेशान) किये जाते हुये इस सिंहशावक को छुड़ा दीजिये ।

राजा—(उपगम्य । सस्मितम्) **अयि भो महर्षिपुत्र,**

राजा—(समीप जाकर मुस्कराते हुये) अरे महर्षिपुत्र,

एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया ।
सत्त्वसंश्रयसुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः ।। १८ ।।

अन्वय—एवम् आश्रमविरुद्धावृत्तिना त्वया जन्मतः सत्त्वसंश्रयसुखः अपि संयमः कृष्णसर्पशिशुना चन्दनः इव किमिति दूष्यते ?

शब्दार्थ—एवम् = इस प्रकार । आश्रमविरुद्धावृत्तिना = आश्रम के विपरीत (विरुद्ध) आचरण (व्यवहार) है जिसका ऐसे, (आश्रम के विपरीत आचरण करने वाले) । त्वया = तुम्हारे द्वारा । जन्मतः = जन्म से ही । सत्त्वसंश्रयसुखः = प्राणियों (जीवों) को आश्रय देने के कारण सुखकर । अपि = भी । संयमः = संयम । कृष्णसर्पशिशुना = काले साँप के बच्चे के द्वारा । चन्दनः इव = चन्दन (वृक्ष) की भाँति । किमिति = क्यों । दूष्यते = दूषित (कलङ्कित) किया जा रहा है ?

अनुवाद—इस प्रकार आश्रम के विपरीत (विरुद्ध) आचरण (व्यवहार) करने वाले तुम, जन्म से ही प्राणियों (जीवों) को आश्रय देने के कारण सुखप्रद भी (अहिंसा आदि) संयम, काले साँप के बच्चे के द्वारा चन्दन के वृक्ष की भाँति क्यों दूषित (कलङ्कित) कर रहे हो ?

संस्कृत व्याख्या—**एवम्** – इत्थम् , **आश्रमविरुद्धवृत्तिना** – आश्रमस्य तपोवनस्य प्रतिकूला विपरीता वृत्तिः हिंसारूपः, व्यवहारः यस्य तादृशेन, **त्वया** – ऋषिकुमारेण, **जन्मनः** – बाल्यादेव, **सत्त्वसंश्रयसुखः, अपि** – सत्त्वानां जीवानां सम्यग्रक्षणेन सुखप्रदः अपि, **संयमः** – शमः, **कृष्णसर्पशिशुना** – कृष्णसर्पपुत्रेण, **चन्दनः इव** – मलयजवृक्षः इव, **किमिति** – केन हेतुना, **दूष्यते** – मलिनीक्रियते ?

संस्कृत-सरलार्थः—राजा वदति बालकम् – बालक ! एवं तपोवनप्रतिकूलव्यवहारेण

त्वया मुनिकुमारेण जीवसंरक्षणेन सुखप्रदो जन्मजातः संयमः, कृष्णसर्पेण चन्दन इव, कथं मलिनीक्रियते। त्वया कथमपि जीवपीडनरूपहिंसादिव्यवहारो न करणीय – इति बालमृगेन्द्रं मुञ्चेति भावः।

व्याकरण—आश्रमविरुद्धवृत्तिना – आश्रमस्य विरुद्धा वृत्तिः यस्य तेन (बहु०)। सत्त्वसंश्रयसुखः – सत्त्वानां संश्रयः तेन सुखः (तत्पु०)। कृष्णसर्पशिशुना – कृष्णश्चासौ सर्पश्च कृष्णसर्पः (कर्म०), तस्य शिशुना (तत्पु०)। दूष्यते – दुष+यक् – प्र०पु०ए०व०।

अलङ्कार—(१) 'कृष्णसर्पशिशुनेव' में 'त्वया' उपमेय, 'कृष्णसर्पशिशु' उपमान, दूषित करना (दूष्यते) साधारण धर्म, 'इव' औपम्य वाचक शब्द है अतः यहाँ श्रौती **'पूर्णोपमा'** अलङ्कार है। ल०द्र० १/५ श्लो०।

छन्द—यहाँ **'रथोद्धता'** छन्द है। लक्षण—'रान्नराविह रथोद्धता लगौ' अर्थात् जिस छन्द के प्रत्येक चरण में क्रमशः रगण, नगण, रगण, लघु एवं गुरु होता है वह रथोद्धता है।

तापसी—भद्रमुख, न खल्वयमृषिकुमारः। (भद्दमुह; ण क्खु अअं इसिकुमारओ।)

तपस्विनी—महाशय, यह ऋषि पुत्र नहीं है।

राजा—आकारसदृशं चेष्टितमेवास्य कथयति। स्थानप्रत्ययात्तु वयमेवंतर्किणः। (यथाभ्यर्थितमनुतिष्ठन् बालस्पर्शमुपलभ्य। आत्मगतम्)।

व्याकरण—चेष्टितम् = व्यवहार कर्म। आकारसदृशम् – आकारेण आकारस्य वा संदृशम् = आकृति के अनुरूप। स्थानप्रत्ययात् – स्थानस्य तपोवनस्य प्रत्ययः विश्वासः तस्मात् (तत्पु०) = स्थान के विश्वास से। 'आश्रम में रहने वाला बालक ऋषिकुमार ही होगा' इस विश्वास से हमने ऋषिकुमार कहा है। यह राजा के कथन का अभिप्राय है। एवंतर्किणः – एवम्+तर्क+णिनि प्र०ब०व० = इस प्रकार तर्क करने (सोचने वाले)।

राजा—आकृति के अनुरूप (सदृश) इसका व्यवहार ही बतला रहा है (कि यह ऋषि पुत्र नहीं)। परन्तु (इस) स्थान के विश्वास के कारण हमने सोचा था। (तपस्विनी की प्रार्थना के अनुसार कार्य करते हुये अर्थात् बालक से सिंह-शावक को छुड़ाते हुये बालक के स्पर्श को प्राप्तकर। (अपने मन में)।

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम्।
कां निर्वृतिं चेतसि तस्य कुर्याद् यस्मायमङ्कात् कृतिनः प्ररूढः।। १९।।

अन्वय—कस्यापि कुलाङ्कुरेण अनेन स्पृष्टस्य मम गात्रेषु एवं सुखम्, यस्य कृतिनः अङ्कात् अयं प्ररूढः तस्य चेतसि कां निर्वृतिं कुर्यात्।

शब्दार्थ—कस्यापि = किसी भी। कुलाङ्कुरेण = वंश के अङ्कुर स्वरूप। अनेन = इस (बालक) के द्वारा। स्पृष्टस्य = स्पर्श किये गये। मम = मेरे। गात्रेषु = अङ्गों में। एवम् = इस प्रकार (ऐसा)। सुखम् = सुख (हो रहा है तो)। यस्य = जिस। कृतिनः = पुण्यात्मा (भाग्यशाली) की। अङ्कात् = गोद से। अयम् = यह। प्ररूढः = उत्पन्न हुआ है। तस्य = उसके। चेतसि = हृदय में। काम् = कैसी, कितने। निर्वृतिम् = शान्ति को (आनन्द को)। कुर्यात् = करता होगा (देता होगा)। अर्थात् उसकी शान्ति, आनन्द असीम होगा।

अनुवाद—किसी भी वंश के अङ्कुरस्वरूप इस (बालक) के द्वारा स्पर्श किये गये मेर अङ्गों को (यदि) ऐसा सुख (हो रहा है) (तो) जिस भाग्यशाली की गोद से यह उत्पन्न हुआ है, उसके हृदय में कितना सुख (आनन्द) उत्पन्न करता होगा (देता होगा)। अर्थात् उसके आनन्द की

तो सीमा ही नहीं होगी।

संस्कृत व्याख्या—कस्यापि - अज्ञातस्य, **कुलाङ्कुरेण** - वंशाङ्कुरेण, **अनेन** - शिशुना, **स्पृष्टस्य** - स्पर्शं प्राप्तस्य, **मम** - दुष्यन्तस्य, **गात्रेषु** - शरीरावयवेषु, **एवम्** - इत्थम्, **सुखम्** - भवतीति शेषः, **यस्य कृतिनः** - यस्य सुकृतिनः, **अङ्कात्** - क्रोडात् , **अयं** - बालः, **प्ररूढः** - उत्पन्नः, **तस्य** - जनस्य, **चेतसि** - मनसि, **काम्** - अवर्णनीयाम् , **निर्वृतिं** - शान्तिम् , **कुर्यात्** - विदध्यात् ।

संस्कृत-सरलार्थः—राजा बालस्पर्शजनितं सुखं वर्णयन् वदति—यदज्ञातकुलास्याङ्कुरभूतेनानेन शिशुना कतिपयशरीराङ्गे स्पृष्टस्यममैतादृशं सौख्यं भवति, तदा यस्य सौभाग्यशालिनः देहादयं समुत्पन्नस्तस्य हृदये कियत्सुखं विदध्यादिति वर्णयितुं न पार्यते।

व्याकरण—प्ररूढः - प्र+रुह+क्त। निर्वृतिं - निर्+वृ+क्तिन् । स्पृष्टस्य - स्पृश्+क्त+ष०ए०व०।

कोष—'गात्रमङ्गेकलेवरे' - इति विश्वः। 'निर्वृतिस्तु सुखे जीव्ये' इति धरणिः।

रस-भाव—इस श्लोक में 'वात्सल्य' की अभिव्यञ्जना है।

अलङ्कार—(१) प्रस्तुत श्लोक में दुष्यन्त को होने वाले प्राकरणिक सुख से बालक के पिता के असीमित सुख रूप अर्थ की प्रतीति होने से **'अर्थापत्ति'** अलङ्कार है। ल०द्र० ५/१४ श्लो०। (२) 'कुलाङ्कुरेण' में **'रूपक'** अलङ्कार है क्योंकि यहाँ 'कुल' और 'अङ्कुर' में अभेदारोप है। ल०द्र० २/१६।

छन्द—यहाँ **'उपजाति'** छन्द है। ल०द्र० २/७ श्लो०।

टिप्पणी—(१) पुत्रस्पर्शजनित आनन्द का वर्णन अन्यत्र भी हुआ है—१. शिशुरालिङ्गनं तस्मात् चन्दनाधिकं भवेत्। न वाससां न रामाणां नायं स्पर्शस्तथाविधः। शिशोरालिङ्ग्यमानस्य स्पर्शः सूनोर्यथा सुखः। पुत्रस्पर्शात् सुखतरः स्पर्शो लोके न विद्यते ।। महा० ।। २. **कुलाङ्कुरेण** - नवजात पुत्र को कुल का अङ्कुर कहने से उसकी कोमलता, स्वल्पाकारता, भावीवृद्धि आदि का बोध होता है।

तापसी—(उभौ निर्वर्ण्य) **आश्चर्यमाश्चर्यम्।** (अच्छरिअं अच्छरिअं।)

तपस्विनी—(दोनों को देखकर) आश्चर्य है, आश्चर्य है।

राजा—आर्ये, किमिव ?

राजा—आर्ये, (आश्चर्य) क्यों ?

तापसी—अस्य बालकस्य तेऽपि संवादिन्याकृतिरिति विस्मिताऽस्मि। अपरिचितस्यापि तेऽप्रतिलोमः संवृत्त इति। (इमस्सं बालअस्स दे वि संवादिणी आकीदी त्ति बिम्हिदम्हि। अपरिइदस्स वि दे अप्पडिलोमो संवुत्तो त्ति।)

व्या० एवं श०—संवादिनी - संवदतीति - सम्+वद्+णिनि+ङीप् = मिलती हुई। यह पद 'आकृति' इस पद का विशेषण है। विस्मिता - वि+स्मि+क्त+टाप् = आश्चर्यचकित। अप्रतिलोमः - प्रति+लोमन्+अच् - न प्रतिलोम। अप्रतिलोमः = अनुकूल।

तपस्विनी—इस बालक की और आप की मिलती हुयी आकृति है अर्थात् दोनों की आकृति परस्पर मिल रही है। इसलिये मैं आश्चर्य-चकित हूँ। अपरिचित होते हुये भी (यह) आप

के अनुकूल हो गया है (अर्थात् अपरिचित होते हुये भी आप के कहने से यह शान्त हो गया है)।

राजा—(बालकमुपलालयन्) **न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः ?**

व्या० एवं श०—व्यपदेशः - व्यपदिश्यते विख्यायते अनेन इति व्यपदेशः - वि+अप+दिश्+घञ् = वंश।

राजा—(बालक को दुलारते हुये) यदि यह मुनि-कुमार नहीं है, तो इसका वंश (व्यपदेश) क्या है ?

तापसी—पुरुवंश। (पुरुवंसो।)

तपस्विनी—पुरुवंश।

राजा—(आत्मगतम्) **कथमेकान्वयो मम ? अतः खलु मदनुकारिणमेनमत्रभवती मन्यते। अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम्।**

व्या० एवं श०—एकान्वयः - एकः अन्वयः यस्य = एक वंश वाला। वंश (कुल) के नौ नाम हैं—'संततिर्गोत्रजननकुलान्यभिजनान्वयौ। वंशोऽन्ववायः संतानः॥ अमरकोष - २/७/१ ब्रह्मवर्ग। अर्थात् १. सन्तति, २. गोत्र, ३. जनन, ४. कुल, ५. अभिजन, ६. अन्वय, ७. वंश, ८. अन्ववाय, ९. सन्तान - ये नौ नाम वंश (कुल) के हैं।

राजा—(अपने मन में) क्या मेरे समान वंश वाला (एकान्वय) है (अर्थात् क्या मेरा और इसका वंश एक ही है) ? इसलिये आदरणीय (आप) (तपस्विनी) इस (बालक को) मेरे समान (अनुरूप) मान रही हैं। यह पुरुवंशियों का अन्तिम कुलव्रत भी है।

भवनेषु रसाधिकेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकयतिव्रतानि पश्चात् तरुमूलानि गृहीभवन्ति तेषाम्॥ २०॥

अन्वय—ये पूर्वं क्षितिरक्षार्थं रसाधिकेषु भवनेषु निवासम् उशन्ति, पश्चात् तेषां नियतैकयतिव्रतानि तरुमूलानि गृहीभवन्ति।

शब्दार्थ—ये = जो। पूर्वम् = पहले। क्षितिरक्षार्थं = पृथ्वी की रक्षा के लिये। रसाधिकेषु = भोगों (रसों) से परिपूर्ण (अत्यधिक भोगों वाले)। भवनेषु = भवनों में। निवासम् = निवास। उशन्ति = चाहते हैं (करते हैं)। पश्चात् = बाद में। तेषाम् = उनका। नियतैकयतिव्रतानि = जहाँ नियमित रूप से तपस्विजन जीवन व्यतीत करते हैं ऐसी। तरुमूलानि = वृक्षों की जड़ें। गृहीभवन्ति = घर हो जाती हैं।

अनुवाद—जो पहले (युवावस्था में) पृथ्वी की रक्षा के लिये भोगों से परिपूर्ण भवनों में निवास चाहते हैं (निवास करते हैं), बाद में (अर्थात् वृद्धावस्था में) जहाँ तपस्विजन नियमित रूप से जीवन व्यतीत करते हैं ऐसी वृक्षों की जड़ें उनका घर हो जाती हैं।

संस्कृत व्याख्या—ये - पौरवाः, **पूर्वं** - प्रथमम्, **यौवने** - इत्यर्थः, **क्षितिरक्षार्थं** - पृथ्वीरक्षणाय, **रसाधिकेषु** - भोग्याढ्येषु, **भवनेषु** - प्रासादेषु, **निवासमुशन्ति** - वासमिच्छन्ति (निवसन्तीत्यर्थः), **पश्चात्** - वृद्धावस्थायाम्, **तेषां** - नृपाणाम्, **नियतैकयतिव्रतानि** - नियतम् व्यवस्थितम् एकम् - पावनम् यतिव्रतम् - वानप्रस्थव्रतम् येषु तथाविधानि निरन्तरतपस्विव्रतानुष्ठानार्हाणि, **तरुमूलानि** - वृक्षमूलानि, **गृहीभवन्ति** - निवासाय सम्पद्यन्ते।

संस्कृत-सरलार्थः—राज्ञः कथनस्यायमभिप्रायः - पौरवा पूर्वं (यौवनकाले) पृथ्वीरक्षणाय भोगाढ्येषु प्रासादेषु निवासं वाञ्छन्ति, तदनन्तरं वार्धक्ये तेषां व्यवस्थितैकवानप्रस्थव्रतानि वृक्षतलानि

भवनानि जायन्ते ।

व्याकरण—रसाधिकेषु – रसैः अधिकेषु (तत्पु०)। क्षितिरक्षार्थम् – क्षितेः रक्षार्थम् (तत्पु०)। नियतैकयतिव्रतानि – नियतम् एकं यतिव्रतं येषु तानि (बहु०)। उशन्ति – वश्+लट्+प्र०पु०ब०व० ।

कोष—'रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः । शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे' ।

अलङ्कार—(१) प्रस्तुत श्लोक में 'तरुमूलानि गृहीभवन्ति' में उपमेयभूत तरुमूलों पर जो उपमान भूत गृहत्व का अभिन्नरूप से जो आरोप है, वह (आरोप) प्रकृत अर्थ में उपयोगी है अतः **'परिणाम'** अलङ्कार है । ल०द्र० ३/३ ।

छन्द—यहाँ **'मालभारिणी'** छन्द है । ल०द्र० ३/२१ ।

टिप्पणी—नियतैकयतिव्रतानि – प्राचीन काल में राजा वृद्धावस्था में वानप्रस्थाश्रम का जीवन बिताने के लिये जङ्गल में चले जाते हैं । वहाँ वे यति का व्रत लेकर वृक्षों के नीचे आवास बनाकर रहते थे । यही व्रत पौरवों का भी रहा है । उनके साथ उनकी धर्मपत्नी भी रह सकती थी । याज्ञवल्क्य ने कहा है—'पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सदैव वा' ।

(प्रकाशम्) **न पुनरात्मगत्या मानुषाणामेष विषयः ।**

(प्रकट रूप में) यह (स्थान) मनुष्यों की अपनी स्वाभाविक गति का विषय नहीं है (अर्थात् मनुष्य अपनी स्वाभाविक शक्ति से इस स्थान तक नहीं पहुँच सकता है)।

तापसी—यथा भद्रमुखो भणति । अप्सरः सम्बन्धेनास्य जनन्यत्र देवगुरोस्तपोवने प्रसूता । (जह भद्दमुहो भणादि । अज्छरासम्बन्धेण इमस्स जणणी एत्थ देवगुरूणो तवोवणे प्पसूदा ।)

व्या० एवं श०—जनन्यत्र – जननी+अत्र – यण सन्धि । देवगुरोः – देवानां गुरुः (जनकः) तस्य (ष०त०) = देवगुरु (पिता) कश्यप के । प्रसूता – प्र+षू (सू)+क्त+टाप् = जन्म दिया ।

तपस्विनी—जैसा महाशय (आप) कहते हैं (वह ठीक है)। अप्सरा (मेनका) से सम्बन्ध होने के कारण इस (बालक) की माँ ने देवताओं के पिता (कश्यप) के आश्रम में (इसको) जन्म दिया है ।

राजा—(अपवार्य) **हन्त, द्वितीयमिदमाशाजननम् ।** (प्रकाशम्) **अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ?**

व्या० एवं श०—आशाजननम् – आशायाः जननम् = आशाजनक । किमाख्यस्य – का आख्या-नाम – यस्य तस्य = किस नाम वाले । अथ – यह प्रश्नार्थक है—'मङ्गलानन्तरारम्भ-प्रश्नकात्स्न्र्येष्वथो अथ' इत्यमरः ।

राजा—(एक ओर मुख कर) ओह, यह दूसरी आशाजनक (बात) है । (प्रकट रूप में) अच्छा, आदरणीया (इस बालक की माता) किस राजर्षि की पत्नी हैं ?

तपसी—कस्तस्य धर्मदारपरित्यागिनो नाम सङ्कीर्तयितुं चिन्तयिष्यति ? (को तस्स धम्मदारपरिच्चाइणो णाम संकीतिदुं चिन्तिस्सदि ?)

व्या० एवं श०—धर्मदारपरित्यागिनः – धर्मस्य दाराः तादर्थ्ये षष्ठी समासः ताः यः साधु परित्यक्तवान् (इति विनुण्) तस्य = धर्मपत्नी का परित्याग करने वाले । सङ्कीर्तयितुम् –वक्तुम्

= कहने के लिये ।

तपस्विनी—(अपनी) धर्मपत्नी का परित्याग करने वाले उस (व्यक्ति) का नाम लेने को कौन सोचेगा (अर्थात् उसका नाम कौन लेगा) ?

राजा—(स्वगतम्) **इयं खलु कथा मामेव लक्ष्यीकरोति । यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि । अथवाऽनार्यः परदारव्यवहारः ।**

व्या० एवं श०—नामतः = नाम से । 'नामतः पृच्छामि' यह एक प्रकार से संस्कृत का मुहावरा है 'नामतः पृच्छामि' इसका प्रयोग 'नाम पृच्छामि' के स्थान में होता है । अनार्यः – न आर्यः अनार्यः = अनुचित, आर्यजनों श्रेष्ठजनों, द्वारा गर्हीत, अशिष्ट । परदारव्यवहारः – परस्य दाराणां व्यवहारः = आलोचना तत्सम्बन्धिनी कथा ।

राजा—(अपने मन में) वस्तुतः यह कथा तो मुझे ही लक्ष्य बना रही है । तो इस बालक की माता का नाम पूछता हूँ । अथवा दूसरे की स्त्री के प्रति (यह) व्यवहार (पूछ-ताछ) अनुचित है ।

टिप्पणी—(१) **धर्मपरित्यागिनः... चिन्तमिष्यति ?** – अपनी धर्मपत्नी का परित्याग पाप (अधर्म) है । ऐसे पापियों का नामादिग्रहण भी पापजनक माना जाता है । गरुड़ पुराण में कहा गया है—'स्पर्शनाद् भाषणाद् वापि परस्पर स्तवनादपि । दशांशं पुण्यपापानां नित्यं प्राप्नोति मानवः । शिशुपालवध में भी कहा गया है—'कथापि खलु पापानामलमश्रेयसे यतः' । (२) यहाँ 'परिभाषण' नामक 'निबर्हण' सन्धि का अङ्ग है—'वदन्ति परिभाषणम् । परिवादकृतं वाक्यम्' । 'अस्त्येतत् पौरवाणाम्' से 'पारदारव्यवहारः' तक 'विबोध' नामक निर्वहण सन्धि का अङ्ग है । लक्षण—'कार्यस्यान्वेषणं युक्तया विबोधः यदि कीर्तितः' । (३) **'अनार्यःपरदारव्यवहारः'** – यह एक सूक्ति है । इसका अर्थ है कि परस्त्री के विषय में चर्चा आदि करना आर्यगर्हित होने से वर्जित है । अतः परस्त्री के विषय में किसी भी प्रकार की बात नहीं करनी चाहिये । इससे यह भी सिद्ध होता है कि कालिदास के समय में समाज में 'परस्त्री' के विषय में कोई बात करना अशिष्टता समझी जाती थी । राजा के इस कथन से उसकी चारित्रिक उदात्तता का पता चलता है । महाकवि कालिदास ने आगे ऐसा कथाप्रसंग प्रस्तुत किया है कि बिना पूछे ही बालक की माता का 'शकुन्तला' यह नाम ज्ञात हो जाता है ।

(प्रविश्य मृण्मयूरहस्ता)

(मिट्टी का मोर हाथ में ली हुयी प्रवेश कर)

तापसी—सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व । (सव्वदमण, सउन्दनावण्णं पेक्ख ।)

व्या० एवं श०—शकुन्तलावण्यम् – शकुन्तस्य पक्षिणः लावण्यम् = पक्षी के सौन्दर्य को ।

तपस्विनी—सर्वदमन, पक्षी (शकुन्त) का सौन्दर्य देखो ।

बालः—(सदृष्टिक्षेपम्) **कुत्र वा मम माता ?** (कहिं वा मे अज्जू ?)

बालक—(इधर-उधर दृष्टि डालता हुआ) कहाँ है मेरी माँ ?

उभे—नामसादृश्येन वञ्चितो मातृवत्सलः । (णामसारिस्सेण वंचिदो माउवच्छलो) ।

व्या० एवं श०—नामसादृश्येन – नाम्नः अभिधानस्य, सादृश्येन साम्येन, वञ्चितः– प्रतारितः = नाम की समानता के कारण ठगा गया ।

दोनों—नाम की समानता के कारण मातृभक्त (यह बालक) ठगा गया (अर्थात् धोखे में आ गया)।

टिप्पणी—(१) **'शकुन्तलावण्यम् – प्रेक्षस्व'** – तापसी प्राकृत में बोलती है। उसके द्वारा प्रयुक्त 'सउन्दलावण्णं' इस प्राकृत भाषा के पद का दो प्रकार से संस्कृत-रूपान्तर होता है— १. शकुन्तला-वर्णम् , २. शकुन्त-लावण्यम्। शकुन्तला-वर्णम् का अर्थ होता है – शकुन्तला का वर्ण (रूप) यहाँ दूसरा रूपान्तर 'शकुन्तलावण्य' (अर्थात् उसका अर्थ) प्रसङ्ग के अनुसार अभिप्रेत है। 'शकुन्तलावण्यम्' 'शकुन्त' तथा 'लावण्य' इन दो पदों से मिल कर बनता है – 'शकुन्तस्वलावण्यम्' शकुन्तलावण्यम् – और इस का अर्थ होता है शकुन्त अर्थात् पक्षी का लावण्य (सौन्दर्य)। तापसी 'मृण्मयूर' हाथ में लिये हुये थी और उसने सर्वदमन से उसके सौन्दर्य को देखने के लिये कहा था। पर चूँकि 'शकुन्तलावण्य' में 'शकुन्त' इस पद के साथ 'लावण्य' के 'ला' इस पदांश का योग होने से 'शकुन्तला' शब्द बन जाता है, अतः बालक को भ्रमवश पूरे पद (शकुन्तलावण्य) का अर्थ समझ में नहीं आया। केवल उसका 'शकुन्तल' इस अक्षर समूह को सुनते ही अपनी माता का, शकुन्तला का नाम याद आ गया है और वह इस भ्रम के कारण कह उठता है – 'कुत्र वा मम माता शकुन्तला' कहाँ है मेरी माता शकुन्तला ? सर्वदमन के इसी भ्रम का उल्लेख दोनों तापसियाँ इस प्रकार करती हैं—**'नामसादृश्येन वञ्चितो मातृवत्सलः'** और सर्वदमन के उसी भ्रम का निवारण दोनों तापसियाँ इन शब्दों में करती हैं—**'वत्स ! अस्य मृत्तिकामयूर रम्यत्वं पश्येति भणितोऽसि'**।

द्वितीया—वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि। (वच्छ, इमस्स मित्तिआमोरअस्स रम्मत्तणं देक्ख त्ति भणिदो सि।)

व्या० एवं श०—रम्यत्वम् – रम्यस्य भावः – रम्य+त्व = रमणीयता को। भणितः – भण्+क्त = कहे गये थे।

दूसरी—बेटा इस मिट्टी के मोर की रमणीयता को देखो, (मेरे द्वारा) तुम कहे गये हो (अर्थात् मैंने तुमसे यह कहा कि इस मिट्टी के मोर का सौन्दर्य देखो)।

राजा—(आत्मगतम्) **किं वा शकुन्तलेत्यस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते।**

व्या० एवं श०—आख्या = नाम। नामधेयसादृश्यानि – नामधेयस्य नाम्नः सादृश्यानि साम्यानि = नामों की सदृशता। मृगतृष्णिकेव – मृगतृष्णिका+इव (गुण सन्धि) = मृगमरीचिका के समान। नाममात्रप्रस्तावः – नाम एव नाममात्रम् तस्य प्रस्तावः प्रसङ्गः = शकुन्तला के नाम का प्रसङ्ग। विषादाय कल्पते = दुःख के लिये हो जाय। यहाँ 'क्लृप्' धातु के योग में 'क्लृपि सम्पन्नमात्रे च' वार्तिक से विषादाय में चतुर्थी विभक्ति हुई है।

राजा—(अपने मन में) क्या शकुन्तला इसकी माता का नाम है ? किन्तु नामों में समानता भी होती है। ऐसा न हो कि मृगतृष्णा की भाँति (शकुन्तला) के नाम का प्रसङ्ग मेरे दुःख के लिये कारण हो जाय।

बालः—मातः, रोचते म एष भद्रमयूरः। (अज्जुए, रोअदि मे एसो भद्दमोरओ।) (इति क्रीडनकमादत्ते)।

बालक—माँ यह सुन्दर मोर मुझे अच्छा लग रहा है। (खिलौना ले लेता है)।

प्रथमा—(विलोक्य। सोद्वेगम्) **अहो रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।**

(अम्हहे, रक्खाकरंडअं से मणिबन्धे ण दीसदि।)

व्या० एवं श०—रक्षाकरण्डकम् – रक्षार्थं करण्डकम् = रक्षा सूत्र (ताबीज)। मणिबन्ध – करतलमूल = कलाई में।

पहली—(देखकर, घबराहंट के साथ) हाय, रक्षाकरण्डक रक्षासूत्र यन्त्र इसकी कलाई में नहीं दिखलायी पड़ रहा है।

टिप्पणी—(१) **'शकुन्तलावण्य'** में 'श्लेषवक्रोति' है। द्वयर्थक वाक्य रखने के कारण **'पताकास्थानक'** है सा०द० में इसका लक्षण यह है—द्वयर्थी वचनविन्यासः सुश्लिष्टः काव्यप्रयोजितः। प्रधानार्थान्तरापेक्षी पताकास्थानकं परम्॥ (२) **रक्षाकरण्डकम्** – रक्षार्थं करण्डकम् = रक्षाकरण्डकम्। 'कृ' धातु से 'उणादि सूत्र 'अण्डन कृसृभृवृञः' १/१२९ से 'अण्डन्' प्रत्यय के योग से 'काण्ड' फिर 'कन्' के योग से 'करण्डक' शब्द बनता है। करण्ड का उल्लेख अमरकोष में लिङ्गादिसङ्ग्रहवर्ग में तृतीय काण्ड में हुआ है—'गडुःकरण्डो लगुडो वरण्डश्च किणो ध्रुवः'। मेदिनीकोष में करण्ड का अर्थ, मधुकोष (मधुमक्खी का छत्ता) असि (तलवार), करण्डव (जलपक्षी) दलाढक (फेन समुद्री मछली विशेष की हड्डी आदि) दिया है। करण्ड (करण्डक) का एक अर्थ सन्दूक, सामान रखने का पात्र आदि के साथ छोटी डलिया भी होता है। यदि इसका अर्थ छोटी डिब्बी ले लिया तो उसमें 'अपराजिता' नामक औषधि को रखकर कलाई में बांधने की बात कुछ सङ्गत हो जाती है। वस्तुतः इस 'रक्षा करण्डक' को ही प्रथम तपस्विनी 'अपराजिता' नामक औषधिविशेष बताती है जिसे 'जातकर्म' संस्कार के समय महर्षि कण्व ने दी थी—'एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता'। कुछ लोगों ने रक्षाकरण्डक को रक्षासूत्र, कुछ ने रक्षागुलिका, कुछ ने वलयाकारसमूल औषधिविशेष बताया है। वस्तुतः 'रक्षाकरण्डक' से अभिप्राय अपराजिता नामक औषधि विशेष ही है जो ताबीज के रूप में हाथ में बाँधी गयी थी। अब इसे रक्षासूत्र, ताबीज, रक्षागुलिका आदि जो कुछ कह लिया जाय, है वह रक्षात्मक अपराजिता नामक औषधि विशेष ही जो उसके हाथ की कलाई में उसके रक्षार्थ या दृष्टि दोष आदि कुप्रभाव से बचने के लिये बांधी गयी थी।

राजा—अलमावेगेन। नन्विदमस्य सिंहशावकविमर्दात् परिभ्रष्टम्। (इत्यादातुमिच्छति)।

व्या० एवं श०—सिंहशावकविमर्दात् – सिंहशावकस्य विमर्दः तस्मात् = सिंह के बच्चे के कर्षण (रगड़) से। परिभ्रष्टम् – परि+भ्रष्ट+क्त = (कलाई से) गिर गयी।

